 ISSN 2320-2025

# भावनाविमर्शः

डॉ.श्रीरामः ए. एस.

धर्माधर्मयोः निरूपणार्थं प्रवृत्तमिदं मीमांसाशास्त्रम्। मीमांसकेन धर्मस्य लक्षणम् इत्थं प्रत्यपादि यत् वेदबोधितश्रेयस्साधनताको धर्मः इति। सः यागादिरूपः धर्मः 'यजेत स्वर्गकामः' इत्यादिवेदवाक्येन स्वर्गादिरूपफलोद्देशेन पुरुषं प्रति विधीयते। 'यजेत' इत्यत्र 'यज्' इति धातुः, 'तिप्' इति प्रत्यय: इति अंशद्वयं विद्यते। 'तिप्' इति प्रत्ययेऽपि आख्यातत्वम्, लिङ्त्वम् इति धर्मद्वयविशिष्टौ आख्यातांशलिङंशौ स्तः। तयोः द्वयोः अंशयोः भावना एव अर्थः।




**भावना**

आख्यातम्, लिङ् च इति द्वाभ्याम् अंशाभ्यां 'भावना' उच्यते। भावना नाम उत्पद्यमानस्य स्वर्गादिफलस्य उत्पत्त्यनुकूल: उत्पादकस्य पुरुषस्य व्यापारविशेषः इति।




सा च भावना शब्दभावना, अर्थभावना इति द्विविधा।

**शाब्दी भावना**

लिङर्थविषये अनेके मतभेदाः सन्ति। तेषु पक्षत्रयस्य निर्देशः मीमांसान्यायप्रकाशकारैः कृतः। यथा -

पुरषप्रवृत्त्यनुकूलः व्यापारविशेषः, प्रवर्तनाख्यः अलौकिकः कश्चित् धर्मविशेषः वा लिडर्थः इति भट्टसोमेश्वरः।

इष्टसाधनत्वमेव इष्टसाधनत्वेन रूपेण लिङर्थः इति मण्डनमिश्रः।

इष्टसाधनत्वमेव प्रवर्तनात्वेन रूपेण लङर्थः इति पार्थसारथिः।

का इयं शब्दभावना इति प्रश्ने इदं समाधानम्, यत् पुरषप्रवृत्त्यनुकूलः आत्मनिष्ठः व्यापारविशेषः इति। शिष्यादिप्रयोज्यपुरुषस्य या यागादिजनिका प्रवृत्तिः, तज्जनकः आचार्यादिप्रयोजकनिष्ठः वैदिकलिङादिनिष्ठः वा प्रवर्तनारूपः व्यापारविशेषः शब्दभावना। शब्दभावना, प्रेरणा, विधिः, प्रवर्तना इति पर्यायपदानि। सा प्रवर्तना एव लिङादेः अर्थः। आदिपदेन लेट्, लोट्, तव्यादिप्रत्ययानां ग्रहणम्।

प्रवर्तनाबोधकलिङादीनां श्रवणानन्तरम् अयम् लिङाद्युच्चारयिता आचार्यः मां शिष्यम् अस्मिन् कर्मणि प्रवर्तयति इति निश्चयेन अव्यभिचारेण ज्ञायते।

मण्डनमिश्रादयः इष्टसाधनत्वं लिङर्थः इति वदन्ति। तन्न, यतः इष्टसाधनत्वस्य लिङर्थत्वे इष्टसाधनम् इति लिङः समानार्थकपदं स्यात्। परम् इष्टसाधनलिङः समानार्थकत्वं न युक्तम्। इष्टसाधनलिङोः समानार्थकत्वे लोकव्यवहारस्य विरोधः भवति। यथा लोके 'सन्ध्योपासनं तव इष्टसाधनम्, तस्मात् तत् त्वं कुरु' इति इष्टसाधनकुरूपदयोः सहोच्चारणं दृश्यते। सः सहप्रयोगः न युक्तः। 'घटः कलशः अस्ति' इति समानार्थकपदानां सहप्रयोगः तु न क्रियते। सहप्रयोगे पुनरुक्तिः स्यात्। अतः व्यापारविशेषः एव लिङर्थः। सः लिङर्थः 'गामानय' इत्यादिलौकिकवाक्ये लिङाद्युच्चारयितरि प्रेरकपुरुषे विद्यमानः इच्छाविशेषः। वैदिकवाक्यानि तु पुरुषेण स्वेच्छानुसारम् उच्चारितानि न सन्ति। अतः वेदे लिङर्थः पुरुषनिष्ठः इच्छाविशेषः इति वक्तुं न शक्यते। अतः वेदे लिङर्थः वैदिकलिङादिनिष्ठः प्रवर्तनारूपः व्यापारविशेषः। तदुपरि प्रश्नः, शक्तिग्रहस्य उपायाः इमे सन्ति। यथा-

शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च।

वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥ इति।

एवं शक्तिग्रहः लौकिकव्यवहारादिना भवति। लौकिकवाक्ये प्रयुज्यमानस्य लिङादेः पुरुषनिष्ठाभिप्रायरूपेण प्रवर्तनायां शक्तिग्रहो जातः। परं वैदिकलिङादिषु शब्दनिष्ठत्वेन रूपेण प्रवर्तनायां शक्तिग्रहः कथं भवति इति।

सत्यम्, लोके पुरुषनिष्ठव्यापारबोधकत्वेन रूपेण शक्तिग्रहः भवति। तन्मात्रेण वैदिकलिङादौ शक्तिग्रहः न भवति इति न मन्तव्यम्। बालः क्षुदि सति रोदिति। तदा तन्माता बालस्य इच्छारूपां प्रवर्तनां ज्ञात्वा स्तन्यं प्रदातुं प्रवर्तते। एवं बालः वारं वारं स्वरोदनानन्तरभाविनीं मातृप्रवृत्तिं दृष्ट्वा 'स्वरोदनसत्त्वे मातृप्रवृत्तिः', 'स्वरोदनाभावे मातृप्रवृत्त्यभावः' इति अन्वयव्यतिरेकाभ्यां मातृप्रवृत्तिं प्रति स्वरोदनादवगतस्वाभिप्रायरूपप्रवर्तनाज्ञानं कारणमिति अवधारयति। कालान्तरे सः बालः प्रबुद्धस्सन् प्रयोजकवृद्धस्य 'गामानय' इत्यादिलिङ्घटितवाक्योच्चारणसमनन्तरं प्रयोज्यवृद्धस्य गवानयनविषयिणीं प्रवृत्तिं दृष्ट्वा प्रयोज्यवृद्धस्य प्रवृत्तौ कारणं किमिति जिज्ञासमानः तत्र कारणान्तरम् अप्राप्य लिङादिघटितवाक्यश्रवणेन उत्पन्नम् अयमत्र प्रवर्ततामित्याकारकं स्वाभिप्रायरूपप्रवर्तनाज्ञानं प्रवृत्तिं प्रति कारणम् इति मातृप्रवृत्तिवत् अनुमिनोति। अनुमानप्रकारश्च अयम्, 'प्रयोज्यवृद्धप्रवृत्तिः प्रवर्तनाज्ञानजन्या, लिङादिश्रवणानन्तरमेव जायमानत्वात्, अस्मद्रोदनानन्तर-जन्यास्मन्मातृप्रवृत्तिवत्' इति परं तादृशी पुरुषेच्छारूपा प्रवर्तना वेदे न सम्भवति। अतः लिङादिशब्दनिष्ठम् अलौकिकं धर्मं प्रवर्तनारूपेण गृह्णाति। एवं वैदिकलिङादौ शब्दनिष्ठत्वेन रूपेण प्रवर्तनायां शक्तिग्रहः भवति।

यद्यपि 'या या प्रवृत्तिः, सा प्रवर्तनाज्ञानजन्या' इति प्रवृत्तित्वावच्छिन्नं प्रति प्रवर्तनाज्ञानं न कारणम्। यतः स्वतस्सिद्धप्रवृत्तिस्थले भोजनादौ प्रवर्तनाज्ञानं विना इष्टसाधनताज्ञानमात्रेण प्रवृत्तिः दृश्यते। प्रयोज्यवृद्धप्रवृत्तावपि अर्थात् प्रेरणोत्तरप्रवृत्तिस्थले यदि इष्टसाधनताज्ञानं न स्यात्, तर्हि तत्रापि प्रवृत्तिः न दृश्यते। एवम् इष्टसाधनताज्ञानस्य स्वतस्सिद्धप्रवृत्तिस्थले प्रेरणोत्तरप्रवृत्तिस्थले च प्रवृत्तिं प्रति कारणत्वं दृष्टम्। परं प्रवर्तनायाः प्रेरणोत्तरप्रवृत्तिस्थले कारणत्वं दृष्टं चेदपि स्वतस्सिद्धप्रवृत्तिस्थले न कारणत्वम्। तेन अव्यभिचारात् इष्टसाधनताज्ञानमेव

प्रवृत्तित्वावच्छिन्नं प्रति कारणमिति वक्तव्यम्। तथापि प्रेरणोत्तरप्रवृत्तिं प्रति प्रवर्तनाज्ञानस्य कारणत्वं बालप्रेरितमातृप्रवृत्त्यादौ दृष्टम्। तथैव गवानयनरूपप्रयोज्यवृद्धप्रवृत्तेरपि प्रयोजकवृद्धप्रेरितप्रवृत्तित्वात् प्रेरणोत्तरप्रवृत्तिं प्रति प्रवर्तनाज्ञानस्य कारणत्वम्। 'या या प्रेरणोत्तरप्रवृत्तिः सा प्रवर्तनाज्ञानजन्या' इति अनुमानात्, 'आचार्यप्रेरितः अहं गामानयामि, न तु स्वेच्छया' इत्यादिना लोके व्यवहारदर्शनात् च प्रवर्तनायाः प्रवृत्तिहेतुत्वं निराकर्तुं न शक्यम्। इदं च प्रवर्तनाज्ञानं प्रेरकवाक्यसत्त्वे भवति। प्रयोजकवाक्याभावे न भवति। अतः अन्वयव्यतिरेकाभ्यां प्रवर्तनाज्ञानं प्रेरकवाक्येन उत्पन्नम् इति निश्चीयते। प्रयोजकपुरुषेण 'गाम् आनय' इति अनेकपदानाम् उच्चारणं कृतम्। तत्र कस्य पदस्य अर्थः प्रवर्तना इति जिज्ञासायाम् आवापोद्वापाभ्यां लिङः प्रवर्तनायां शक्तिः इति निश्चिनोति। आवापः सङ्ग्रहः। उद्वापः त्यागः। प्रवृत्तिप्रयोजक: व्यापारः प्रवर्तना।

सा प्रवर्तना विधिः, सम्प्रश्नः, प्रार्थना इत्यादिना अनेकधा भवति। परं सम्प्रश्नत्वरूपेण सम्प्रश्ने शक्तिः, प्रार्थनायां प्रार्थनात्वेन रूपेण शक्तिः इति स्वीक्रियमाणे सम्प्रश्नस्थले प्रार्थनाद्यभावात्, प्रार्थनास्थले सम्प्रश्नाद्यभावात् व्यभिचरिता भवति। अतः लिङर्थः सर्वः इति वक्तुं न शक्यते। अतः प्रवर्तनात्वमेव शक्यतावच्छेदकम् इति स्वीकार्यम्। प्रवर्तनात्वेन रूपेण शक्तिग्रहात् 'पुरोडाशान् अलं कुरु' इत्यादिप्रैषादौ प्रवर्तनात्वेन रूपेण प्रतीतिः भवति। न तु प्रैषत्वेन रूपेण सामान्याकारेण प्रतीतस्य प्रैषत्वेन रूपेण विशेषाकारेण प्रैषस्य प्रतीतिः लक्षणया भवति।

एवं च यथा लौकिकलिङादेः शक्तिः प्रवर्तनासामान्ये अवधारिता, तथा वैदिकलिङादेः अपि शक्ति: अवधारिता भवति। 'य एव लौकिकाः शब्दाः, त एव वैदिकाः शब्दाः' इति निश्चयात्। सम्प्रश्नादयः वक्तुः अभिप्रायः। सः लोके सम्भवति चेदपि वेदे न सम्भवति। वेदे तु प्रेरणारूप: शब्दनिष्ठः व्यापारविशेषः इति स्वीक्रियते। शब्दनिष्ठः व्यापारः शाब्दी भावना इति कथ्यते। सा शब्दभवना पूर्वोक्तरीत्यैव प्रवर्तनात्वेनैव रूपेण लिङादेरर्थः। उक्तश्च अयमभिप्रायः वार्तिके -

'अभिधाभावनामाहुः अन्यामेव लिङादयः।' इति।

अभिधीयते इति अभिधा। अभिधा अभिधायक: विधिः। अभिधायाः भावना अभिधाभावना। ताम् अभिधाभावनां लिङादय: बोधयन्ति इत्यर्थं न्यायसुधाकृत् भट्टसोमेश्वरः उपपादयति।

इष्टसाधनत्वमेव प्रवर्तनात्वेन रूपेण लिङर्थः इति वादिनः पार्थसारथिमिश्र-प्रभृतयः इत्थं वदन्ति यत् प्रवर्तनासामान्ये शक्तिग्रहात् प्रवर्तनासामान्यमेव लिङर्थः। इतरथा प्रार्थनादौ अनेकशक्तिकल्पनाप्रसङ्गः। प्रवर्तनादिः पुरुषस्य आशयः। तत् अपौरुषेये वेदे न सम्भवतीति कश्चन प्रवृत्तिजनकव्यापारविशेषः प्रवर्तना इति कल्पनीयम्। 'निर्विशेषं न सामान्यम्' इति न्यायेन सामान्यस्य विशेषे पर्यवसानं कार्यम्। इतरथा आकाङ्क्षा न निवर्तते। लिङर्थत्वेन प्रतीयमानः व्यापारविशेषः कः इति जिज्ञासायां धात्वर्थयागादिगतम् इष्टसाधनत्वम् एव व्यापारविशेषः इति कल्प्यते। इष्टसाधनताज्ञानस्यापि प्रवृत्तिजनकत्वम् अस्त्येव। स्वतस्सिद्धप्रवृत्तिस्थले इष्टसाधनताज्ञानमात्रेण प्रवर्तते। प्रेरणोत्तरप्रवृत्तिस्थले च यावत् इष्टसाधनताज्ञानं न भवति तावत् न प्रवर्तते। तत्र शिष्यादौ इष्टसाधनताज्ञानं स्वतः नोत्पन्नं चेदपि, आचार्यादिः स्वप्रवर्तनाबलात् इष्टसाधनताज्ञानम् उत्पादयति। शिष्यादिः सर्वः अपि प्राणिविशेषः प्रवृत्तिविषयस्य यागादेः इष्टसाधनतां ज्ञात्वैव प्रवर्तते। तेन या या प्रवृत्तिः सा इष्टसाधनताज्ञानजन्या इति इष्टसाधनताज्ञानस्य प्रवृत्तिकारणत्वं भवति।

लिङर्थः प्रेरणा, न इष्टसाधनत्वमिति यन्मते उच्यते, तन्मतेऽपि इष्टसाधनताज्ञानं विना प्रवृत्तेः अनुदयात्, प्रवर्तना एव स्वनिष्ठप्रवर्तकत्वनिर्वाहार्थं प्रवृत्तिविषयस्य यागादेः इष्टसाधनत्वम् आक्षिपति। अतः लिङर्थप्रेरणावादिमतेऽपि इष्टसाधनताज्ञानं स्वीकार्यमेव। इष्टसाधनताज्ञानस्य अस्वीकारे प्रवृत्तिः नोदेति। प्रवृत्त्यभावे विधेः प्रवर्तकत्वमेव न रक्षितं भवति। विधेः प्रवर्तकत्वाभावेः विधेः वैयर्थ्यं स्यात्। अतः लिङर्थेष्टसाधनतावादिमते, लिङर्थप्रेरणावादिमतेऽपि इष्टसाधनताज्ञानस्य स्वीकारात् इष्टसाधनत्वस्यैव प्रवर्तनात्वेन रूपेण लिङर्थत्वं वक्तव्यम्। धात्वर्थः यागादिः स्वर्गादिः इष्टस्य साधनम्। तस्मिन् इष्टसाधनत्वाख्यः धर्मः विद्यते। तच्च इष्टसाधनत्वमेव लिङर्थः। प्रेरणायाः लिङर्थत्वे

लिङ्गिष्ठव्यापारबोधकत्वमेव स्यात्। तच्च लोकविरुद्धम्। अतः लिङः धात्वर्थादीत्यन्यनिष्ठव्यापारबोधकत्वमेव अङ्गीकार्यम्।

किञ्च इष्टसाधनत्वं प्रवर्तनात्वेन रूपेण लिङर्थः इति पक्षे लाघवं भवति। प्रेरणा लिङर्थः इति स्वीक्रियमाणे गौरवं स्यात्। शब्दः विभुः, अचेतनः। अतः तस्मिन् शब्दे स्पन्दः न भवति। शब्दे स्पन्दाद्यतिरिक्तः व्यापारः स्वीकार्यः। सः प्रवर्तनात्वेन रूपेण ज्ञातः शब्दनिष्ठः व्यापारः स्वतस्सिद्धप्रवृत्तौ प्रेरणोत्तरप्रवृत्तौ वा कारणम् इति न सिद्धम्। सः व्यापारः प्रवृत्तिकारणम्, धात्वर्थनिष्ठव्यापारबोधकत्वेन सिद्धस्य स्वनिष्ठव्यापारबोधकत्वम्, स्वनिष्ठप्रवर्तकत्वरक्षणार्थं धात्वर्थस्य इष्टसाधनत्वाक्षेपणम् इति अनेककल्पनापत्त्या गौरवं स्यात्। लिङर्थेष्टसाधनत्वपक्षे तु इष्टसाधनत्वस्य प्रवृत्तिकारणत्वं सिद्धम्। शब्दस्य धात्वर्थनिष्ठव्यापारबोधकत्वमपि क्लृप्तम्। इष्टसाधनत्वस्य लिङर्थत्वमात्रं कल्पनीयम् इति लाघवम्। प्रेरणाविध्यर्थत्ववादिमतेऽपि प्रेरणायाः प्रवर्तकत्वसंरक्षणार्थम् इष्टसाधनत्वम् अवश्यं कल्पनीयम्। एवम् अवश्यं कल्पितस्य इष्टसाधनत्वस्य प्रवर्तनात्वेन रूपेण लिङर्थत्वकल्पने लाघवम्।

तदुपरि प्रश्नः, प्रेरणायाः प्रवर्तकत्वनिर्वाहार्थम् इष्टसाधनत्वं कल्प्यते। लिङा यदि प्रेरणा नोच्यते, तदा विधेः प्रवर्तकत्वं न भवति। प्रवर्तकाभावे तु इष्टसाधनत्वकल्पकमेव नास्ति इति। तन्न, प्रेरणालिङर्थवादिमतेऽपि प्रेरणात्वेन रूपेण प्रेरणा न लिङर्थः। अपि तु प्रेरणासामान्येन रूपेण लिङर्थः। सामान्येन ज्ञातस्य प्रेरणासामान्यस्य प्रेरणायां पर्यवसानम्। यथा भवन्मते इष्टसाधनत्वम् आक्षिप्यते, तथा अस्मन्मतेऽपि लिङा प्रेरणायाः अनुच्यमानेऽपि इष्टसाधनत्वम् आक्षिप्यते।

यदुक्तम् इष्टसाधनत्वं लिङर्थः इति स्वीक्रियमाणे सन्ध्योपासनं ते इष्टसाधनं तस्मात् तत् त्वं कुरु इत्यादौ इष्टसाधत्वलिङोः सहप्रयोगः न उपपद्यते इति। तन्न, लिङा विशेषरूपेण अर्थात् इष्टसाधनत्वेन रूपेण इष्टसाधनत्वं न प्रतिपाद्यते। अपि तु प्रवर्तनात्वेन रूपेण इष्टसाधनत्वं लिङा प्रतिपाद्यते। एवं च कुरु इत्यत्र लिङः इष्टसाधनत्वं सामान्याकारेण प्रतिपादयति। इष्टसाधनम् इति पदं विशेषाकारेण प्रतिपादयति। एवं विशेषसामान्यरूपेण इष्टसाधनत्वम् उक्तमिति सहप्रयोगे न कापि

अनुपपत्तिः। सामान्यविशेषवाचकशब्दयोः सहप्रयोगः लोके दृष्टः अपि। यथा पाञ्चालराजो द्रुपदः इति। पाञ्चालराजः इति सामान्यवाचकं पदम्। द्रुपदः इति विशेषवाचकं पदम्। एवं च इष्टसाधनत्वं प्रवर्तनात्वेन रूपेण लिङादिशब्देन अभिधीयते इति शाब्दी भावना इत्युच्यते। एवं स्वीक्रियमाणे न कापि अनुपपत्तिः इति पार्थसारथिमिश्राः।

"अभिधाभावनामाहुः अन्यामेव लिङादय:' इत्यस्य वार्तिकस्यापि आशय: अयमेवेति तैः मन्यते। पुरुषस्य प्रवृत्तिं भावयति इति भावना। अभिधीयते इति अभिधा। अभिधा नाम इष्टसाधनता। सा इष्टसाधनता प्रवर्तनात्वेन रूपेण अभिहिता। ताम् अभिधाभावनां लिङादयः आहुः इति। उक्तमिदं मण्डनमिश्रैः -

'पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः।
प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम्॥' इति।

अनेन सिद्धमिदं यत् 'यजेत' इत्यादौ 'तिपि' आख्यातम्, लिङ् इति अंशद्वयं विद्यते। तत्र लिङा शब्दभावना अभिधीयते। आख्यातेन अर्थभावना अभिधीयते इति।




**शब्दभावनायाः अंशत्रयम्**

सा च शब्दभावना 'साध्यम्', 'साधनम्', 'इतिकर्तव्यता' इति अंशत्रयम् आकाङ्क्षति। अंशत्रयस्यैव 'किम्', 'केन', 'कथम्' इति आकारः। एवं च यत्किञ्चित् फलिका, यत्किञ्चित्करणिका, यत्किञ्चिदितिकर्तव्यताका अर्थभावना इति सामान्याकारेण बोधः। शब्दभावनायाः साध्याकाङ्क्षायां साध्यम्, साधनम्, इतिकर्तव्यता इति अंशत्रयवती अर्थभावना साध्यत्वेन अन्वेति। तत्र च प्रमाणं समानाभिधानश्रुतिः। अर्थात् एकप्रत्ययगम्यत्वम्। 'यजति' इत्यादिषु विद्यमानेन एकेन 'त' इति प्रत्ययेन शाब्दी, आर्थी इति भावनाद्वयम् अवगम्यते। अर्थात् 'त' इति

प्रत्यये विद्यमानाभ्याम् आख्यातम्, लिङिति द्वाभ्याम् अंशाभ्यां शाब्दी, आर्थी इति द्वे भावने अभिधीयेते। एवम् एकप्रत्ययाभिधेयत्वमेव शब्दभावनायाम् अर्थभावनायाः अन्वये प्रमाणम्।

शब्दभावनायाः करणाकाङ्क्षायां लिङ्-लेट्-लोट्-तव्यप्रत्ययानां ज्ञानं साधनत्वेन सम्बध्यते।

इतिकर्तव्यताकाङ्क्षायाम् अर्थवादेन ज्ञाप्यः 'प्रशस्तः' इत्याकारकं प्राशस्त्यज्ञानम् इतिकर्तव्यतात्वेन सम्बध्यते।




तेन प्रवृत्तिभाव्यिका, लिङ्ज्ञानकरणिका, प्राशस्त्यज्ञानेतिकर्तव्यताका शब्दभावना इति बोधः।

**आर्थी भावना**

ण्यन्तात् भूधातोः करणार्थे ल्युट्प्रत्यये कृते भावना इति शब्दः निष्पद्यते। का नाम आर्थी भावना इति चेत् न तावत् कर्तुः व्यापारः। धात्वर्थः यागादिः अपि कर्तुः व्यापारः एव भवति। अतः भावनायाः कर्तृव्यापारत्वे धात्वर्थस्यापि भावनात्वापत्तिः। धात्वर्थः भावना भवतु इति इष्टापत्तिः दातुं न शक्या। यतः यागादिः धात्वर्थः प्रकृतेः अर्थः, न तु प्रत्ययार्थः। भावना तु प्रत्ययगताख्यातस्य अर्थः। तथा हि 'यजति' इत्यादौ 'यागं करोति', 'यागं भावयति' इति विवरणं दृश्यते। यजिधात्वर्थः यागः इति घञन्तपदेन विवृतः। तिबर्थः करोतिना विवृतः।

तेन करोतिसमानार्थकत्वम् आख्यातस्य इति ज्ञायते। आख्यातकृञोः अर्थः भावना। अतः भावना प्रत्ययार्थः। अन्योत्पादानुकूलः व्यापार: भावयतेः अर्थः।

अत्र भट्टसोमेश्वरस्य मतम्, भावना नाम स्वर्गं प्राप्तुम् इच्छयोत्पन्नयागविषयकः यत्नः भावना। धात्वर्थयागाद्यतिरिक्तः धात्वर्थयागादिजनक: पुरुषनिष्ठः प्रयत्नः भावना। 'यजेत' इति श्रवणानन्तरं 'यागे यतेत' इति प्रतीतिः भवति। अतः सः यत्नः आख्यातार्थः। अत्र भावनापदेन अर्थभावना अभिप्रेता। कृतिः, यत्नः, प्रवृत्तिः, प्रयत्नः, अर्थभावना इति पर्यायपदानि।

यः स्वप्रयत्नेन गच्छति तदा 'देवदत्तः गमनं करोति' इति करोतेः प्रयोगः क्रियते। यत्नपूर्वकम् अक्रियमाणे, वायुना स्पन्दमाने 'नायं करोति, अपि तु वातादिना अस्य स्पन्दः जायते' इति प्रयोग: दृश्यते। तेन करोतेः अर्थः यत्नः इति ज्ञायते। करोतिसमानाधिकरणम् आख्यातम् अपि तदर्थकमेव भवति।

तदुपरि प्रश्नः यत्नाभावस्थले आख्यातस्य प्रयोगः न कार्यः। यतः आख्यातार्थः यत्नः। परं 'रथो गच्छति' इति प्रयोगः दृश्यते। 'गच्छति' इति पदस्य 'गमनं करोति' इति विवरणम्। अत्र आख्यातार्थः यत्नः करोतिना विवृतः। परं रथे प्रयत्नः कोऽपि न भवति। अतः कथम् अयं प्रयोगः इति। रथे योजिताश्वानां यत्नं रथे आरोप्य एतादृशः प्रयोगः क्रियमाणः वर्तते।

यस्मिन् मते अन्योत्पत्तिजनकं व्यापारसामान्यं भवना, तत्रापि रथे पूर्वदेशनिवृत्तिपूर्वकोत्तरदेशसंयोगानुकूलव्यापारातिरिक्तः व्यापारः न कोऽपि भवति। परम् आख्यातस्य प्रयोगः तु क्रियते। अतः तन्मतेपि ‘रथो गच्छति' इति प्रयोगः अस्मन्मतवत् औपचारिकः एव। न तु मुख्यः। अतश्च यत्नः एव आर्थी भावना। उक्तं न्यायसुधायाम् - ‘प्रयत्नव्यतिरिक्तार्थी भावना तु न शक्यते।
वक्तुमाख्यातवाच्येह प्रस्तुतेत्युपरम्यते॥' इति।

आख्यातबोध्यस्य प्रयत्नस्य अपेक्षया अतिरिक्ता आर्थी भावना वक्तुं न शक्यते। यतः प्रयत्नः एव आर्थी भावना।

पार्थसारथिमिश्राः तु, भवितुः- उत्पद्यमानस्य स्वर्गादिफलस्य, भवनानुकूल: उत्पत्त्यनुकूलः, भावकस्य उत्पादयितुः पुरुषस्य आत्मनिष्ठः व्यापारविशेषः अर्थभावना इति स्वीकुर्वन्ति। धात्वर्थादिरूपं करणं यादृशव्यापारे

व्यापृतं सत् फलोत्पादनाय शक्तं भवति, तादृशः व्यापारः आख्यातवाच्यः यः सः भवति भावना। सः व्यापारः आख्यातेन सामान्याकारेण प्रतीयते। 'कुठारेण छिनत्ति' इति वाक्यं श्रुत्वा एतादृशं ज्ञानं भवति, यादृशव्यापाराविष्ठकुठारेण छेदनं भवति, कुठारेण तादृशव्यापारवता भाव्यम् इति लोके अयं व्यापारः उद्यमननिपातनादिः।

एवमेव वेदेऽपि 'यजेत स्वर्गकाम:' इति वाक्यं श्रुत्वा यागेन तादृशव्यापारवता भाव्यम्, यद्व्यापाराविष्ठः यागः फलजनने समर्थः स्यात्। वेदे अयं व्यापारः अग्नेः अन्वाधानादारभ्य ब्राह्मणतर्पणपर्यन्तं भवति। इतिकर्तव्यताकाङ्क्षायाम् अयं व्यापारः उद्यमनान्वाधानादिविशेषरूपेण प्रतीयते। 'यजेत' इत्यत्र 'यज' इति धातुः 'तिप्' इति प्रत्ययः च वर्तते। यजिधातोः यागः अर्थः। यागः नाम देवतोद्देशेन द्रव्यत्यागरूपः व्यापारः। धात्वर्थयागानुकूलः अन्वाधानादिब्राह्मणतर्पणपर्यन्तः व्यापार: आख्यातार्थः। आख्यातेन आदौ अन्वाधानादिरूपेण विशेषाकारेण व्यापारः न उपस्थाप्यते। अपि तु अन्योत्पादनानुकूलत्वेन रूपेण। अर्थात् सामान्याकारेण व्यापारः उपस्थाप्यते। व्यापारविशेषाकाङ्क्षायां तत्तत् प्रकरणे पठितैः अङ्गविधिभिः अन्वाधानादि: ज्ञाप्यते।

आख्यातार्थः यत्नः इति वदतां मतेऽपि अन्यस्य उत्पादनानुकूलत्वेनैव रूपेण यत्नः आख्यातार्थः इति स्वीक्रियते। 'रथो ग्रामं गच्छति' इत्यादि- कर्तुः यत्नाभावस्थले अर्थात् अचेतनकर्तृकस्थले आख्यातप्रत्ययः ग्रामप्राप्त्यनुकूलं व्यापारं बोधयति। यादृशे व्यापारे कृते रथः गमनेन ग्रामं प्राप्नोति तादृशव्यापारेण रथः आविष्टः स्यात्। गच्छति इत्यत्र गमनं 'धात्वर्थः। व्यापारः आख्यातार्थः। कः सः व्यापारः इत्यपेक्षायां 'रथः पूर्वदेशं त्यक्त्वा उत्तरप्रदेशे संयुज्य रथः ग्रामं गच्छति' इति प्रयोगात् पूर्वदेशनिवृत्तिपूर्वकोत्तदेशसंयोगानुकूलः व्यापारः इति अनन्तरं ज्ञायते। अत्र पूर्वोक्तः एव दृष्टान्तः परिग्राह्यः। यथा 'कुठारेण छिन्द्यात्', 'यजेत' इत्यादिचेतनकर्तृकस्थले आख्यातार्थः व्यापारः एव प्रतीयते, तथैव अचेतनकर्तृकस्थलेऽपि। एवं 'देवदत्तः प्रयतते' इत्यादौ येन व्यापारेण प्रयत्नो भवति तथा देवदत्तेन व्याप्रियेत। प्रकृते आख्यातार्थः प्रयत्नानुकूलः व्यापारः। यत्नः धात्त्वर्थः। आख्यातार्थः अन्योत्पादनानुकूलव्यापारः। व्यापारविशेषः कः इति अपेक्षायाम् इच्छा इत्यादिः पश्चात् विज्ञायते।

तथा च ‘रथो गच्छति' इत्याद्यचेतकर्तृकस्थले एवं 'यजेत' इत्यादि-चेतनकर्तृकस्थले इति सर्वत्र अन्योत्पत्त्यनुकूलव्यापारसामान्यम् अनुगतम् इति अन्योत्पत्त्यनुकूलव्यापारसामान्यम् एव आख्यातस्य अर्थः। न तु भट्टसोमेश्वरस्य मतवत् प्रयत्नः आख्यातार्थः। यतः 'रथो गच्छति', ‘देवदत्तः यतते’ इत्यादौ आख्यातपदं श्रूयते। परं गमकर्तरि रथे यत्नः न भवति। एवं यत्नजनकः यत्नः न भवति। अतः अत्र आख्यातार्थः यत्नः इति वक्तुं न शक्यते। प्रकृते व्यापारस्तु भवत्येव। आख्यातस्य यत्नार्थकत्वं स्वीकृत्य अश्वगतं यत्नं रथे आरोप्य 'रथो गच्छति' इत्यादिना औपचारिकत्वं न वक्तव्यम्। यतः व्यापाररूपे अर्थे स्वीक्रियमाणे मुख्यः एव प्रयोगः सम्भवति। यत्र मुख्यया वृत्त्या प्रयोगः सम्भवति, तत्र औपचारिकः प्रयोगः अनुचितः। 'देवदत्तः गमनं करोति' इत्यादौ करोतेः अर्थः अन्योत्पादानुकूलः व्यापारः एव। न तु चेतनमात्रे विद्यमानः यत्नः। ‘देवदत्तः गमनं करोति', 'रथः गमनं करोति' इत्यादौ कृञः चेतनाचेतनकर्तृकस्थले समानतया प्रयोगात् अन्योत्पादानुकूलः व्यापारः एव करोतेः अर्थः। एवं च अनेन सिद्धमिदं यत्, आर्थी भावना नाम अन्योत्पादानुकूलः व्यापारः इति।

**अर्थभावनायाः अंशत्रयम्**

सा च अर्थभावना भावनासामान्यादेव 'साध्यम्', 'साधनम्', 'इतिकर्तव्यता' इति अंशत्रयम् इच्छति। अस्यैव अंशत्रयस्य 'किम्', 'केन', 'कथम्' इति आकारः।

एवं च यत्किञ्चित् फलिका, यत्किञ्चित्करणिका, यत्किञ्चिदितिकर्तव्यताका अर्थभावना इति सामान्याकारेण बोधः।




अर्थभावनायाः साध्याकाङ्क्षायां स्वर्गादिफलं भाव्यत्वेन अन्वेति। अर्थभावनायाः करणाकाङ्क्षायां धात्वर्थयागादिः साधनत्वेनान्वेति। इतिकर्तव्यताकाङ्क्षायां प्रकरण-पठितानि अङ्गानि प्रयाजादीनि अन्वयं प्राप्नुवन्ति।

तेन स्वर्गादिफलभाव्यिका, धात्वर्थादिकरणिका, प्रयाजाद्यङ्गकरणिका अर्थभावना इति बोधः।

**भावनायाः मुख्यविशेष्यत्वम्**

सा च भावना मुख्यविशेष्यभूता। प्रकृत्यर्थप्रत्ययार्थयोः मध्ये प्रत्ययार्थः प्रधानः भवति, प्रकृतिप्रत्ययौ प्रत्ययार्थं सहब्रूतः तयोस्तु प्रत्ययः प्राधान्येन इति स्मरणात्। आख्यातार्थेषु बहुषु सत्सु, भावः नाम भावना प्रधानम्, भावप्रधानम् आख्यातम् इति स्मरणात्। 'देवदत्तः ओदनं पचति' इत्यत्र 'देवदत्तकर्तृका ओदनकर्मिका पाकानुकूला भावना' इति शाब्दबोधः।

| देवदत्तः | ओदनं | पचति |
|---|---|---|
| देवदत्त + सु | ओदन + अम् | पच् + त |
| कर्ता | कर्म | क्रिया - कृतिः |
| देवदत्तकर्तृका | ओदनकर्मिका | पाकानुकूला भावना |

एवं च यागादिः 'यजेत' इत्यादिना स्वर्गादिफलोद्देशेन वेदेन विहितः। यागादेः फलमुद्दिश्य वेदेन विहितत्वात् धर्मत्वम्।

**परिशीलितग्रन्थाः**

- मीमांसान्यायप्रकाशः - आपदेवः
- अर्थसंग्रहः - लौगाक्षिभास्करः
- भाट्टकौस्तुभः - खण्डदेवः
- भाट्टरहस्यम् – खण्डदेवः

❖❖❖

# कर्मणा यमभिप्रैति स सम्प्रदानमिति सूत्रार्थविचारः

**डॉ.अजयकुमारदाशः**

**कूटशब्दाः**

सम्प्रदानम्, चतुर्थी, विषाय, गां, ददाति, पत्यै, शेते, अन्वर्थसंज्ञा, सन्दर्शनम्, प्रार्थना, अध्यवसायः।

**शोधसारः**

कर्मणा यमभिप्रैति स सम्प्रदानम्[1] इति सूत्रेण पाणिनिना सम्प्रदानसंज्ञा विहिता। दानस्य कर्मणा करणभूतेन यमभिप्रैति[2] सः सम्पदानसंज्ञः स्यादिति सूत्रार्थः। तस्यायमर्थः- कर्ता, स्वनिष्ठक्रियाकर्मणा यमभिप्रैति सः सम्प्रदानसंज्ञको भवति इति। राजा विप्राय गां ददाति इत्यादीनि उदाहरणानि। अत्र कर्ता राजा, स्वनिष्ठदानक्रियाकर्मणा गवा= गोसंबन्धनजन्यसुखेन विप्रं सम्बन्धुमिच्छति। अतो विप्रस्य प्रकृतसूत्रेण सम्प्रदानसंज्ञा भवति। तद्वाचकात् चतुर्थी सम्प्रदाने[3] इति सूत्रेण चतुर्थीविभक्तौ राजा विप्राय गां ददातीत्यादीनि वाक्यानि साधूनि भवन्ति। विप्राय गां ददातीत्यत्र एककालावच्छेदेन= एकस्मिन्नेव काले गोः कर्मत्वं करणत्वं च कथमिति न शङ्कनीयम्। क्रियाभेदेनाविरोधात्। विप्राय गां ददाति इत्यत्र दानक्रियायां कर्म भवति गौः। अभिप्रयणक्रियायां करणम्। दीयमानया हि गवा राजा विप्रमभिप्रैति। अतः पूर्वोक्तशङ्का नास्ति। प्रयोगभूमौ इदं सम्प्रदानं त्रिविधम्। तथाहि-

अनिराकरणात् कर्तुस्त्यागाङ्गं कर्मणेप्सितम्।
प्रेरणानुमितिभ्यां च लभते सम्प्रदानताम् ॥

इति वाक्यपदीयाद् अनिराकर्तृ-प्रेरयितृ-अनुमन्तृ इति भावेन त्रिविधम्। सूर्याय अर्घ्यं ददाति इत्याद्योदाहरणम्। अत्र सूर्यो न प्रार्थ्यते, नानुमन्यते न निराकरोति च। द्वितीयं विप्राय गां ददाति इति। कश्चन धनिको गोदानं करोतीति श्रुत्वा ब्राह्मणो मह्यं कुटुम्बपोषणार्थं देहि इति धनिकम् प्रेरयति। एवम् प्रेरयित्रे ब्राह्मणाय गां

---

[1] अष्टाध्यायी (1.4.32)

[2] सम्बन्धुमिच्छति, प्रेप्सति, कर्मसम्बन्धजन्यसुखदुःखादिरूपफलभाक्त्वेन उद्दिशति।

[3] अष्टाध्यायी (2.3.13)

ददातीत्यर्थः। तृतीयस्योदाहरणम्- उपाध्यायाय गां ददाति। उपाध्यायो न प्रेरयति न निराकरोति अपि तु एवमस्तु इत्यनुमन्यते इत्यर्थः।

**अत्र प्राचीनाः-**

अत्र सूत्रे टि-घु-भप्रभृतिसंज्ञावल्लघुसंज्ञामकृत्वा सम्प्रदानमीति महासंज्ञाकरणात् सम्प्रदीयते अस्मै= सम्प्रदानमित्यन्वर्थसंज्ञाश्रयणीया। तेन यत्र दानार्थको धातुः प्रयुज्यते, यत्र च स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनं प्रतीयते, तत्रैव सम्प्रदानसंज्ञा भवति। तेन चैत्रः अजां ग्रामं नयति इत्यर्थे चैत्रो ग्रामाय अजां नयति इति न भवति, दानार्थकधातोः प्रयोगाभावात्। रजकस्य वस्त्रं ददाति[4] इत्यर्थे रजकाय वस्त्रं ददातीति च न भवति, दा धातोः प्रत्यर्पणपर्यन्तोपयोगि-परस्वत्वापादनार्थकत्वसत्त्वेऽपि स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनार्थकत्वाभावादिति। अत एव काशिकाकृता कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रम्- कर्मणा करणभूतेन कर्ता यमभिप्रैति तत्कारकं सम्प्रदानसंज्ञकं भवति। अन्वर्थसंज्ञाविज्ञानाद् ददातिकर्मणा इति विज्ञायते, यथा- उपाध्यायाय गां ददाति, माणवकाय भिक्षां ददाति। इति व्याख्यातम्।

कैयटदायस्तु भाष्यकारेण अत्र अन्वर्थसंज्ञायाः अनाश्रयणाद्, भाष्यानुक्तयोगविभागाश्रयणं महासंज्ञाकरणलभ्यार्थाद्याश्रयणं चेत्यादिकम् अयुक्तम् इति वैयाकरणसम्प्रदायात्, खण्डिकोपाध्यायः[5] शिष्याय चपेटां ददातीत्यादि भाष्यप्रयोगाच्च[6] एतन्मतं न सहन्ते। अतो दानार्थकधातुप्रयोगाभावेऽपि स्वस्वत्वनिवृत्तिरूपार्थस्याप्रतीतावपि धात्वर्थक्रियाकर्ता स्वनिष्ठक्रियाकर्मजन्य-फलभागित्वेन यं विवक्षति तस्य सम्प्रदानसंज्ञा भवत्येव। तेन रजकाय वस्त्रं ददाति इत्यपि भवति। चैत्रः अजां ग्रामं नयति इत्यादौ तु अजासंयोगजन्यसुखभागित्वं ग्रामे नास्ति, ग्रामस्याचेतनत्वेन सुखभागित्वाभावात्। तथापि, यदि तथा विवक्ष्यते तदा सम्प्रदानसंज्ञा भवत्येव। एवं वृक्षाय जलं सिञ्चति इत्यादिप्रयोगाणाम्, तद् आचक्ष्वासुरेन्द्राय स च युक्तं करोतु यत् इत्याद्यार्षप्रयोगाणां च प्रकृतसूत्रेणैव साधुत्वं सिध्यति, इति तेषामाशयः।

---

[4] अत्र दाधातोः प्रत्यर्पणपर्यन्तम् आधीनिकरणमेव अर्थः, न तु स्वस्वत्वनिवृत्ति-पूर्वकपरस्वत्वापादनम् एतदर्थत्वे तु सम्प्रदानसंज्ञा भवत्येव।

[5] उदात्ते कर्तव्ये अनुदात्तं करोति खण्डिकोपध्यायः (अथर्ववेदस्योपाध्यायः) तस्मै चपेटा ददाति अन्यत्वं करोषि इति महाभाष्यम् इति उद्योतपरिवृत्तप्रदीपप्रकाशितमहाभाष्यम्। पृ.170।

[6] अष्टाध्यायी (1.4.32)

एवं स्थिते पत्ये शेते इत्यत्र शीङ् धातोरकर्मकत्वात् प्रकृतसूत्रेण सम्प्रदानसंज्ञा न सिद्ध्यतीति कृत्वा क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्[7] इति वार्तिकमारब्धम्।

**प्रकृतवार्तिकावश्यकता-**

अत्र कर्मशब्देन कर्तुरीप्सिततमं कर्म[8] इति सूत्रबोधितकर्मसंज्ञकस्यैव ग्रहणम्, न तु क्रियायाः, क्रियायाः कृत्रिमकर्मत्वाभावात् कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः इति न्यायात्। अतः सकर्मकधातुस्थले कर्मसम्बन्धजन्य-फलभागित्वेन विवक्षितस्य सूत्रेण सम्प्रदानत्वे सिद्धेऽपि अकर्मकधातुस्थले कर्मण एवं अभावात् कर्मसम्बन्धजन्यफलभागित्वेन कस्यापि विवक्षितुमशक्यत्वात् श्राद्धाय निगर्हते[9] इत्यादिषु अकर्मकधातुघटितवाक्येषु क्रियामात्रेण अभिप्रेयमाणानां श्राद्ध-युद्ध-पत्यादीनां सूत्रेण सम्प्रदानसंज्ञा कथं सिध्यति इति चेत्। अत्र सूत्रसिद्धिं मत्वा तत्र सम्प्रदानसंज्ञासिद्ध्यर्थं वार्तिककारः क्रियाग्रहणम् इति वार्तिकम्[10] आरचितवान्। कर्ता न केवलं स्वक्रियाकर्मणा स्वक्रियाकर्मसम्बन्धजन्यफलेन ये सम्बन्धुमिच्छति सः अपि तु स्वनिष्ठक्रियया ये सम्बन्धुमिच्छति सोऽपि सम्प्रदानसंज्ञको भवति इति वक्तव्यम्। श्राद्धाय निगर्हते नास्तिकः इत्यादी कर्ता स्वनिष्ठगर्हणक्रियया श्राद्धम्, राजा युद्धाय सन्नह्यते इत्यादी कर्ता स्वनिष्ठसन्नहनक्रियया युद्धम्, पत्ये शेते भार्या इत्यादी कर्ता स्वनिष्ठशयनक्रियया पतिं च सम्बन्धुमिच्छति इति कृत्वा तत्तत्क्रियोद्देश्यस्यापि प्रकृतवार्तिकन सम्प्रदानसंज्ञा, तद्वाचकेभ्यश्चतुर्थी च सिध्यति इति। तथा च एतद्वार्तिकरीत्या पत्ये शेते इत्यादितः पतिसम्प्रदानकम् पत्युद्देश्यकं पत्नीकर्तृकं शयनमिति बोधो भवति।

यदि पत्ये शेते इत्यादौ क्रियया अभिप्रेयमाणस्यापि सम्प्रदानसंज्ञा भवति, तर्हि चैत्रः कटं करोति इत्यादावपि उत्पादनादिक्रिययाभिप्रेयमाणस्य कटादेरपि सम्प्रदानसंज्ञा स्यात्। न च कर्मसंज्ञायाः विधानवैयर्थ्यम्, कर्मसंज्ञासंप्रदानसंज्ञयोः पर्यायतया प्रवृत्ती वैयर्थ्यविरहाद् इति न च वाच्यम्, अस्य वार्तिकस्य

---

[7] क्रियाग्रहणं कर्तव्यमिति काशिकायामति, सिद्धी क्रिया यम सोऽपि सम्प्रदानमित्यस्ति।) (1.4.32 वा. 1)

[8] वृद्धिरादैच् (1.1.1) सूत्रे भेदकत्वात्स्वरस्येति वार्तिकभाष्ये अयं प्रयोगोऽस्ति।

[9] अष्टाध्यायी (1.4.32)

[10] अष्टाध्यायी (1.4.49)

असार्वत्रिकत्वात्, प्रयोगदर्शनवशेन वार्तिकस्यास्य नियतविषयत्वं स्वीक्रियते, तेन चैत्रः कटं करोति इत्यादौ नातिप्रसङ्गः इति भावः। केचित्तु पत्ये शेते इत्याद्यकर्मकस्थले सावकाशायाः सम्प्रदानसंज्ञायाः निरवकाशया कर्मसंज्ञया सकर्मकप्रयोगस्थले बाधितत्वात् नैव अनिष्टप्रसक्तिः इति वदन्ति।

**अत्र भाष्यप्रमाणम्**

कर्मणा यमभिप्रेति स सम्प्रदानम् इति सूत्रे भाष्ये एवं वर्तते।[11] सन्दर्शनं फलविषयः संकल्पः[12] तत् प्रार्थनायां फलोपायविषये अभिलाषे[13] साधनत्वाय कल्पते = साधनं भवति। व्यवसाय: = क्रियाविशेषस्य फलसाधनत्वेन निश्चयः[14] तत्र अनन्तरा=अव्यवहितपूर्वमुक्ता प्रार्थना, साधनम्, अभिलाषे सति निश्चयकरणात्। व्यवसायश्च, आरम्भे मानस्यां प्रवृत्तौ[15] क्रियाविशेषे मनसा प्रवृत्त्यनन्तरं चैत्रः शरीरेण फूत्काराधस्संतापनादिक्रियासु प्रवर्तते। साधनम्। तेन च आप्यमानत्वेन प्रकृतक्रिया शयनादिक्रिया कर्मत्वं लभते पूर्वस्मिन् पूर्वकाले या क्रिया, सा परस्मिन् उत्तरकालभाविन्यां क्रियायाम्, साधनम्, स्वापेक्षया सिद्धस्यैव = तत्साधनत्वात् सन्दर्शनं तु क्रियया असाध्यं कष्टकरञ्च,

[11] श्राद्धं निन्दति नास्तिकः। युद्धाय सन्नह्यते राजा युद्धं कर्तुं सज्जीभवति। पत्ये शेते पतिमुद्दिश्य शयनं करोति।

[12] क्रियाग्रहणं कर्तव्यम् इति वार्तानुपूर्वीकाशिकायामस्ति सिद्धान्तकौमुद्यां तु क्रियया यमभिप्रैति सोऽपि सम्प्रदानम् इति आनुपूर्व्यस्ति।

[13] कर्तरि कर्मव्यतिहारे (1.3.14) कर्मणा यमभिप्रति स सम्प्रदानम् (1.4.32) इति सूत्रयोर्भाष्ये प्रायशः एतादृशः एव ग्रन्थोऽस्ति।) क्रियाग्रहणमपि कर्तव्यम्। इहापि यथा स्यात् श्राद्धाय निगर्हते। युद्धाय सन्नह्यते। पत्ये शेते इति। तत्तर्हि वक्तव्यम् न वक्तव्यम्। कथम्? क्रियां हि नाम लोके कर्मेत्युपचरन्ति का क्रियां करिष्यति? किं कर्म करिष्यति इति। एवमपि कर्तव्यम्। कृत्रिमाऽकृत्रिमयोः कृत्रिमे सम्प्रत्ययो भवति क्रियाऽपि कृत्रिमं कर्म न सिध्यति। कर्तुरीप्सिततमं कर्म (1.4.49) इत्युच्यते, कथं च नाम क्रियया क्रिया ईप्सिततमा स्यात् क्रियापि क्रियया ईप्सिततमा भवति कया क्रियया? सन्दर्शनक्रियया वा प्रार्थयतिक्रियया वा अध्यवस्यतिक्रियया वा इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स बुद्ध्या तावत् कञ्चिदर्थं पश्यति, सदृष्टे प्रार्थना, प्रार्थनायाम् अध्यवसायः, अध्यवसाये आरम्भः, आरम्भे निर्वृत्तिः निर्वृत्ती फलावाप्तिः। एवं क्रियाऽपि कृत्रिमं कर्म' इति।

[14] यथा चैत्रः तण्डुलं पचति इत्यादौ विक्लित्ति शुनिवृत्त्यादिकं फलं प्रथमतो जानाति चैत्रः, तदेव सदर्शनम्।

[15] फलज्ञानानन्तरं चैत्रः तत्प्राप्तये उपायः कः? इति अन्विच्छति, एषैव प्रार्थना। एतत्प्रार्थनानन्तरम् उपायम् अन्विष्य चैत्रः फूत्काराधस्संतापनादिक्रियाविशेषः तत्फलप्राप्तये उपायः इति ज्ञाप्या तमुपायम् अनुष्ठातुं निश्चिनोति स एव व्यवसाय: अध्यवसायः इत्युच्यते। क्रियाविशेष फलसाधनत्वेन निश्चित्य चैत्रः तत्र क्रियाविशेषे मनसा प्रवर्तते स एव आरम्भः।

फलाभिलाषयोग्यताविशिष्टचैतन्यस्यैव तत्साधनत्वादिति। एवं च कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रेणैव पत्ये शेते इत्यादिषु सम्प्रदानसंज्ञा सिध्यति। तदर्थं क्रियाग्रहणमिति अपूर्ववार्तिकं नैव कर्तव्यमिति प्रत्याख्यानभाष्य-तद्व्याख्यातृग्रन्थाशयः।

**क्रियाग्रहणम् इति वार्तिकमावश्यकं नवेति विचारः-**

शयन- चनादिक्रियासु सर्वत्र अव्यभिचारेण सन्दर्शनज्ञाने प्रार्थना इच्छा, अध्यवसायः=व्यवसायः निश्चयः, आरम्भः= मानसिकी प्रवृत्तिः शारीरिकचेष्टा रूपाः क्रियाः प्रतीयन्ते। तत्र प्रथमतः शयनादिषु सन्दर्शनं शयनादिविषयकं ज्ञानं भवति, ततः शयनादिविषयिणी इच्छा, ततश्शयनादिविषयको निश्चयः, ततश्शयनादिविषयिणी मानसिकी प्रवृत्तिः, ततश्शरीरेण शयनादिक्रियायाः निर्वर्तनं भवति इति स्थितिः। तथा च पूर्वपूर्वा क्रिया सिद्धा सती उत्तरोत्तरक्रियायाः साधने भवति, पूर्वपूर्वक्रियायाः उत्तरोत्तरक्रिया साध्या भवति। अर्थात्, सन्दर्शनस्य फलं प्रार्थना, प्रार्थनायाः फलं व्यवसायः, व्यवसायस्य फलम् आरम्भः, आरम्भस्य फलं शरीरिकचेष्टा। तथा च शारीरिकचेष्टारूपं शयनं सन्दर्शनादिव्यवसायान्तव्यापार-जन्यस्यारम्भरूपस्य फलस्याश्रयः। एवं व्यापारजन्यस्य फलस्य आश्रयत्वात् कर्तुरीप्सिततमं कर्म इति सूत्रेण शयनादेः कर्मसंज्ञा भवति। संदर्शनादि-आरम्भान्तव्यापाराः प्रकृत'शीङ्'प्रभृतिधातुवाच्या न भवन्ति, कथं तद्व्यापारानादाय शयनादेः कर्मसंज्ञा भवति? इति न च वाच्यम्, तेषां प्रकृतधातुवाच्यत्वाभावेऽपि अव्यभिचारेण गम्यमानत्वात् गम्यमानापि क्रिया कारकविभक्तीनां प्रयोजिका इत्यङ्गीकृतत्वेन प्रतीयमानसंदर्शनादिक्रियापेक्षया शयनादेः कृत्रिमकर्मत्वे बाधकाभावात्। किं च, अनेकार्था हि धातवः इति न्यायेन क्वचित् शीङ्-प्रभृतिधातूनां शयनादिपूर्वके आरम्भादिसन्दर्शनान्तव्यापारे वृत्तिस्वीकारे सन्दर्शनादीनां प्रकृतधातुवाच्यत्वस्य अव्याहतत्वाच्च। तथा च शयनादीनां सन्दर्शनाद्यपेक्षया कर्मत्वेन पत्यै शेते इत्यादौ कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रेणैव सम्प्रदानत्वे सिद्धे तदर्थं क्रियाग्रहणमिति वार्तिकं नैवापेक्षितमिति। एतत् प्रत्याख्यान-भाष्यादिरीत्या पतिसम्प्रदानकम्= पत्युद्देश्यकम्, अध्यवसायजन्यफलरूपा-

रम्भणाश्रयभूतं सन्दर्शनं, प्रार्थना, अध्यवसाय, आरम्भणक्रियाकर्मभूतपत्नीकर्तृकं शयनमिति बोधो भवति।

**उपसंहारः**

कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रे क्रियाग्रहणम् भाष्ये प्रत्याख्यातत्वादिति दीक्षितादीनां मतमित्यलम्।

**सन्दर्भितग्रन्थसूची**


- वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा बोधिनीसहिता), प्रथमो भागः, मोतीलाल।
- लघुशब्देन्दुशेखरः (गुरुप्रसादसहितः विधकलापरिषद्, विशाखापट्टणम्, 1970.
- लघुशब्देन्दुशेखरः (चन्द्रकलासहितः) जयकृष्णदास हरिदासगुणः, बनारस सिटी, 1983.
- महाभाष्यम्(उद्योतपरिवृत्तदीपप्रकाशितमहाभाष्यम्) चौखम्बासंस्कृतप्रतिष्ठान, दिल्ली, 1990.
- काशिकावृत्तिः न्यासापरपर्यायकारिकाविवरणपञ्जिकया, पदमञ्जरीव्याख्यया च सहिता प्राप्य भारत प्रकाशन, वारणासी,1965.
- प्रौढमनोरमा (सटीक टिप्पणशब्दरत्नसहिता) जयकृष्णदास हरिदास गुप्तः, चौखम्बा संस्कृत सिरीज्' आफीस्, बनारस सिटी, 1939.
- वैयाकरणभूषणसारः, टिप्पणीसहितः, श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरूपतिः, 2021.


❖❖❖

# संस्कृतान्ध्रवसुचरित्रयोः संस्कृतपदानामनुकरणम्

डा. जे. बलिचक्रवर्ती

**संस्कृतान्ध्रवसुचरित्रयोः अनुवादपरिशीलनम्**

वसवः देवयोनिषु पठिताः अष्टौ वसवः इति पुराणेषु दृश्यते। किन्तु अस्य काव्यस्य कथानायकः मनुष्यः एव चेदिदेशाधिपः वसुनामकः। पुराणेषु मानवयोधाः अपि देवासुरसंग्रामेषु महेन्द्रस्य सहायकाः भवन्ति इति विषयः प्रसिद्धः एव। चेदिदेशस्य राजा नाम्ना वसुः तथा इन्द्रस्य सखाभूत्। इन्द्रोऽपि तस्मै प्रीतः दिव्यं विमानं वेणुयष्टिं च दत्तवान्। ततः आकाशगामित्वात् अयं राजा उपरिचरः इति प्रसिद्धः। उपरिचरवसोः चरित्रं व्यवहारे वसुचरित्रम् अभूत्। उपरिचरवसोः कथा महाभारते आदिपर्वणि, शान्तिपर्वणि च दृश्यते। आन्ध्रवसुचरित्रप्रबन्धे गृहीता कथा आदिपर्वणि वर्तते।

**संस्कृतवसुचरित्रम् – कर्तुः परिचयः**

संस्कृतवसुचरित्रकाव्यं प्रथमतः आचार्यबिरुदराजुरामराजेन लब्धं संशोधितं प्रकाशितं च। अस्य रचयिता कालहस्ति-कविः कदा आसीत् इत्यत्र सन्देहास्पदविषयाः बहवो वर्तन्ते। वसुचरित्र-अनुबादकरणात् रामराजभूषणस्य समकालिकः अनन्तरवर्ती वा भवेत्। यद्यपि आमुक्तमाल्यदादि-प्रबन्धानां अनुवादकाः अत्यन्तम् अर्वाचीनाः तथापि वसुचरित्रानुवादः भट्टमूर्तिः समकालिकः एवेति रामराजः निश्चित्य उक्तवान्। वसुचरित्रस्य संस्कृतानुवादः प्रथमं पुष्पाञ्जलिः इति शीर्षिकायाम् आन्ध्रपत्रिकायाम् उगादि-सञ्चिकायां 1917तमे वत्सरे प्रकाशितम्। M.R.कविनामकः काव्यस्यास्य परिचयं कालहस्तिकवेः कालादिकं च तत्र निवेदितवान्।

काञ्चिकामाक्षीदेव्याः भक्तः अप्पय्यदीक्षितः कालहस्तिकवेः प्रशंसामपि करोति। अप्पय्यदीक्षितस्य कालः A.D. 1554-1626। अप्पय्यदीक्षितः शैवः चन्द्रगिरिशासकस्य अलियरामरायस्य कनीयसः भ्रातुः वेङ्कटपातिरायस्य आस्थाने आसीत्। वेङ्कटपतिरायस्य शासनकालः 1586-

1614। कालहस्तिकविः रामराजभूषणात् विंशतिवर्षानन्तरवर्तीति रामराजः सिद्धान्तितवान्।

आन्ध्रभाषायां रेवूरि-अनन्तरायकृतम् उपाख्यानम् उपलब्धम्। तत्र रेवूरि-कालहस्तिकविः, तस्य पुत्रः लिङ्गकविः, लिङ्गकवेः पञ्चपुत्राः कालहस्तिकविः, अनन्तय्य, एकाम्रकविः गुरूवकविः, शिवानन्दकविः चेति। रेवूरिवंशे त्रयः कालहस्तिकविः इति नामकाः दृष्टाः। वेङ्कटपतिरायः तृतीयः आस्थाने गोविन्दय्यनामकं कविं सत्कृतवान्। स च कालहस्तिकविवंशजः। एवं चोक्कनाथनायकनामकस्य मधुराधिपतेः समकालिकः अपि अयं गोविन्दय्यः आसीत्। अप्पय्यदीक्षितेन श्रीकालहस्तिविलासनामकं काव्यं रचितम्।

अप्पय्यदीक्षितस्य शिष्यः कालहस्तिदीक्षितः संस्कृतवसुचरित्रकर्तुः कालहस्तिकवेः भिन्नः। तथापि कालहस्तिदीक्षितस्य समकालिकः एव ततोऽस्य कालः 1586-1614 प्रान्ते स्यादिति संस्कृतवसुचरित्रे पीठिकायां स्पष्टीकृतवान्। आंग्लभाषापीठिकायाः यथायथम् अनुवादोऽपि तैरेव कृतं संस्कृतवसुचरित्रं पीठिकायामपि प्रकाशितम्। रामराजैः सौलभ्यमेकमपि प्रकाशने निरूपितम्। संस्कृतश्लोकारम्भे स श्लोकः कस्य पद्यस्य आन्ध्रवसुचरित्रस्थस्य अनुवादः इति सूचितम्। एवं रामराजभूषणस्य काव्यं यथायथम् अनुद्यापि विषयम् अनुवादे न कुत्रचित् उक्तवान्। अपि च काव्यं स्वतन्त्रमिति वृद्धिं जनयितुं कृतयत्नः इव कविः लक्षितः इति B.R. रामराजः उदाहृतवान्।[16]

संस्कृतवसुचरित्रेऽपि आन्ध्रवसुचरित्रे इव आश्वासनाम्ना सर्गविभागो दृश्यते।

1. प्रथमाश्वासे – 118 श्लोकाः
2. द्वितीयाश्वासे – 212 श्लोकाः
3. तृतीयाश्वासे – 259 श्लोकाः
4. चतुर्थाश्वासे – 157 श्लोकाः
5. पञ्चमाश्वासे – 150 श्लोकाः

[16]वसुचरित्रम्(संस्कृतभाषायां)- पीठिका (आन्ध्रभाषायां) पृ.सं.- 14-21

6. षष्ठाश्वासे – 163 श्लोकाः

आहत्य – 1059 गद्यानि, श्लोकाः च वर्तन्ते। काव्यमिदं चम्पूकाव्यमिति रामराजस्याभिप्रायः।

**संस्कृतवसुचरितकथासारः**

कथा परिवृत्तिं विनैव सर्वेषु आश्वासेषु अनूदिता। किन्तु तत्र तत्र पद्यानां स्थानपरिवृत्तिः दृष्टा। यथा प्रथमाश्वासे आन्ध्रवसुचरित्रे श्रीरामस्तुतिरूपम् आशीर्वादरूपं च पद्यं मङ्गलाचरणे निबद्धम्।

श्री भूपुत्रि विवाहवेल निजमञ्जीराग्ररत्नस्वली
लाभिव्यक्तिवरांध्रिरेणु भवकन्यालीलयञ्चुन्मदिं
दा भाविंप शुभक्रमाकलनचेदद्रत्नमुंगप्प सी
ता भामापति प्रोवुतं दिरुमलेन्द्र श्रीमहारायनिन।[17]

अहल्या शिलारूपा रामपादरजसा मुक्ता पुनः स्त्री बभूवेति कथा लोके प्रसिद्धा। सीतारामयोः विवाहकाले रामपादरजसा सीतामञ्जीरे स्थिते रत्ने सीतामुखं प्रतिबिम्बितम् अभूत्। तां दृष्ट्वा रामः अन्यास्याः स्त्रियः शापविमुक्तिः अभूत्। सा स्त्री सीतायां शङ्कां जनयेदिति स्वपादेन तत् रत्नम् आच्छादितवान्। विवाहविधौ पादपीडनम् आचाररूपेण प्रसिद्धमेव। आशीःनमस्क्रियावस्तुनिर्देशो वापि तन्मुखं- काव्यादौ मङ्गलाचरणे निबद्धमिति आलङ्कारिकसमयः। रामराजभूषणः "श्रीरामपदारविन्द-भजनानन्दः" इति हेतोः रामस्तुतिं काव्यादौ निबद्धवान्। आशीः अपि स्तुतिः एव।

नमस्कारः तदाशीश्च सिद्धान्तोक्तिः पराक्रमः।
विभूतिः प्रार्थना चेति षड्विधं स्तोत्रलक्षणम्॥[18]

अनुवादकः कालहस्तिकविः शैवः। आदौ पूज्यो गणाधिपः इति शैवानामाचारः। अतः प्रथमं स्वाभीष्टदैवं गणेशं स्तुतवान्। ततः वसुचरित्रानुवादे आन्ध्रवसुचरित्रे कृतमेव गणाधिपस्तोत्रमनूदितवान्। तत्र

---

[17]वसुचरित्रमु- प्रथमाश्वासे – 1 पद्यम् – पृ.सं.- 1
[18]ताल्लपाक अन्नमाचार्यसंस्कृतसंकीर्तनानि –by . S.Dakshinarmurthy पृ-175

प्रथमा गणपतिस्तुतिः कवेः स्वतन्त्रश्लोकैः निर्मिता। विनायकः एव नारायणवत् त्रिविक्रमः इति स्वपद्ये स्तुतवान्। यथा-

कल्याणमावहतु नः करिराजवक्त्रो
ब्रह्माण्डपादकटको बलिसद्मपादः।
पायोधिबृन्दवमथुः परमेशभाग्यं
तारासमं हि सुमनस्तबकीकृतेन्दुः॥[19]

पुनः त्रिभिः श्लोकैः स्वीयान्येव पद्यानि रचितवान्। ततः भट्टमूर्तिः पद्यैरेव मङ्गलाचरणमनूदितम्। एवम् पीठिकायाम् एकविंशतिश्लोकाः वर्तन्ते। अनुवादे आन्ध्रकृतिपतेः तिरुमलरायवंशवर्णनात्मकानि पद्यानि कालहस्तिकविः न अनूदितवान्। पुनः श्लोकद्वयेन वसुचरितम् अहमेव काव्यरूपेण रचयामि इति भ्रान्तिं जनयितुमिव कथं प्रशंसां कृतवान्।

वसुप्रभुर्वासवदौत्यरीत्या कोलाहलाद्रीशकुगारिकायाः।
गीतोज्ज्वलाया गिरिकाभिधायाः कल्याणशालीति कथाऽस्तु पुण्या॥
कथामिमां कोमलगद्यपद्यैर्यथामनीषं रचयामि रम्याम्।
बुधावलीकर्णपुटेषु सेयं सुधा भवेदद्रिसुतामहिम्ना॥[20]

अनुवादे आन्ध्रपद्यानि अपि संस्कृतगद्यरूपेण तत्र तत्र अनूदितानि आन्ध्रछन्दांसि अपि सीसादीनि उपयुक्तानि। षट्सु आश्वासेष्वपि कथा तुल्यरूपा केचन स्वतन्त्र वर्णनात्मकाः श्लोकाः अपि तत्र तत्र दृश्यन्ते। एवं वसुचरित्रे आन्ध्रभाषायां दृष्टं सौन्दर्यं कालहस्तिकविना संस्कृतभाषायामपि अधिकांशेन सम्पादितम्।

आचार्य श्रीभाष्यं विजयसारथिः वसुचरित्रद्वये आश्वासद्वये दृष्टानि सार्धशतं पद्यानि तुलयित्वा कालहस्तिकवेः अनुवादयत्नं श्लाघितवान्। यत्र आन्ध्रकाव्यात् अनुवादः नीरसो दृष्टः तत्र निष्पक्षपातम् स्पष्टम् उक्तवान्। आन्ध्रवसुचरित्रम् विमर्शनम् इति विजयसारथिकृतं पुस्तकं 1965 वत्सरे रचितं पञ्चविंशति-

[19]वसुचरित्रम् – 1/1 श्लोकः, पृ. सं. – 1
[20]वसुचरित्रम् – 1/22,23 श्लोकः, पृ.सं.- 5

वर्षानन्तरं प्रकाशितं च। अतः तत्पद्यव्याख्यावसरे विजयसारथेः विमर्शोऽपि दर्शितः।

**अनुवादपरिशीलम्**

**क.संस्कृतपदानामनुकरणपरिशीलनम्**

रामराजभूषणेन प्रयुक्तान् संस्कृतसमासान् यथायथं ईषद् परिवृत्या वा कालहस्तिकविरपि गृहीतवान्। काव्यारम्भात् आरभ्यैव मङ्गलाचरणश्लोकेष्वेव एवं विधम् अनुसरणं दृश्यते। यथा गणपित वन्दने आन्ध्रभाषायाम् –

शादन्दाघट्टितराजताचलचलद्गौरीस्वयं ग्राहमु
गन्तुद्वेषिकिगूर्चि शैलजकुदद्वंगाझराचान्ति न
त्यन्तामोदमुमुन्नुगानिडिकुमाराग्रेसरुण्डे पितृ
स्वान्तम्बु ल्वेलयिंपजालुनिभराङ्क्रब्रशंसिंचेदन।[21]

क्रियायाः आश्लेषः सर्वेषाम् आह्लादं जनयति इति अनुभवसिद्धं वचः। गजाः पर्वतेषु वप्रक्रीडां कुर्वन्ति विनायकोऽपि गजमुखत्वात् कैलासे वप्रक्रीडां कृतवान्। तया क्रीडया कैलासः चलितोऽभूत्। भीताः स्त्रियः भयापनोदनार्थं पतिमालिङ्गन्त्येव। पर्वतचलनेन भीता गौरी महेश्वरम् आलिलिङ्ग। तेन आलिङ्गनेन ईश्वरः प्रीततरो बभूव। रामराजभूषणस्य भावमिमं कालहस्तिकविः शब्दैः सह अनूदितवान्। यथा संस्कृतभाषायाम्-

श्रीदन्तघट्टितशिवाश्रयशैवलोल
गौरीस्वयं ग्रहसुखं कलयन् स्मरारेः।
गङ्गाझरग्रसनतो जननीमुदं प्राक्
कुर्वन् करोतु कुतुकानि कुमारवर्यः॥[22]

दन्ताघट्टित इति समासस्य उपसर्गत्याग एव अनुवादे भेदः, अर्थस्तु न परिवृत्तः। इन्द्रवज्रापादे दीर्घः छन्दोभङ्गकारणमिति उपसर्गः परित्यक्तः। प्रियायाः स्वयं ग्रहेण सुखानुभवः माघकाव्यात् रामराजभूषणेन गृहीतः प्रतिभाति। यथा शिशुपालवधे-

---

[21]वसुचरित्रम् – 1/7 श्लोकः, पृ.सं.- 12
[22]वसुचरित्रम् – ½ श्लोकः, पृ.रसं.- 1

समुत्क्षिपन् यः पृथिवीभृतां वरं वरप्रदानस्य चकार शूलिनः।
त्रसत्तुषाराद्रिसुतासम्भ्रमस्वय इग्रहाश्लेषसुखेन निष्क्रयम्॥[23]

तथैव हनुमतस्तवने सीसपद्यस्य गद्यरूपेण अनुवादे कृतेपि सीसपद्यस्थाः संस्कृतशब्दाः गद्येऽपि गृहीताः। न केवलं श्लेषनिर्वहणाय शब्दानुकृतिः कृता इति प्रतिभाति। श्लोषभावेऽपि मूलस्थाः एव शब्दाः गृहीताः। यथा आन्ध्रभाषायाम्-

सी. तरुणार्कवलनोद्भूतिजूपेनेव्वाडुरुचुलचे फ्लमोहरुचुलचेत
नकलंकराममुद्रिकबूनेनेव्वाडुशयमुचेहुत्कशेशयमुचेत
मुन्नीरुबलवलंबुगदाटे नेव्वाडु जवमुचेगुणगणार्जवमुचेत
नक्षशिक्षा प्रौढिनलरारेनेव्वाडु रणमुचेनियमधारणामुचेत
ते. धरणि नेव्वाडु दानवद्विरददलन
विहृतिदनकेसरिकोशोरवृत्तिदेलिपे
नतनिमत्काव्यभव्यवागमृतघटन
मंजुलस्वान्तुहनुमन्तुमदिदलन्तु[24]

जातमात्राः हनुमान् उद्यन्त्यम् आदित्यं दृष्ट्वा तस्य कान्तिविशेषेण फलभ्रान्त्या सूर्यबिम्बं ग्रहीतुम् उत्प्लुतः इति कथा श्रीमद्रामायणे उत्तरकाण्डे दृष्टा। सुन्दरकाण्डे हनुमत्कृतं समुद्रलङ्घनं विस्तरेण वर्णितम्। रामोऽपि अभिज्ञानचिह्नमङ्गुलीयकं सीतायै दातुं हनुमतः हस्ते अर्पितवान् इति किष्किन्दकाण्डे स्पष्टम्। एवं सीतादर्शनान्तरम् अशोकवननाशकाले रावणपुत्रम् अक्षयकुमारं हनुनान् जघान। रामराजभूषणेन गृहीताः एताः हनुमत्कथाः एव अनुवादेऽपि गृहीताः। मूले पद्यमनुवादे गद्यरूपं वर्तते। गद्ये अधोरेखाङ्किताः शब्दाः अपि मूलात् विनापरिवृत्तिं गृहीताः। यथा –

"अथ निरतिशयशैशव एव यो महनीयो रुचिभिः फलमोहरुचिभिश्च तरुणतरणिकबललनसमुद्धतिं दर्शयामास, यो वा शये हृत्कुशेशये च रम्यराममुद्रिकामुवाह, यो वा जवेन गुणगजार्जवेन च पल्वलमिव पयोधिं ततार

[23]शिशुपालबधम्- 1/50 श्लोकः पृ.सं.- 19
[24]वसुचरित्रमु- प्रथमाश्वासे – 8 पद्यम्, पृ.सं.- 13

यो वा रणेन नियमधारणेन च महाक्षशिक्षाविचक्षणतय रराज, यो वा दानवद्विरददलनविहरणेन निजकेसरिकिशोलवृत्तिं प्रकटयामास तादृशमहितमहिमवन्तमन्तरङ्गे सन्ततं चिन्तयामि धीमन्तं मृदुस्वान्तं यशोवन्तं हनुमन्तम्।[25]"

द्वितीयाश्वासे उद्यानवनवर्णने आन्ध्रपद्यानुवादः मूलशब्दानुसारेण कृतोऽपि मूलवत् रसाभिव्यञ्जकः इति श्रीभाष्यं विजयसारथिवरेण्यः आक्षिप्तवान्। तत्र सीसस्य चत्वारः पादाः शार्दूलवृत्तेन अनुकृताः। गीतपद्यम् अनुष्टुभा अनूदितम् आन्ध्रभाषायां यथा-

सी. अच्चटि सानुलु रत्नरुचिरंबु लननेल वानिवंशमुलह्ल नीनुमणुलु द्रुममुलेल्लनु सुरागममुलौटरूदे नित्यसुरागमुलुतदीयांकुरमु लतलु संजीवनुलगावेयच्चट-वानितावुलुनतनुसंजीवनमुलु रसमुलेल्लनुसिद्धरसमुलौटेंत तत् प्रसवंबुलुनु सिद्धरससमुलच्चट्

ते नच्चटमणिचित्रभूमुलुनच्चटनमक
नमरुतरुवुलगुमुरुलुनचटितीव
लच्चटि पोंदम्मिकोलकुलु नभवुनिण्ट
नैन नादंटबलुविण्ट नैन गलवे[26]

संस्कृतभाषायाम्-

तत् प्रस्थामणिशोभिनो यदपि तद्वंशा मणीकारणं
तद्वृक्षेषु सुरागता खलु तदङ्कूरास्सुरागा यतः।
सञ्जीवन्यभिधा लताह्यतनुसञ्जीवप्रदास्तद्गुणाः
तस्मिन् यत्प्रसवेषु सिद्धरसता तस्माद्रसास्तादृशाः॥
तत्रत्यमणिसन्तानतरुवल्ली सरोवराः।
शरासेपि निवासेपि शांकरे सन्ति किंगिरौ॥[27]

[25]वसुचरित्रम् -1/13 वचनम्, पृ.सं.-3
[26]वसुचरित्रमु – द्वितीयाश्वासे- 5 पद्यम्, पृ.सं.- 149
[27]वसुचरित्तम्- 2/4 श्लोकः, पृ.सं.- 21

आचार्य विजयसारथिस्तु अनुवादे स्वारस्यं न दृष्टमिति पाठान्तरेण श्लोकेन भाव्यमिति परिवृत्तिमपि दर्शितवान्। मानवः मणिशोभिताः यतः तेषां वंशः एव मणीनां कारणमिति अनुवादे किन्तु मूले तेषां वंशः एव मणिप्रसूतेः कारणं ततः सानुषु मणिस्तितेः वर्णनं न करणीयमित्येव भावः साधीयान्। अतः श्लोकः एव भवति चेत् रम्यतरो भवति इति पाठान्तरं दर्शितवान्।

तत्प्रस्थेषु मणिप्रभाकिमुत यद्वंशामणीनाञ्जनिः
वर्ण्याऽगेषु सुरागतो किमुयदं कूरास्सुरागा यदि।
यद्गन्धोऽतनु जीवनो यदि लताकास्यान्त सञ्जीवनी
तस्मिन् यत्प्रसवेषु सिद्धरसता तेषामहो का कथा॥[28]

कालहस्तिकवेः पाठे कारणदर्शनात् मणिस्थित्यादि कार्यसमर्थनेन काव्यलिङ्गालङ्कारः। विजयसारथिमहोदयानां पाठे तद्वंशः एव मणीनाम् उत्पत्तेः कारणं तत्र मणिस्थितौ किं वक्तमिति कैमुत्यन्यायेन मणिस्थितिः समर्थनात् अर्थापत्तिः अलङ्कारः। कार्यकारणभावस्य श्लोकद्वये तुल्यत्वेपि मणिस्थित्यादीनां सुलभसम्पादनम् आचार्य पाठे मूलानुकूलम्।

## परिशीलितग्रन्थसूची


- वसुचरित्रम् (संस्कृतभाषायाम्), कालहस्तिकविः, संस्कृत अकाडमी, हैदराबाद-1994।
- वसुचरित्रम् (आन्ध्रभाषायाम्), वाविल्लरामस्वामीशास्त्रुल्लु एण्ड सन्स्, चेन्नपुरी-1952।
- शिशुपालबधम्, चौखाम्बा संस्कृत अकादेमी, वाराणसी, 1982।
- संस्कृतवसुचरित्रसमीक्षा, श्रीभाष्यं विजयसारथिः, कलाभवनम्, सैफावाद-1995।


❖❖❖

[28]संस्कृत वसुचरित्र समीक्षा-by S.B.V. Saradhi, pg.no.- 64

# पाणिनिव्याकरणपरम्परायां सिद्धान्तकौमुद्याः स्वरूपं महत्त्वञ्च

राजसीभट्टाचार्य्यः

**सारसंक्षेपः-** महर्षिः पाणिनिः अष्टाध्यायीग्रन्थं विरचितवान्। तस्मिन् अष्टाध्यायीग्रन्थे वैदिकविषयस्य लौकिकविषयस्य च सूत्राणि समुपलभ्यन्ते। अष्टाध्यायीग्रन्थे प्रायः चतुस्सहस्रसंख्यकानि सूत्राणि विद्यन्ते। परवर्त्तिकाले वार्त्तिककारः कात्यायनः वार्त्तिकानि रचितवान्। परवर्त्तिनि समये महर्षिः पतञ्जलिः अष्टाध्यायीग्रन्थस्योपरि वार्त्तिकोपरि च भाष्यं रचितवान्। तद् भाष्यं "महाभाष्यम्" इति नाम्ना अभिहितम्। अतः एतद् त्रिमुनिव्याकरणमस्ति। तथा चोक्तम् –

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम्।
पाणिनिं सूत्रकारञ्च प्रणतोऽस्मि मुनित्रयम्॥

पाणिनिव्याकरणे द्विविधा परम्परा अस्ति, एका अष्टाध्यायी परम्परा, द्वितीया परम्परा च प्रक्रियापरम्परा। प्रथमायां परम्परायाम् आदौ महाभाष्यम्, तदनन्तरं वामनजयादित्यविरचितः काशिकाग्रन्थः, भट्टोजिदीक्षितविरचितः शब्दकौस्तुभः, ततः पुरुषोत्तमदेवविरचिता भाषावृत्तिः च विद्यन्ते। एतस्याः परम्परायाः वैशिष्ट्यं यथा-

क) एतां परम्पराम् अनुसृत्य पाठकः सरलरूपेण अनुवृत्तिविषये अर्थविषये च ज्ञानमर्जयति।

ख) अष्टाध्यायीसूत्रक्रमानुसारेण सूत्राणां व्याख्यानं विद्यते अस्यां परम्परायाम्।

ग) एतस्यां परम्परायां किमपि प्रकरणं नास्ति।

द्वितीयपरम्परायाः उदाहरणं यथा-धर्मकीर्तिविरचितः रूपवतारग्रन्थः, विमलसरस्वतीकृतः रूपमालाग्रन्थः, रामचन्द्रकृतः प्रक्रियाकौमुदीग्रन्थः, भट्टोजिदीक्षितविरचितः सिद्धान्तकौमुदीग्रन्थश्च विद्यन्ते। परन्तु प्रथमेषु त्रिषु ग्रन्थेषु पाणिनेः सर्वेषां सूत्राणाम् उल्लेखो व्याख्या च नास्ति। भट्टोजिदीक्षितेन विरचिते सिद्धान्तकौमुदीग्रन्थे सर्वेषां सूत्राणामेव उल्लेखो व्याख्या च अस्ति।

**एतस्य ग्रन्थस्य गुरुत्वानि तावत् –**

क) एतस्मिन् ग्रन्थे भट्टोजिदीक्षितेन प्रकरणानि विभज्यन्ते। तानि संक्षेपेण उच्यन्ते पूर्वार्धे यथा– संज्ञाप्रकरणम्, परिभाषाप्रकरणम्, सन्धिप्रकरणम्, सुबन्तप्रकरणम्, अव्ययप्रकरणम्, कारकप्रकरणम्, समासप्रकरणम्, तद्धितप्रकरणं च। उत्तरार्धे यथा – तिङन्तप्रकरणम्, सनाद्यन्तप्रकरण्म्, कृत्प्रकरणम्, वैदिकी- प्रक्रियाप्रकरणम्, स्वर-प्रक्रियाप्रकरणं च विद्यन्ते।

ख) अस्मिन् ग्रन्थे भट्टोजिदीक्षितेन न केवलं लौकिकसूत्राणां व्याख्यानं कृतम्, अपि च वैदिकसूत्राणां व्याख्यानं कृतम्।

ग) एतस्मिन् ग्रन्थे सूत्राणां व्याख्याने मध्ये मध्ये पदानां विवृत्तिश्च प्रदर्शिता। यथा – 'कर्तुरीप्सिततमं कर्म' इति सूत्रे 'कर्तुः' इति पदस्य प्रयोजनम्, 'धातोस्तन्निमित्तस्यैव' इति सूत्रे 'तन्निमित्तस्यैव' इति पदस्य प्रयोजनम् उक्तम्।

घ) अस्य ग्रन्थस्य अपरं वैशिष्ट्यं च पूर्ववर्तिनः वृत्तिकारस्य मतानि विचार्य्य भाष्योक्तानां सिद्धान्तानां प्रतिष्ठा एव कौमुदीकारस्य लक्ष्यमासीत्। अत: अस्य ग्रन्थस्य पठनेन सर्वेषां शास्त्राणाम् उपकारो भविष्यति।

**कुञ्चिकाशब्दः** – *सूत्रम्, वार्त्तिकम्, भाष्यम्, वृत्तिः, सिद्धान्तकौमुदी।*

पाणिनिव्याकरणं संस्कृतसाहित्यजगति एकं महत्त्वपुर्णं संयोजनम्। महर्षिः पाणिनिः *अष्टाध्यायी*ग्रन्थं विरचितवान्। अष्टानाम् अध्यायानां समाहारः अष्टाध्यायी। अत एव तत्र अष्टौ अध्यायाः सन्ति। प्रत्येकमपि चत्वारः पादा वर्तन्ते। अत्र प्रायः चतुस्सहस्राणि सूत्राणि सन्ति। वैदिकभाषाणां लौकिकभाषाणां च व्युत्पत्तिप्रदर्शनार्थं पाणिनिना सूत्रनिर्माणं कृतम्। पाणिनीयं व्याकरणमेव वेदाङ्गरूपेण स्वीकृतं विद्वद्भिः। विश्वेऽस्मिन् सर्वप्रथममेव पाणिनिना शब्दानां वैज्ञानिकं विवेचनं कृतम्। प्रकृतिप्रत्यययोर्भेदनिर्देशोऽपि अत्र वर्तते। पाणिनिव्याकरणस्य तुल्यता विश्वस्य केनापि व्याकरणेन सह न कर्तुं शक्यते। पाणिनिना अतिसरलतया पद्धत्या सूत्राणां निर्माणं कृतम्। परवर्त्तिकाले *वार्त्तिक*कारः कात्यायनः *वार्त्तिकानि* रचितवान्। परवर्त्तिनि समये

महर्षिः पतञ्जलिः *अष्टाध्यायीसूत्रस्*योपरि वार्त्तिकोपरि च भाष्यं रचितवान्। अत एव एतद् त्रिमुनिव्याकरणम्।

पाणिनिप्रस्थाने प्रस्थानद्वयं वर्तते। सूत्रप्रस्थानम्, कौमुदीप्रस्थानं च। सूत्रप्रस्थाने अष्टाध्याय्या व्याख्यानं यथाक्रमं वर्तते। तत्र *महाभाष्यम्, काशिका, भाषावृत्तिः* च वर्तन्ते। एतस्य प्रस्थानस्य वैशिष्ट्यमधुना उच्यते –

1) प्रस्थानमिदमनुसृत्य पाठकः सरलरूपेण अनुवृत्तिविषये अर्थविषये च ज्ञानमर्जयति।
2) *अष्टाध्यायीसूत्र*क्रमानुसारेण सूत्राणां व्याख्यानं विद्यतेऽस्मिन् प्रस्थाने।
3) अस्मिन् प्रस्थाने किमपि प्रकरणं नास्ति।

कौमुदीप्रस्थाने मूलग्रन्थस्तावत् सिद्धान्तकौमुदी। एष ग्रन्थो भट्टोजिदीक्षितेन विरचितः। भट्टोजिदीक्षितः महाराष्ट्रदेशीयो ब्राह्मण आसीत्। तस्य पितुर्नाम लक्ष्मीधरः। सिद्धान्तकौमुदीतः पूर्वं धर्मकीर्तिविरचिते रूपावतारे, विमलसरस्वतीकृते रूपमालायाम्, रामचन्द्रकृते प्रक्रियाकौमुद्यां च अष्टाध्याय्याः समेषां सूत्राणां सन्निवेशो नैवालोक्यते स्म। अस्य पूर्तौ दीक्षितमहोदयः पूर्णतया साफल्यमवाप। अमुष्य ग्रन्थस्य प्रचारः प्रसारश्च देशे विदेशे च समानरूपेण विराजते। दीक्षितेन स्वयं सिद्धान्तकौमुद्याः टीका प्रणीता, तस्या नाम प्रौढमनोरमा। नागेशेन विरचितटीकाग्रन्थः खलु बृहच्छब्देन्दुशेखरः। संक्षेपेण पुनः शब्देन्दुशेखरः, अतिसंक्षेपेण लघुशब्देन्दुशेखरः च निर्मिताः। पाणिनिव्याकरणप्रस्थाने नागेशस्य योगदानम् अतिमहत्त्वपूर्णं वर्तते। वरदराजकृता मध्यसिद्धान्तकौमुदी, लघुसिद्धान्तकौमुदी च लौकिकसूत्राणां व्याख्याग्रन्थः। कौमुदीपरम्परायाम् उदाहरणानां बोधः अनायासेन भवति।

प्राचीननवीनभेदेन पाणिनीयं व्याकरणं द्विविधं वर्तते। वैयाकरणसिद्धान्तकौमुदी खलु नव्यव्याकरणस्य मूलग्रन्थः। यद्यपि तत्रापि त्रिमुनिव्याकरणस्य प्रामाण्यं स्वीकृतं भवति। वैदिकलौकिकभाषामवलम्ब्य यानि सूत्राणि अष्टाध्याय्यां वर्तन्ते तेषां समेषां सूत्राणां व्याख्यानं कृतवान् भट्टोजिदीक्षितः। एतत्तु पूर्वमुक्तम्। सिद्धान्तकौमुदी खलु अष्टाध्याय्याः

प्रक्रियानुसारिणी अत्युपयोगिनी व्याख्या। वर्तमानसमये समग्रे भारतवर्षे सिद्धान्तकौमुदीम् आधारीकृत्य अध्ययनं अध्यापनञ्च प्रचलति।

अधुना सिद्धान्तकौमुद्याः वैशिष्ट्यम् उदाहरणमुखेन प्रदर्श्यते –

1) अस्मिन् ग्रन्थे बहूनि प्रकरणानि समुपलभ्यन्ते। तानि संक्षेपेण उच्यन्ते- पूर्वार्धे यथा संज्ञाप्रकरणम्, परिभाषाप्रकरणम्, सन्धिप्रकरणम्, सुबन्तप्रकरणम् इत्यादयः। उत्तरार्धे तिङन्तप्रकरणम्, सनाद्यन्तप्रकरणम्, कृत्प्रकरणम्, वैदिकीप्रक्रिया, स्वरप्रक्रिया च विद्यन्ते।

2) कौमुद्याः अच्सन्धिप्रकरणे 'अकः सवर्णे दीर्घः'[१] इति सूत्रं पठितं भवति। अस्य ग्रन्थस्य व्याख्यानं काशिकाकारेण एवं कृतम् – 'अकः सवर्णेऽचि परतः पूर्वपरयोः स्थाने दीर्घ एकादेशो भवति। दण्डाग्रम्। दधीन्द्रः, मधूदके। होतॄभ्यः। अकः इति किम्? अग्नये। सवर्णे इति किम्? दध्यत्र। अचीत्येव कुमारी शेते। 'नाज्झलौ इत्यत्र यद् अजिति प्रत्याहारग्रहणं तत्र ग्रहणशास्त्रस्य अनभिनिर्वृत्तत्वात् सवर्णा न गृह्यन्ते इति सवर्णत्वम् ईकारशकारयोरप्रति- सिद्धम्।' सिद्धान्तकौमुद्यां सूत्रस्य व्याख्यानम् एवं दृश्यते – अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्। दैत्यारिः। श्रीशः। विष्णूदयः। अचि किम्? कुमारी शेते। नाज्झलाविति सावर्ण्यनिषेधस्तु न दीर्घशकारयोः।

3) ग्रहणकशास्त्रस्य सावर्ण्यनिषेधाभ्यां प्राग् निष्पत्तेः। अकः किम्? हरये। 'अकोऽकि दीर्घः' इत्येव सुवचम्।' कौमुद्यामत्र नूतनं चिन्तनं दृश्यते। तत्तु प्रौढमनोरमायां दीक्षितेन व्याख्यातम् – 'यदा तूष्मणाम् ईषद् विवृतत्वमाश्रित्य 'नाज्झलौ' इति सूत्रं प्रत्याख्यायते तदा इह अचीति न अनुवर्तनीयम्। 'अकोऽकि दीर्घः' इति सुवचम्।' ऊष्मवर्णानाम् ईषद्विवृतप्रयत्नत्वम्, स्वराणाञ्च विवृतप्रयत्नत्वम् इति भाष्योक्तपक्षाङ्गीकारेण कुमारी + शेते इत्यादौ ईकारशकारयोः प्रयत्नभेदेन सावर्ण्याभावाद् अस्मिन् सूत्रे 'अचि' इत्यस्य अनुवृत्तिर्व्यर्था एव इति भावः। 'सवर्णे' इत्यस्य ग्रहणमपि अनपेक्षितम्। अत एव 'अकोऽकि दीर्घः' इति सुवचम्।

4) 'तुलास्यप्रयत्नं सवर्णम्'[२] इति सूत्रस्य व्याख्यानकाले भाष्यकारेण काशिकाकारेण च स्पष्टतया नोक्तं कस्य किम् उच्चारणस्थानम् इति? दीक्षितेन

उक्तम् – अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। ऋटुरषाणां मूर्धा। लृतुलसानां दन्ताः। उपूपध्मानीयानामोष्ठौ। ञमङणानां नासिका च। एदैतोः कण्ठतालू। ओदौतोः कण्ठोष्ठम्। वकारस्य दन्तोष्ठम्। जिह्वामूलीयस्य जिह्वामूलम्। नासिकानुस्वारस्य। इदन्तु सिद्धान्तकौमुद्या वैशिष्ट्यम्। कौमुदीग्रन्थे सूत्राणाम् अतिसंक्षेपेण व्याख्या कृता। प्रौढमनोरमाग्रन्थे सा स्पष्टीकृता। शब्देन्दुशेखरग्रन्थेऽपि अतिविस्तृतेन कौमुद्या आशयः प्रकटीकृतः।

5) कौमुद्याः अपरं वैशिष्ट्यं तावत् पदसिद्ध्यर्थं येषां सूत्राणां प्रयोजनं विद्यते तेषां सूत्राणां कौमुद्याम् एकत्र समावेशो दृश्यते। यथा – सुद्ध्युपास्यः, रामः, दाशरथिः, भवति इत्यादयः। अत एव प्रक्रियाकार्यबोधाय कौमुद्या महद् अवदानं वर्तते।

6) कारकप्रकरणस्य 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्मा-कर्मकाणामणिकर्ता स णौ'[३] इति सूत्रस्य व्याख्यानावसरे दीक्षितेन 'दृशेश्च' इति वार्त्तिकं पठितम्। अस्य अर्थः एवं भवति 'दृश्'धातोर्योगे अणिकर्ता स णौ कर्म स्यात्। अस्य वार्त्तिकस्य उदाहरणम् – 'दर्शयति हरिं भक्तान्'। अत्र भक्त-शब्दस्य कर्मसंज्ञायां द्वितीयाविभक्तिर्भवति। किन्तु दीक्षितेन तत्र उक्तम् – 'सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणम्, न तु तद्विशेषार्थानामित्यनेन ज्ञाप्यते। तेन स्मरति जिघ्रतीत्यादीनां न। स्मारयति घ्रापयति वा देवदत्तेन।' अत्र तात्पर्य्यम् एवं भवति दृशधातुः बुद्ध्यर्थको भवति। अत एव 'गतिबुद्धि....' इत्यादि पाणिनिसूत्रेणैव इष्टसिद्धिर्भवति। अत एव इदं वार्त्तिकं व्यर्थं स्यात्। एतद्विषये दीक्षितेन एवं व्याख्यानं कृतम्।

7) भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां न केवलं सन्धिज्ञानानां प्रदत्तानि अपि तु पाठकानाम् आध्यात्मिकज्ञानलाभाय प्रदत्तानि। यथा सुद्ध्युपास्यः, मद्धरिः, धात्त्रंशः, लाकृतिः एतानि खलू देवतानां नामानि। किन्तु अत्र मध्वानयः, दध्यानयः, बध्वानयः, पित्त्रंश इत्यादि उदाहरणानि अपि देयानि। परन्तु कथं भगवतः कृष्णस्य नामानि उदाहरणरूपेण प्रदत्तानि।

8) अस्य ग्रन्थस्य अपरं वैशिष्ट्यं च पूर्ववर्त्तिनां वृत्तिकाराणां मतानि विचार्य्य भाष्योक्तानां सिद्धान्तानां प्रतिष्ठा एव कौमुदीकारस्य लक्ष्यमासीत्। अत

एव महाभाष्यस्य प्रदीपटीकायां कैयटेन उक्तम् – 'यथोत्तरं मुनीनां प्रामाण्यम्' इति, उत्तरमुनेः पतञ्जलेः प्रामाण्यं समधिकं वर्तते। अतः अस्य ग्रन्थस्य पठनेन सर्वेषां शास्त्राणाम् उपकारो भविष्यति। सर्वेषां वेदशास्त्राणामध्ययने वैदिकसूत्राणामपेक्षा वर्तते। अवैदिकग्रन्थानाम् अध्ययने लौकिकसूत्राणामपेक्षा वर्तते। अतः सिद्धान्तकौमुद्याः प्रयोजनमपरिहार्यमस्ति। एवंरूपेण अस्य अतिगम्भीरविषयस्य आलोचनम् अत्र वर्तते।

Generally the sages in ancient India, there the sixth part of the merit earned from their penance goes to the king as payment of tax. When Vidusaka has told the king, let the hermits brings us the sixth part of the wild rice, then king Dusyanta replied him saying that o fool, quite a different kind of tribute these ascetics pay which is prized even above heaps of jewels. In verse 13th of second act it is -

यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षतिः तत्फलम्।
तपः षड्भागमक्षय्यं ददत्यारण्यका हि नः॥ ३

Means, the yield that accrues to kings from the castes is perishable. But the foresters give us the sixth part of their penance which is indeed imperishable.

In the second act of the drama Kalidas has compared king Dusyanta with a sage. When two young sages have come to meet the king dusyanta, looking at him one of them is telling he is not much differing from the Rishis. He reflects everything of a king with what a sage does.

अध्याक्रान्ता वसतिरमुनाप्याश्रमे सर्वभोग्ये।
रक्षायोगाद्यमपि तपःप्रत्यहं सञ्चिनोति॥
अस्यापि द्यां स्पृशति वशिनश्चारणद्वन्द्वगीतः।
पुण्यःशब्दो मुनिरिति मुहुः केवलं राजपूर्व॥[4]

He too has taken up residence in an Ashram in which all can resort, by protecting his subjects. He also daily accumulates merit, and of him too, who has

subdued all his passions, the holy titled of Muni only preceded by the word Royal being praised by couples of birds often rises to heaven.

This is the duty of a king to enquire whether the performers of rights are protected or not in his kingdom. In first act, When Sakuntala and Anasuya have seen the king and try to know him, then King Dusyanta is telling , I am the person, who has been engaged in the department of Religion by the king descended from Puru have come to this penance forest to know if rites are without obstruction.

य: पौरवेण राज्ञा धर्माधिकारे नियुक्त: सोहामविघ्नवक्रियोपलम्भाय धर्मारण्यमिदमायात:।[5]

this is one of the good conduct of a king that he does not neglect his duty even if he is disturbed in his personal duties rather he attends his duty. In 6th act When he is informed by Kanchuki to move the pleasure garden and occupy the seats of amusement, then king Dusyanta has given order to his minister that i am not thinking of occupying the seat of judgement today. So whatever public business has been attended to by your honour, let the same be sent to my chamber after being committed to writing.

चिरप्रबोधान्न सम्भावितमस्माभिरद्य धर्मासनमध्यासितुम्।
यत्प्रत्यवेक्षितं पौरकार्यमार्येण तत्पत्रमारोप्य दीयतामिति।[6]

The performance of duty should not be delayed by a king. So Kingship does not give chance of take rest to a king and taking all the burdens how a king always attends his duty for his people that Kanchuki has been said in 5th act.

भानुः सकृद्युक्ततुरङ्ग एव रात्रिंदिव गन्धवहः प्रयाति।
शेषः सदैवाहितभूमिभार: षष्ठांशवृत्तेरपि धर्म एषः॥[7]

The sun has his courses yoked once for all. The wind blows day and night. Shesa constantly bears the

burden of the earth. And this is the duty of him that collects the one sixth of the land. And also

प्रजा: प्रजा: स्वा इव तन्त्रयित्वा
निषेवते श्रान्तमना विविक्तम्।
युथानि संचार्य रविप्रतप्त:
शीतं दिवा स्थानमिव द्विपेनद्र: ॥ [8]

Enjoying solitude with a wearied soul, after having governed his subjects as if they were his children, like an elephant-lord reposing in a cool place being heated by the sun after having led his herds during day times.

Again in fifth act kalidasa has described how do a king suffers to protect his people. Here a sage comparing to king with a tree and is telling

स्वसुखनिरभिलाष: खिद्यसे लोकहेतो:
प्रतिदिनमय वा ते वृत्तिरेवंविधैव।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति पतिपं छायया संश्रितानाम्॥ [9]

Regardless of personal comfort you daily toil for the people or such is indeed your daily course. For the tree suffers burning heat with its head by its shade it allays the pain of those resorting to it.

## References:


1. Abhijnanasakuntalam 1.10
2. Abhijnanasakuntalam 1.11
3. Abhijnanasakuntalam 2.13
4. Abhijnanasakuntalam 2.14
5. Abhijnanasakuntalam 1
6. Abhijnanasakuntalam 6
7. Abhijnanasakuntalam 5.4
8. Abhijnanasakuntalam 5.5
9. Abhijnanasakuntalam 5.7

## Bibliography


- Basu, Dr. Anil Chandra, Abhijnanashakuntalam, Sanskrita Book Depot, 2012, Kolkata.
- Devadhar, C.R., Abhijnanasakuntalam of Kalidasa, Motilal Banarsidass Publishers Pvt. Ltd., 1934, Delhi.
- Kale, M.R., The Abhijnanasakuntalam of Kalidash, Motilal Banarasidass Publishers pvt. Ltd., 2017, Delhi.
- Malviya, Sudhakar, Abhijnanasakuntalam of Kalidasa, : Krishnadas Academy, Varanasi.
- Sengupta, S. and Tandon, D., Revisiting Abhijnanasakuntalam: Love, Lineage and Language in Kalidasa's Nataka, Orient Blackswan, 2011, New Delhi.
- Sastri, Gouri Nath, Abhijnanasakuntalam of Kalidasa, Sahitya Akademi, New Delhi.
- Satapathy, Harekrushna, Abhijnanasakuntalam, Kitab Mahal, 2007, Cuttack, Odisha.


❖❖❖

# Mahīdhara The Author of Yogavāśiṣṭhasāra and its Auto-commentary Yogavāśiṣṭhasāravivṛti

Tapas Pal

**Abstract:**

The Yogavāśiṣṭhasāra or Jñānasāra is through out a philosophical work. Mainly the vedāntic concepts of a radically monistic type, resembling the vedāntic doctrines as interpreted by Śaṃkara, are expounded here in the form of popular lectures to Rāma by Vaśiṣṭhain melodious anuṣṭubh verses. It consists 228 verses in ten Prakaraṇas. It is a Sāra text by Mahīdhara. It is a summary of Yogavāśiṣṭharāmayaṇa.

Earlier it is not clear that the author Mahīdhara and the commentator Mahīdhara is identical. The Catalogus Catalogorum (CC) of Theodor Aufrecht, Baṃlā Viśwakoṣa (the Bengali encyclopedia) edited by Nagendranath Basu, The New Catalogus Catalogorum (NCC) and the manuscripts consulted by the researcher records about Mahīdharas as the author of the commentary Yogavāśiṣṭhasāravivṛiti. The Mahīdhara is identical with the author of the commentary Vedadīpa on Śukla-yajurveda. R Thangaswami's record in the Advaita-Vedānta Literature: A Bibliographical Survey, establishes beyond doubt the authorship of Mahīdhara of the both the text and the commentary. The present article is an humble attempt to prove the authorship of Mahīdhara.

**Key words:**

Yogavāśiṣṭhasāra, Yogavāśiṣṭhasāravivṛiti, Vedadīpa, Mahīdhara, The Catalogus Catalogorum (CC), The New Catalogus Catalogorum (NCC)

## Introduction:

Yogavāśiṣṭhasāra or Jñānasāra is a Sāra text by Mahīdhara. It is a summary of Yogavāśiṣṭha. The Yogavāśiṣṭha is through out a philosophical work, in form of popular lectures, and the same idea is often repeated in various kinds of expression and poetic imagery. It consists of 32000 verses in six books or Prakaraṇas, namely Vairāgya-Prakaraṇa, Mumukṣu-vyavahāra-Prakaraṇa, Utpatti-Prakaraṇa, Sthiti-Prakaraṇa, Upaśama-Prakaraṇa and Nirvāṇa-Prakaraṇa. It is known also as Ārṣarāmāyaṇa, Jñānavāśiṣṭha, Mahārāmāyaṇa, Vāśiṣṭharāmāyna or Vāśiṣṭha.

The Yogavāśiṣṭha was summarized in verses by some authors. The titles of some of the summaries are namely, Bṛhadyogavāśiṣṭha, Laghuyogavāśiṣṭha, Yogavāśiṣṭha-ślokāḥ and Yogavāśiṣṭhasaṃkṣepa by Gauḍa Abhinanda of the 9th cent. CE, Yogavāśiṣṭhasāra-saṃgraha and Vāśiṣṭhasāra or Vāśiṣṭhasāra-guḍhārtha by Rāmānanda-tīrtha, a desciple of Advaitānanda, Yogavāśiṣṭhasāra or Jñānasāra by Mahīdhara.

## The Text Yogavāśiṣṭhasāra :

The Yogavāśiṣṭhasāra or Jñānasāra is through out a philosophical work. Mainly the vedāntic concepts of a radically monistic type, resembling the vedāntic doctrines as interpreted by Śaṃkara, are expounded here in the form of popular lectures to Rāma by Vaśiṣṭhain melodious anuṣṭubh verses. It consists 228 verses in ten Prakaraṇas which are Vairāgya-Prakaraṇa, Jagnmithyātva-Prakaraṇa, Tattvajñāna-Prakaraṇa, Manolaya-Prakaraṇa, Vāsanopaśama-Prakaraṇa, Ātmamanana-prakaraṇa, Śūddhinirūpaṇa-Prakaraṇa,

Ātmārcana-Prakaraṇa, Ātmanirūpaṇa-Prakaraṇa, Śūnyāśūnyapada-Prakaraṇa.

As the text itself says, it is intended neither for those ignorant persons (ayñānins) who keep attached in the sea of saṃsāra without being indifferent to worldly things, nor for those higher spiritual persons who have reached a state of wisdom. So the discoursive advices are for those who have become in different to worldly things and crave for spirituality in their daily life.

अहं बद्धो विमुक्तः स्यामिति यस्यास्ति निश्चयः।
नात्यन्तमज्ञो नो तज्ज्ञः सोऽस्मिञ्छास्त्रेऽधिकारवान्॥

**Manuscripts consulted:**

For the purpose of the present work the present researcher consulted fifteen manuscripts (mss). Among them only ten mss. contain both the text and the commentary. One of them, is the ms. in the holding of Bankura Christian College, District-Bankura; Ms. no. 124, Bundle no. 35. The two mss. are in the holding of Asiatic Society, Kolkata, both belonging to the Indian Museum collection, mss. nos. IM 10904, IM 10606. One ms. is in the Prājña Pāṭhaśālā Maṇḍala, WAI, Dist-Satara, Maharastra, no. 8-6/455; another ms. is in the Anandashram Sansthan, Pune, bearing the no. S 12(1)-6-51; one ms. is in the Bhandarkar Oriental Research Institute, Pune, bearing the no. 74/1882-83; the other two mss. are in the Vaidika Samshodhana Mandala, Pune, among them one is belongs to the Pandharpure collection, bearing the no. 5565 and one is belonging to the Kelakar collection bearing the no. 4056; the other two mss. are in the Bharat Itihasa Samshodhaka Mandala, Pune, among them one is belonging to the Thite collection bearing the no. 1031 and one is belonging to the Chandorkar collection, bearing the no. 220.

Another five mss. do not contain the commentary, these are contain text part only. Among them one in the holding of the Asiatic Society, Kolkata, no. IM 10610; the other one belonging to the Sanskrit Sahitya Parishat, Kolkata, no. 9121, another one belonging to the Anandashram Sansthan, Pune, bearing the no. S 12(1)-6-53, another one in the Pandharpure collection of Vaidika Samshodhana Mandala, Pune, no. 5562 and one belonging to the Patvardhan collection of the Bharat Itihasa Samshodhaka Mandala, Pune, no. 260.

These above mentioned ten mss, which contain the text and commentary both, record Mahīdhara as the author of the commentary on the Yogavāśiṣṭhasāra entitled Yogavāśiṣṭhasāravivṛiti or Yogavāśiṣṭhasāra-vivaraṇa. In the colophon of these mss record as follows—"इति श्रीयोगवाशिष्ठसारविवरणे महीधरकृते शून्याशून्यपदं नाम दशमं प्रकरणम्".

One of the most important point to note the ms. of Sanskrit Sahitya Parishat is the following verse, which is not available in any other mss, contain only text portion of Yogavāśiṣṭhasāra. The verse is actually the benedictory verse of the commentary Yogavāśiṣṭhasāravivṛiti. The ms, although without the commentary, is having this verse in the beginning of the text of Yogavāśiṣṭhasāra.

लक्ष्मीकान्तं नमस्कृत्य यथामति विविच्यते।
वाशिष्ठसारविवृतिः परोपकृतये मया॥

This is important because this verse records Mahīdhara as the author of the verse and also of the commentary (vivṛiti). Other wise all the mss. at hand reveal and record the name of Mahīdhara as the author of the commentary.

**Mahīdhara:**

It is well known that Mahīdhara is one of the greatest Commentators of Śuklayajurvedasaṃhitā. He was the elder brother of Uvaṭa. He was existing in the second part of 16th cent. CE. He composed the Yogavāśiṣṭhasāra and its auto-commentary Yogavāśiṣṭhasāravivṛiti in 1598. The Catalogus Catalogorum, New Catalogus Catalogorum and Advaita Vedānt Literature. A Bibliographical Survey declared that Mahīdhara is the author of Commentatary of Śuklayajurvedasaṃhitā and Yogavāśiṣṭhasāra and its auto-commentary Yogavāśiṣṭhasāravivṛiti.

Catalogus Catalogorum records about five Mahīdharas

Mahīdhra, son of Rāmadāsa, Father of Kalyāṇa (a. of Bālatantrā1587)

Mahīdhara Miśra, Father of Susheṇakavirāja (a. of Kalāpacandra).

Mahīdhara, Sanskrit Poeṭ

Mahīdhara, Author of Bṛhajjātakavivaraṇa.

Mahīdhara, son of Rāmabhakta, Grandson of Ratnākara, Pupil of Ratneśvara (a son of keśava), lived at Benares, Author of Adbhutaviveka, Īśāvāsyopanishadbhāshya, Ekāksharakośa, Kātyāyana--gṛihyasūtrabhāshya, Kātyāyanāśulbasūtrabhāshya, Nṛisiṇhapāṭala, Purushasūktaṭīkā, Mantramahodadhi and its Naukā, written in 1589, Mātṛikāksharanighaṇṭu or Mātṛikānighaṇṭu, Yogavāśiṣṭhasāravivṛiti, Rāmagītā-tīkā, Rudrajapabhāshya, Vishṇubhaktīkalpalatā-prakāśa, written in 1597, Vedadīpa on Vājasaneyisaṃhitā, Shaḍaṇgarudrabhāshya, Sārasvatāprakriyāṭikā, Sautrāmaṇiviṇiyogasūtrārtha.

The Viśvakoṣa records the same as recorded in the Catalogus Catalogorum.

New Catalogus Catalogorum records about eleven Mahīdhara-

Mahīdhara, father of Kulacandra (a of cc. Durgavākyaprabodha on c. of Durgasiṃha on Kātantra.)

Mahīdhara, (Vyāsa) father of Gaṇapati vyāsa (a of. Yogasamuccaya).

Mahīdhara, father of Jīvanarāma Śāstrī (a of Rājakoṭavilāsa). Mahīdhra, (different authors), ṭīkāin Advaitamakaranda of Pūrṇānanda, Vivaraṇa on Anādidīpa of Anādideva, Aśvamedhāhuti, Kathākalpalatā Kāvya, Kujapratiṣṭhā, Bhāṣya on Gāyatrīsvarūpa from Chāndogyopaniṣad, Commentary on Naṣṭajātaka(26th Ch. of Bṛhajjātaka), Nitya-pūjākarma, vivaraṇa and Bṛhajjātaka of Varāhamihira, Bṛhaspatipratiṣṭhā, Mantrakosśa. Tantra, Mṛtyuñjaya-paddhatimantra. Part of Mantramahodadhi, Meghamālā, Yoginikalpamantra, Rāhupratiṣṭhā, on Lilāvatī of Bhāskarācārya, Varṇakośa, Commentary on vāsiṣṭha Rāmāyaṇa (a compendium of a unknown a.), Śanipratiṣṭhā, Śukrapratiṣṭhā, Bhāṣyaon Śiva-saṇkalpasūkta Bhāṣya on Samāstvādhyāya, Sundaripūjanavidhi, Suryapratimā-pratiṣṭhā, Svarṇā-karṣaṇavidhāna, Hanumanmantrākathana. Mahīdhra, disciple of Nṛsiṃhāśrama. Commentary Vākya-saṇgraha on Bhāṣya on Brahmasūtra. Mahīdhra, disciple of Śrīkaṇṭha Bhaktilatā. Kāvya. Mahīdhara, alias Mahīdāsa, son of Rāmabhakta, grandson of Ratnākara, disciple of Ratneśvara, son of Keśava, lived at Benares ; father of Kalyāṇa (a. of Bālatantra or Bālacikitsā,), author of Adbhutaviveka, Commentary Vedadīpa on Īśāvāsyopaniṣad, Ekākṣarakośa. cf. Mātṛkānighaṇṭu, Commentary on Aitareyāraṇyaka, Commentary on Gṛhyasūtra of Kātyāyana, Commentary on caraṇavyūha (attributed to Śaunaka).

composed at Benares in 1557 or 1607 CE, Nṛsiṃhapaṭala. Vaiṣṇavatantra, Commentary on Puruṣasūkta. Śukla Yajurveda, Mantramahodadhi, Commentary Naukāon his own work Mantra-mahodadhi, Mātṛakākṣaranighaṇṭu or Mātṛkānighaṇṭu, Commentary Vedadīpa on Yajurvedasaṃhitā.(Śukla), Commentary Vivṛti on Yogavāsiṣṭhasāra, Commentary on Rāmagītā, Commentary on Rudrajapa, Commentary Prakāśa on Viṣṇubhaktikalpalatā of Puruṣottama, Bhāṣya on Vedamantra, Yajurveda,Vedadīpamanohara on Śataruriyahoma (16th Ch.). Cf. C. Vedadīpa on Vājasaneyasaṃhitā, Commentary Vivaraṇa on Śulbasūtra of kātyāyana, Commentary on Saḍaṇgarudra. Commentary on Sārasvataprakriyā, Sautrāmaṇiviniyogasūtrārtha. Mahīdhara Miśra, father of suṣeṇakavirāja (author of Commentary. Kalāpacandra or Kātantrachandra on Commentary of Trilocana on Commentary of Durgasiṃha on Kātantra.) Mahīdhara Miśra, Mahīdharasaṃhitā. Mahīdhara-lakṣmīpati, one o the a.s. of the Nṛsiṃhasarvakāvya, a work in honour of Nṛsiṃhāśramayati of Benares. Mahīdharācārya, son of Viṭṭhalācārya and Preceptor of Śrīnivāsa (author of Commentary Prameyamanimālāon Bhāratatātparyanirṇaya of Ānandatirtha.) .

R. Thangaswami in his Advaitā Vedānt Literature A Bibliographical Survey records that "रत्नाकरपौत्रः पूर्णभद्रपुत्रः बालतन्त्रकर्तुः कल्याणभट्टस्य पिता रत्नेश्वरस्य शिष्यश्चायं वाराणसीवासी श्रीवत्सगोत्रः मन्त्रमहोदधिकारः महीधरः1598 CEकाले योगवाशिष्ठसारविवृत्तिमकरोत्। अयं षोडशशतकीय इति भाण्डारकार ओरियण्टाल पत्रिकाया एकविंशतितमे भागे (A.B.O.R.I. Vol. XXI p.248) वर्णितम्।

ग्रन्थोऽयम् अज्ञातकर्तृनामा नासिकसूच्यां (IV 19) दृश्यते। अस्य व्याख्या महीधरकृतापि वर्तते। परं तु मूलग्रन्थकारः महीधर इति न निर्दिष्टम्। परं तु लण्डननगरस्थपुस्तकालयसूच्यां बरोडासूच्यां च मूलकृदपि महीधर इत्येव निर्दिष्टम्। अस्माभिर्द्वैताचार्यप्रस्तावे योगवाशिष्ठप्रकरणं चोपपादितम्।"

## Conclusion:

Earlier it was not clear that Mahīdhara was the author of the text. The manuscripts at hand, the Catalogus Catalogorum, the New Catalogus Catalogorum, Viśvakoṣa records that Mahīdhara was the author of Yogavāśiṣṭhasāravivṛiti. Only R. Thangaswami's work removes the doubt about the authorship of the text.

Again, there is no doubt that Mahīdhara recorded by Catalogus Catalogorum, New Catalogus Catalogorum and the Advaita Vedānta Literature : A Bibliographical Survey is the same person. It is interesting that a commentator of Vedic, specially Yajurvedic texts composed a text of AdvaitaVedānta of such depth along with preparing an autocommentary on the same. Even if it might be a matter of coincidence that the Vājasaneyisaṃhitā or the Śuklayajurveda being a 'karmaveda' in nature and content ends with its last, i.e. the 40th chapter Īśopaniṣad, a peak of 'jñānakāṇḍa' ; and Mahīdhara the commentator of the same vedic saṃhitā elucidates the vedāntic thoughts contained in the philosophical text of Yogavāśiṣṭhasāra being the author of the text as well. Surely it makes us recollect the famous teaching of the Bhagavadgītā- all action finally culminates in knowledge-

सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते।

## Reference


- Aufrecht, Theodoṛ Catalogus CatalogoruṃAn Alphabetical Register of Sanskrit works and authorṣ Wiesbaden ; Franz steiner Verlag, 1962 (2nd eḍ).(1st eḍ Leipzig, 1891-1903).
- Basu, Nagendranath. Viśvakoṣa. (Vol-XXIV). Calcutta (now Kolkata); Viśvakoṣa Kāryālaya (A. Basu & Company), 1309 B.S.

- Das Gupta, Surendranath. A History of Indian Philosophy. (Vol. I-III). Delhi ; Motilal Banarasidass, 1988 (rpt.). (1st ed, cambridge, 1922, 1st Indian ed. Delhi 1975.).
- Mahīdhara. Yogavāśiṣṭhasāra. Comp. & ed. Swami Dhireshananda. Kolkata ; Udbodhan Kāryālaya, 2007. (3rd rpt. of 2nd ed. 1985).
- New Catalogus Catalogoruṃ An Alphabetical Register of Sanskrit and Allied works and Authors Vol-XIX. Ed. Siniruddha Dash. Madras ; University of Madras, 2007.
- Śrīmadbhagavadgītā with the Commentary Subodhinī of Śrīdharasvamin. Ed with Beng. Trans. Swami Bhabghanananda. Kolkata ; Udbodhan Kāryālaya, 2003(2nd ed.). ( 1st ed. 2000).
- Thangaswami, R. Advaitavedānta Literature A Bibliographical Survey. Madras ; University of Madras, 1980.


## End Note

- S. N. Dasgupta, HIP Vol.II, P. 232
- Yogavāśiṣṭhasāra.1.2.
- Theodor Aufrecht Catalogus Catalogorum An Alphabetical Register of Sanskrit works and authors, 1962. P. 444.
- Nagendranath Basu. Viśvakoṣa. (Vol-XXIV), 1309. Bengalian, P 492.
- New Catalogus Catalogoruṃ An Alphabetical Register of Sanskrit and Allied works and Authors Vol-XIX. Ed. Siniruddha Dash. 2007, pp. 288-291.
- Thangaswami, R. Advaitavedānta Literature A Bibliographical Survey, 1980. p.373.
- Ibiḍ p. 176.
- Gītā. 4.33.

❖❖❖

# संस्कृतकाव्यजगति महाकविकालिदासस्थितिः-संक्षिप्तः परिचयः

मन्तेश्वरवर्मा

संस्कृतसाहित्यं महाकविकालिदासस्य कीर्तिसमूहेन विश्वसाहित्यजगति प्रतिष्ठां लभते इति विषये कोऽपि संशयो नास्ति। परन्तु अयमेव कविः स्वकीयजीवनविषये स्वमुखेन सामान्यमपि नोच्चारितवान्। विविधपण्डितानां गवेषणाधारितं कियत्संख्यकम् अभिमतं तथा च काचित् जनश्रुतिः एव कालिदासस्य जीवनवृत्तान्तकथनविन्दुरूपेण साहित्यजगति इतस्ततः परिभ्रमति।

**जीवनवृत्तान्तम्**

संस्कृतसाहित्यमण्डले तथा विश्वसाहित्यस्य सन्दर्भे महाकविकालिदासः एकोऽन्यतमः उज्ज्वलज्योतिष्कस्वरूपः अस्ति। महाकविकालिदासस्य नामोल्लेखेन न केवलं एकः जनः प्रतिभातो भवति परन्तु तन्नाम्ना प्राचीनभारतीयसंस्कृतसाहित्यस्य एकं सुवर्णं समयं निर्द्दिशति सुधीसमाजे। महाकविकालिदासस्य साहित्यकीर्तिः संस्कृतसाहित्ये अनन्यत्वं सूचयति। वाल्मीकिं व्यासदेवं व्यतिरिच्य यत् नाम प्राचीनभारतीयसाहित्यसन्दर्भे विदुषां मनसि आयाति तत् खलु निःसन्देहेन कालिदासस्य एव। कालिदासस्य रचनासु भारतीयचेतनायाः भारतकेन्द्रिकविश्वासादिकस्य प्रतिफलनं दरीदृश्यते सर्वत्र। परन्तु कालिदासेन स्वकीयजीवनकथा न कुत्रापि प्रकाशिता अस्ति। तदीया जन्मभूमिः कुत्र आसीत्, कः वा तस्य आविर्भावकालः, किं वा आसीत् तदीयपारिवारिकजीवनम्, इत्यादिविषये महाकविकालिदासः एकमपि शब्दं तदीये काव्ये न उच्चारितवान्। पण्डिताः तद्रचितशब्दजातम् आधारीकृत्य विषयेषु एषु स्वकीयसिद्धान्तान् प्रकाशितवन्तः। स्थाने स्थाने तदुपरि कालिदासजीवनविषये किंवदन्ती जनश्रुतयश्च प्रचलिताः वर्त्तन्ते विचित्रसन्दर्भे। तत् सर्वम् आधारीकृत्य एका आलोचना प्रस्तूयतेऽत्र। कालिदासस्य

जन्मादिवृत्तान्तः न स्पष्टः इति आदौ उक्तमस्ति। विषयेऽस्मिन् निर्दिष्टं तथ्यजातं न कथमपि प्राप्यते। परन्तु विषयमिमम् आधारीकृत्य ये खलु सिद्धान्ताः परवर्तिविशेषज्ञैः प्रख्यापिताः जाताः, तान् अवलम्ब्य अत्र केचित्विन्दवः निर्दिश्यन्ते-

(i) श्रूयते यत् कालिदासः जीवनस्य प्रामम्भिककाले एकः महामूर्खः आसीत्।[70] विविधघटनाक्रमेण राजकन्यया एकया सह तस्य परिणयोऽभवत्। परवर्तिकाले यदा सा राजकन्या ज्ञातवती यत्कालिदासः एकः मूर्खजनः, तदा सा कालिदासम् अवज्ञापूर्वकं भर्त्सनाम् अकरोत्। दुःखितः कालिदासः प्राणविसर्जनार्थं नदीं प्रति अगच्छत्। तदा तत्र वाग्देवी सरस्वती आगत्य कालिदासं प्राणत्यागात् निवारितवती। तथा च देवी सरस्वती तदा तम् आशीर्वचनेन सभाजयति इत्यपि श्रूयते। वाग्देवी तदा उक्तवती यत् कालिदासः परवर्तिसमये जगति अद्वितीयः कविः भविष्यति इति। तदा प्रसन्नः कालिदासः पुनः नगरं प्रत्यागम्य पत्न्या उच्चारितं वाक्यमाधारीकृत्य- अस्ति कश्चित् वागर्थौ[71] इति। अस्मिन् प्रसङ्गे वाक्यान्तरमपि श्रूयते- अस्ति कश्चिद् वाग्विशेषः इति। अस्मिन् प्रसङ्गे एतत् उच्यते यत्परवर्तिकाले महाकविकालिदासः इदं पदत्रयं गृहीत्वा त्रीणि काव्यानि विरचितवान्। तद् यथा- अस्ति इति पदं गृहीत्वा कुमारसम्भवम्[72] कश्चित् इति पदं गृहीत्वा मेघदूतम्[73] वाक् इति पदं गृहीत्वा रघुवंशम्[74] इति रचितवान् कविकालिदासः इति जनश्रुतिः प्रसिद्धा एव।

---

[70] A.B. Keith, *A History Of Sanskrit Literature*, Oxford University Press, London, 1920, P- 80

[71] M. Krishnamachariar, *History Of Classical Sanskrit Literature*, Tirumalai-Tirupati Devasthanams Press, Madras, 1937, P- 100

[72] अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधीवगाह्य स्थितः पृथिव्या इव मानदण्डः॥ ,*कुमारसम्भवम्,*प्रथमः सर्गः,श्लोकः 1

[73] कश्चित्कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः। *मेघदूतम्,*पूर्वमेघः, श्लोकः- 1

[74] वागर्थाविवसम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥ *रघुवंशम्,*प्रथमः सर्गः, श्लोकः- 1

(ii) एषः अपि प्रवादः अस्ति यत्जानकीहरणम् इति महाकाव्यस्य रचयिता कुमारदासः। तस्य आविर्भावकालः खीष्टीयः षष्ठशतकः इति पण्डितैः स्वीक्रियते[75]। कुमारदासः कालिदासस्य सखा आसीत्। तथा च एषः काव्यकर्ता कालिदासस्य चितायाम् आत्माहुतिं दत्तवान्। एतत् श्रूयते यत् राजा कुमारदासः एकदा तद्रक्षितायाः गृहभित्तिकायां कमले कमलोत्पत्तिः श्रूयते न तु दृश्यते इति वाक्यं लिखित्वा अवदत् यत्यः जनः वाक्यस्य अस्य अपरार्धं पूरयिष्यति सः प्रभूतधनं प्राप्स्यति इति। केनापि प्रकारेण कालिदासः इमां पङ्क्तिं दृष्ट्वा-बाले तव मुखाम्भोजे दृष्टमिन्दीवरद्वयम् इति लिखित्वा श्लोकस्य अस्य पादपूरणं कृतवान्। ततः सा वाराङ्गना कालिदासं हत्वा पादपूरणस्य कृतित्वं गृहीत्वा कुमारदासतः पुरस्कारं प्रार्थितवती इति लोककथा अपि संस्कृतसाहित्यक्षेत्रे प्रचलति। किन्तु राजा कुमारदासः गणिकायाः अपकीर्तिम् अवगम्य मित्रविरहदुःखात् कालिदासस्य चितायाम् आत्मविसर्जनम् अकरोत्। इदमत्र स्मर्तव्यं यत् एतादृशी कथा बहुकालात् प्रचलन्ती बिद्वत्समाजे सुस्थिरा जाता। परन्तु अस्यां कथायां सत्यतासत्यतयोः कीदृशी अवस्थितिरस्ति तद्विषये न कोऽपि स्थिरतया वक्तुं शक्नोति। केषाञ्चित् पण्डितानां मतेन तत्र नैके कालिदासाः आसन्। राजशेखरमतेन तत्र त्रयः कालिदासाः[76] आसन्। अतः एतत् कथासन्नद्धं कालिदासनामा तृतीयं कालिदासं सूचयति इत्यपि सिद्धान्तः सहृदयसमाजे प्रचलति।

(iii) *भोजप्रबन्धः* इति ग्रन्थे कालिदासस्य विषये विविधजनश्रुतयः प्राप्यन्ते। कति जनाः वदन्ति यत् कालिदासस्य कमला इति नामिका पत्नी आसीत्।[77] एष महाकविः स्त्रीपुत्राभ्यां सह सुदीर्घसुखमयपारिवारिकजीवनं यापितवान्। केचित् पुनः वदन्ति यत् कालिदासस्य पत्न्याः नाम आसीत्

---

[75]A.B. Keith, *A History Of Sanskrit Literature*, Oxford University Press, London, 1920, P- 119

[76]R.D. Karmarkar, *Kālidāsa*, Karnatak University, Dharwad, 1972, P- 10

[77]S. Chakraborty, *Abhijñānaśakuntalam,* Sanskrit Pustak Bhandar, 6th Ed., Kolkata, 2005, P- 40

शोभना।[78] *कुमारसम्भवम्*[79] इति महाकाव्ये व्यवहृतं शोभने इति सम्बोधनपदम् अत्र प्रमाणरूपेण गृह्यते।

(iv) मनुष्यसमाजे एकः प्रवादः प्रचलति यत् श्रीः सरस्वती च एकत्र न विद्येते। किन्तु कालिदासस्य विषये तदीयलेखने च युगपदेव लक्ष्म्याः सरस्वत्याः च स्थितिः परिलक्ष्यते इति पण्डितानाम् अभिमतम्। अस्य पण्डिताभिमतस्य यत् कारणं निर्धार्यते तत् खलु *विक्रमोर्वशीयम्* इति नाटकस्थितं वाक्यमेकम्।[80] अस्मिन् प्रसङ्गे केचित् वदन्ति यत्कालिदासः प्रथमजीवने समृद्धिशाली नासीत् किन्तु परवर्तिकाले स धनवान् अभवत्। कालिदासः सुप्रतिष्ठितः भूत्वा राज्ञः विक्रमादित्यस्य सभासद्पदं समलंकृतवान् इति तु इतिहासात् ज्ञायते।

(v) कलिदासः राज्ञः कुन्तलस्य राष्ट्रदूतः आसीत्[81] इत्यपि कथा श्रूयते।

**कालिदाससमयः**

महाकविः कालिदासः स्वरचनायां कुत्रापि तदीयाविर्भावकालविषये किञ्चिदपि न उक्तवान्। अतः तत्समयविषये एकाधिका किंवदन्ती प्रचलिता अस्ति। कालिदाससमयम् अधिकृत्य पण्डितानां मध्ये मतविरोधः वर्त्तते। खीष्टपूर्वप्रथमशतकतः खीष्टियषष्ठशतकपर्यन्तं सुदीर्घषड्शतवत्सरपरिमितः महाकविकालिदासस्य आविर्भावकालः एव गण्यते विविधैः पण्डितैः नैककारणात्। अत्र उल्लेखनीयं यत् महाकविकालिदासस्य समयनिरूपणे प्रधानरूपेण मतत्रयं प्रचलति। तत् यथा- खीष्टपूर्वप्रथमशतकं कालिदासस्य कालः इति प्रथमम् अभिमतम्[82]। खीष्टियचतुर्थशतकः गुप्तयुगः वा

---

[78]. तत्रैव।

[79]. तदिदं परिरक्ष शोभने! भवितव्यप्रियसङ्गमं वपुः, *कुमारसम्भवम्,*चतुर्थः सर्गः, श्लोकः- 44

[80].राजा- संगतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सतम्, *विक्रमोर्वशीयम्,*पञ्चमांकः, श्लोकः- 24

[81]. R. D. Karmarkar, *Kālidāsa*, Karnatak University, Dharwad, 1972, P- 16

[82].D. K. Das, *SANSKRITA SAHITYER ITIHASA*, Sadesh, Kolkata, 2016, P- 117-119

कालिदाससमयः इति द्वितीयम् अभिमतम्[83]। तथा च खीष्टियषष्ठशतकः कवेः कालः इति तृतीयं मतमस्ति।[84] महाकविकालिदासः *मालविकाग्निमित्रम् इति* नाटकस्य प्रस्तावनायां भासस्य नामोल्लेखम् अकरोत्।[85] किन्तु भासविरचितेषु नाटकेषु महाकविकालिदासस्य नामोल्लेखः कुत्रापि न विद्यते। अतएव महाकविकालिदासस्य आविर्भावकालः भासोत्तरसमयः आसीत् इति पण्डितैः उच्यते।

अध्यापक-लासेन्-म्याक्डोनेल्-कीथ्-भिनसेन्टस्मिथप्रमुखानां पाश्चात्यपण्डितानाम् अभिमतम् अस्ति यत् महाकविकालिदासस्य आविर्भावकालः खीष्टियचतुर्थशतके गुप्तयुगे वा आसीत्। भारतस्य इतिहासे गुप्तयुगः सुवर्णयुगः इति उच्यते।[86] महाकविकालिदासस्य रचनायां तत्कालीनभारतवर्षस्य सुखसमृद्धियुक्ता गौरवमयी गुप्तयुगीयप्रतिच्छविः समुपलभ्यते। गुप्तयुगस्य व्याप्तिः चतुर्थशतकतः षष्ठशतकपर्यन्तमिति पण्डितजनैः स्थिरीक्रियते।[87] गुप्तयुगस्य अन्यतमः नरपतिः आसीत् द्वितीयचन्द्रगुप्तः इति। अत्रभवान् विक्रमादित्यः इत्युपाधिं प्राप्तवान्[88]। अस्य विक्रमादित्यस्य सभायां नवरत्नरूपेण ये स्वनामधन्याः पण्डिताः आसन्[89] महाकविकालिदासः तेषु अन्यतमः आसीत्। केषांचित् मतेन द्वितीयचन्द्रगुप्तपुत्रस्य कुमारगुप्तस्य जन्मकाले महाकविकालिदासः

---

[83]. तत्रैव।

[84].D. K. Das, *SANSKRITA SAHITYER ITIHASA*, Sadesh, Kolkata, 2016, P- 117-119

[85].प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य कृतौ कथं परिषदो बहुमानः।, *मालविकाग्निमित्रम्,* प्रथमांकः, प्रस्तावनायाम्

[86]. V.A. Smith, *THE EARLY HISTORY OF INDIA*, Oxford University Press, London, 1914, P- 308

[87]. S. Chakraborty, *Abhijñānaśakuntalam,* Sanskrit Pustak Bhandar, 6th Ed., Kolkata, 2005, P- 40

[88]. तत्रैव,P- 43

[89]. धन्वन्तरिक्षपनकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य॥, *ज्योतिर्विदाभरणः,*ग्रन्थाध्यायनिरुपणप्रकरणम्, कारिका- 10

*कुमारसम्भवमिति* महाकाव्यं विरचितवान्।[90] *मालविकाग्निमित्र*नाटके अश्वमेधयज्ञस्य उल्लेखः समुद्रगुप्तस्य अश्वमेधयज्ञानुष्ठानं स्मारयति। *रघुवंशे*ऽपि आसमुद्रहिमाचलगतायां रघुदिग्विजयवर्णनायां समुद्रगुप्तकृतस्य समग्रभारतविजयस्य प्रतिच्छाया परिलक्ष्यते। एतदुपरि केषांचित् मतेन *विक्रमोर्वशीय*मिति नाटकस्य शिरोनामस्थितं विक्रम इति पदं राजानं विक्रमादित्यं सूचयति। तथाच *अभिज्ञानशकुन्तल*नाटके चीनांशुकस्य[91] उल्लेखः अस्ति। गुप्तयुगे चीनदेशेन सह भारतस्य वाणिज्यसम्पर्कः सुदृढः आसीत्[92] इति तु पण्डितानां सिद्धान्तः। अनेन प्रसङ्गपुष्टसिद्धान्तेन गुप्तयुगः महाकविकालिदासस्य आविर्भावकालः आसीत् इति म्याक्डोनेलादिपण्डितैः उच्यते स्वकीयानुभवप्रकाशेन।

म्याक्समूलार-हरप्रसादशास्त्रिप्रमुखानां पण्डितानां मतेन महाकविकालिदासस्य आविर्भावकालः खीष्टियषष्ठशतकः आसीत्।[93] गुप्तयुगस्य अन्यतमः नरपतिः आसीत् स्कन्दगुप्तः इति। द्वितीयचन्द्रगुप्तः इव स्कन्दगुप्तोऽपि विक्रमादित्यः इति उपाधिना विभूषितः आसीत्[94] इति वार्ता इतिहासे स्पष्टरूपेण वर्त्तते। एतत्सिद्धान्तसमर्थकानां मतेन स्कन्दगुप्तः हूनान् विजित्य विक्रमादित्योपाधिं प्राप्तवान्[95]। कालिदासस्य उपस्थितिः विक्रमादित्यसभायाम् आसीत् इति वचनेन स्कन्दगुप्तसभायां कालिदासस्य अवस्थानम् आसीत् इति अभिमतम् आदधाति बहुसंख्यकाः शास्त्रज्ञाः।

---

[90]A.B. Keith, *A History Of Sanskrit Literature*, Oxford University Press, London, 1920, P- 80

[91] राजा- गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥, *अभिज्ञानशकुन्तलम्*,प्रथमांकः, श्लोक- 31

[92]A.B. Keith, *A History Of Sanskrit Literature*, Oxford University Press, London, 1920, P- 75

[93] S. Chakraborty, *Abhijñānaśakuntalam,* Sanskrit Pustak Bhandar, 6th Ed., Kolkata, 2005, P- 44

[94] V. A. Smith, *The Early History Of India*, Oxford University Press, London, 1914, P- 311

[95] M. Winternitz, *History Of Indian Literature*, Vol-Iii, Motilal Banarsidass, Delhi, 1985, P- 43

विक्रमादित्यसभास्थेषु नवरत्नेषु कालिदासं व्यतिरिच्य अपरः एकः रत्नः वराहमिहिरोऽपि आसीत्। वराहमिहिरस्य आविर्भावकालः ख्रीष्टियषष्ठशतकः[96] आसीत् इति विषये पण्डितानां कोऽपि सन्देहः नास्ति। यतः महाकविकालिदासः वराहमिहिरस्य समसामयिकः आसीत्, अतः महाकविकालिदासस्य आविर्भावकालोऽपि षष्ठशतकः इति ग्रहीतुं शक्यते। अपि च कालिदासविरचिते *मेघदूते* दिङ्नागनिचुलयोः उल्लेखः वर्त्तते[97]। दिङ्नागाचार्यः वसुबन्धोः शिष्यः आसीत्। एषः दिङ्नागाचार्यः निचुलस्य मित्रमपि आसीत्। अयं दिङ्नागाचार्यः षष्ठशतकस्य आचार्यः आसीत्[98] इति पण्डितैः स्थिरीकृतमस्ति। तथा च चालुक्यराजस्य द्वितीयपुलकेशिनः राजत्वकाले जैनकविना रविकीर्तिना विरचितः आसीत् *आइहोल्*[99] इति शिलालेखः। तस्मिन् शिलालेखे कविकालिदासस्य नामोल्लेखः वर्त्तते। अयं शिलालेखः 634 शतके विरचितः अभवत् इति प्रमाणं विद्यते[100]। अतएव आइहोलशिलालेखकालात् प्रागेव कालिदासस्य समयः आसीत् इति निःसन्देहेन वक्तुं शक्यते।

किं बहुना, कान्यकुब्जनरपतेः हर्षवर्धनस्य समसामयिकः कविः वाणभट्टः तद्विरचिते *हर्षचरित*काव्ये कविकालिदासस्य स्तुतिं विदधाति।[101] अस्य राज्ञः हर्षवर्धनस्य शासनकालः 606 ख्रीष्टाब्दतः 647 ख्रीष्टाब्दपर्यन्तम्

---

[96].तत्रैव,P- 46

[97]. अद्रेः शृङ्गं हरति पवनः किं स्विदित्युन्मुखीभि-
र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः।
स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान्॥ ,*मेघदूतम्,*पूर्वमेघः, श्लोकः- 14

[98]. R. M. Bose, *KÂLIDÂSA: ABHIJÑÂNA-ŚAKUNTALAM,* Modern Book Agency Private Ltd., Calcutta, 1950, P- XXV-XXVI

[99].येनायोजि नवेश्मस्थिरमर्थविधौ विवेकिना जिनवेश्म।
स विजयतां रविकीर्तिः कविताश्रितकालिदासभारविकीर्तिः॥ ,*आइहोलप्रशस्तिः,* श्लोकः- 37

[100]. H. P. Ray, *ARCHAEOLOGY AND TEXT: THE TEMPLE IN SOUTH ASIA,*Oxford University Press, London, 2010, P- 17-18,27

[101].निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु।
प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते॥ ,*हर्षचरितम्,*प्रथमोच्छ्वासः, श्लोकः- 16

आसीत्[102] इति तु इतिहासकाराणां सिद्धान्तोऽस्ति। अतः महाकविकालिदासस्य आविर्भावकालः सप्तमशतकात्पूर्ववर्ती समयः आसीत् इति चिन्तयितुं शक्यते।

**कालिदासकृतयः**

संस्कृतसाहित्यजगति कविकालिदासकृतिरूपेण बहुसंख्यकानां काव्यानां नामानि परिलक्ष्यते। परन्तु निश्चितरूपेण तत्र सप्तसंख्यकानि काव्यानि कालिदासप्रणीतानि इति शिष्टजनानां मतम्। एषु सप्तसंख्यकेषु काव्येषु गीतिकाव्यद्वयं यथा-*ऋतुसंहारं, मेघदूतं* च, महाकाव्यद्वयं यथा-*कुमारसम्भवं, रघुवंशं* च, तथा च त्रीणि नाटकानि- *मालविकाग्निमित्र-विक्रमोर्वशीय-अभिज्ञानशकुन्तल*नामकानि वर्त्तन्ते। एतत् व्यतिरिच्य येषां काव्यानां रचकरूपेण कालिदासनाम आयाति तानि यथा- कुन्तेश्वरदौत्यम्, अम्बास्तवः, कल्याणस्तवः, कालीस्तोत्रं, काव्यनाटकालङ्काराः, गङ्गाष्टकम्, घटकर्परः, चण्डिकादण्डकस्तोत्रं, चर्चास्तवः, ज्योतिर्विदाभरणः, दुर्घटकाव्यं, नलोदयः, नवरत्नमाला, पुष्पवाणविलासः, मकरन्दस्तवः, मङ्गलाष्टकः, महापद्यषट्कः, रत्नकोशः, राक्षसकाव्यं, लक्ष्मीस्तवः, लघुस्तवः, विद्वद्विनादकाव्यं, वृन्दावनकाव्यं, वैद्यमनोरमा, शुद्धिचन्द्रिका, शृङ्गारतिलकः, शृङ्गारसाष्टकः, शृङ्गाररसारकाव्यं, श्रुतबोधः, सेतुबन्धः चेति।[103] एतानि काव्यानि सर्वाणि एकेन कालिदासेन न विरचितानि। वस्तुतः तत्समये कालिदासनामधारकाः अनेकाः कवयः आसन्।[104] अतएव कस्य कालिदासस्य का रचना विषयेऽस्मिन् सन्देहः वर्त्तते। प्रसङ्गेऽस्मिन् इदमपि उल्लेखनीयं यत् राजशेखरमतानुसारेण तत्काले त्रयः कालिदासाः आसन्।[105] अत्र

[102]V. A. Smith, *THE EARLY HISTORY OF INDIA,* Oxford University Press, London, 1914, P- 335

[103]M. R. KALE, *THE ABHIJÑÂNAŚAKUNTALAM OF KÂLIDÂSA,* 10thEdn. MotilalBanarsidass, Varanasi, 1969, P- 11

[104]तत्रैव।

[105]तत्रैव।

*रघुवंश*कारमहाकविकालिदासविरचितानां सर्वसन्मतसप्तसंख्यकानां काव्यानां परिचयः अत्र प्रस्तूयते।

*ऋतुसंहारम्- ऋतुसंहारमि*ति गीतिकाव्यं महाकविकालिदासस्य प्रथमा रचना इति मन्यते[106]। अस्मिन् काव्ये षट् सर्गाः सन्ति। काव्येऽस्मिन् प्राच्यभूखण्डगतषड्संख्यकानाम् ऋतूणां वर्णनम् अस्ति[107]। ऋतुमवलम्ब्य काव्यमिदं रचितम्, अतः अस्य काव्यस्य नाम ऋतुसंहारमिति। प्रायः164 संख्यकाः श्लोकाः अत्र सन्ति[108]। ऋतूणाम् आवर्तनेन प्रकृतिमध्ये मनुष्याणां मनोजगति च कीदृशी अनुभूतिः जायते तद्विषये महाकविः निपुणतया सर्वं गीतिकाव्येऽस्मिन् वर्णयति[109]। प्रकृतिं प्रति कालिदासस्य अनुरागाधिक्यं तु तदीयेषु सर्वेषु काव्येषु दरीदृश्यते। अस्मिन् ऋतुसंहारे एषः विषयः स्पष्टरूपेण प्रकटीकृतः महाकविना।

*मेघदूतम्- मेघदूतं* महाकविकालिदासस्य अत्युत्तमं गीतिकाव्यम्। अस्य काव्यस्य भागद्वयमस्ति- पूर्वमेघः उत्तरमेघः च। काव्येऽस्मिन् 118 श्लोकाः वर्तन्ते[110]। कश्चित् यक्षः कुवेरस्य उद्यानरक्षकः आसीत्। एकदा नवविवाहितः यक्षः सकर्तव्यपालने विफलः भूत्वा कुवेराभिशापात् प्रियावियुक्तः जातः। वत्सरपरिमितेन अभिशापेन यक्षः सुदूररामगिरिपर्वते निर्वासितः भवति। यक्षस्य निवासः हिमालयक्रोडस्थितायाम् अलकायामस्ति। यत्र तस्य प्रियतमा पत्नी एकाकिनी वर्त्तते। अभिशापस्य अष्टौ मासाः अतिक्रान्ताः, तदा आषाढस्य प्रथमदिवसे पर्वतस्य सानुदेशे नूतनं मेघखण्डं दृष्ट्वा विरही यक्षः तं मेघं दूतरूपेण स्वीकृत्य स्वप्रियासमक्षं स्वकीयकुशलवार्तावहनाय

---

[106]A.B. Keith, *A HISTORY OF SANSKRIT LITERATURE*, Oxford University Press, London, 1920, P- 82

[107]S. N. Dasgupta, *A HISTORY OF SANSKRIT LITERATURE,* Calcutta University Press, Calcutta, 1947, P- 123

[108]S. L. Sastri, *THE ṚITUSAMHĀRA OF KĀLIDĀSA*, Nirnay Sagar Press, Bombay, 1922

[109]नितान्तलाक्षारसरागरञ्जितैः नितम्बिनीनां चरनैः सनूपुरैः।
पदे पदे हंसरुतानुकारिभिर्जनस्य चित्तं क्रियते समन्मथम्। *ऋतुसंहारम्,* प्रथमः सर्गः, श्लोक- 5

[110]S. Chakraborty, *Meghadūtam,* Sanskrit Pustak Bhandar, 3th Ed., Kolkata, 2013

अनुरुद्धवान्[111]। स मेघः केन प्रकारेण गमिष्यति, यात्रापथे किं वस्तुजातं प्रत्यक्षीकृतं भविष्यति, कीदृशीं यक्षपत्नीं मेघः अवलोकयिष्यति इत्यादिविषयकं कथावस्तु काव्यस्य अस्य विषयः अस्ति। काव्यस्य पूर्वमेघांशे मेघस्य यात्रापथः वर्णितः अस्ति। उत्तरमेघांशे च अलकायाः सौन्दर्यं, यक्षप्रियायाः विरहकातरं रूपम्[112] इत्यादिविषयाणां वर्णनं विद्यते। काव्यमिदं मन्दाक्रान्ता इति छन्दसा विरचितम् अस्ति। न केवलं संस्कृतसाहित्ये, परन्तु विश्वसाहित्येऽपि मेघदूतं विशेषरूपेण समादृतं भवति। *मेघदूत*स्य पञ्चाशत्संख्यकाधिकाः टीकाः काव्यस्य अस्य जनप्रियतां प्रमाणीकुर्वन्ति। परवर्तिसमये *मेघदूत*मनुकरणेन बहूनि दूतकाव्यानि विरचितानि भवन्ति, यथा- हंसदूतं, पवनदूतं, मनोदूतं, शीलदूतं, चन्द्रदूतं, चकोरदूतं, कोकसन्देशः, कोकिलसन्देशः, मयूरसन्देशः इत्यादयः। तेषु दूतकाव्येषु धोयीरचितं *पवनदूत*नामकं दूतकाव्यं काव्यजगति समादृतं भवति।

*कुमारसम्भवम्- कुमारसम्भवम्* इति महाकाव्यं कालिदासस्य तरुणकालीना रचना। पण्डितानां मतेन सामान्यतया अस्य महाकाव्यस्य सप्तदश संख्यकाः सर्गाः उपलभ्यन्ते[113]। किन्तु बहुसंख्यकानां पण्डितानाम् एतदेव अभिमतं यत्सप्तमसर्गपर्यन्तं काव्यमिदं कालिदासेन विरचितम् अस्ति।[114] अवशिष्टाः सर्गाः परवर्तिकाले संयोजिताः जाताः।[115] आचार्येण

---

[111]सन्तप्तानां त्वमसि शरणं तत् पयोद प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
वाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या॥ ,*मेघदूतम्,* पूर्वमेघः, श्लोकः- 7

[112] उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चिद्
भूयोभूयः स्वयमपि कृतां मूर्छनां विस्मरन्ती॥, तत्रैव,श्लोकः- 25

[113] M. Krishnamachariar, *HISTORY OF CLASSICAL SANSKRIT LITERATURE,* Tirumalai-Tirupati Devasthanams Press, Madras, 1937, P- 114

[114] S. N. Dasgupta, *A HISTORY OF SANSKRIT LITERATURE,* Calcutta University Press, Calcutta, 1947, P- 126

मल्लिनाथेन अस्य काव्यस्य या टीका विरचिता अस्ति सा तु केवलं सप्तमसर्गपर्यन्तं वर्त्तते। नामकरणस्थितेन कुमार इति पदेन कार्तिकेयः बोध्यते। सम्भवः पदस्य अर्थः जन्म। अतएव *कुमारसम्भवम्* इति महाकाव्ये कार्तिकेयस्य जन्म सूचितं भवति। काव्यस्य अस्य अङ्गीरसः शृङ्गारः, यतोऽत्र पार्वतीपरमेश्वरयोः प्रेमभावः तज्जनितसन्तानोत्पत्तिः च मूलविषयरूपेण गृह्यते कविना। प्रसङ्गे अस्मिन् शृङ्गाररसलक्षणं सर्वथा प्रयुज्यते। *कुमारसम्भवम्* इति महाकाव्यस्य प्रथमसर्गे हिमालयस्य मनोरमा वर्णना[116] अस्ति, द्वितीयसर्गे तारकासुरोत्पीडितानां देवानां ब्रह्मासमीपं गमनम्, तृतीयसर्गे कामदेवेन शिवस्य योगभङ्गः, अकालवसन्तस्य आगमनम्, शिवनेत्राग्निना मदनस्यदहनम्[117], चतुर्थसर्गे मदनपत्न्याः रत्याः विलापः[118]च अस्ति। पञ्चमसर्गे पार्वत्याः तपश्चर्या[119], षष्ठसर्गे पार्वतीशिवयोः विवाहप्रस्तावः, सप्तमसर्गे तयोः परिणयः च दृश्यते। परवर्तिषु सर्गेषु तयोः सम्भोगः, कार्तिकस्य जन्मवृत्तान्तः वर्त्तते।

*रघुवंशम्- रघुवंशम्* इति महाकाव्यं कालिदासस्य अत्युत्तमा कृतिः। काव्येऽस्मिन् ऊनविंशतिः संख्यकाः सर्गाः सन्ति। रघुवंशीयप्रख्यातनृपतीनां चरितवर्णनम् अस्य महाकाव्यस्य कथावस्तु। महाकाव्यस्य अस्य अङ्गीरसः वीरः, यतः प्रतिसर्गम् अत्र वीरचरितवर्णनं मूलविषयरूपेण विद्यते।[120] राज्ञः दिलीपात् आरभ्य अग्निवर्णपर्यन्तम् ईक्ष्वाकुवंशीय-ऊनत्रिंशत्संख्यकानां राज्ञां

---

[115]M. Krishnamachariar, *HISTORY OF CLASSICAL SANSKRIT LITERATURE,* Tirumalai-Tirupati Devasthanams Press, Madras, 1937, P- 115

[116] अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः॥ *कुमारसम्भवम्,* प्रथमसर्गः, श्लो- 3

[117] तमाशु विघ्नं तपसस्तपस्वी वनस्पतिं वज्र इवावभज्य।
स्त्रीसन्निकर्षं परिहर्तुमिच्छन्नन्तर्दधे भूतपतिः सभूतः॥, तत्रैव, तृतीयः सर्गः, श्लोकः- 74

[118] कृतवानसि विप्रियं न मे प्रतिकूलं न च ते मया कृतम्।
किमकारणमेव दर्शनं विलपन्त्यै रतये न दीयते॥ ,तत्रैव, चतुर्थः सर्गः, श्लोकः- 7

[119] इयेष सा कर्तुमबन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः।
अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः॥, तत्रैव, पञ्चमः सर्गः, श्लोकः- 2

[120] उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः, *साहित्यदर्पणः,* तृतीयः परिच्छेदःकारिका- 234

जीवनकथा महाकाव्येऽस्मिन् उपलभ्यते। महाकाव्यस्य प्रथमसर्गे मङ्गलाचरणे पार्वतीपरमेश्वरयोः वन्दना, सूर्यवंशीयादिपुरुषस्य मनोः कथा, दिलीपकथा, सपत्नीकस्य दिलीपस्य वशिष्ठाश्रमगमनम् इत्यादिकं प्राप्यते। द्वितीयसर्गे सुदक्षिणासहयोगेन राज्ञः दिलीपस्य नन्दिनीसेवा, सन्तुष्टनन्दिन्याः वरदानम्, तृतीयसर्गे सुदक्षिणादिलीपयोः पुत्रागमनं[121] तदीयविद्याभ्यासः, विवाहः, दिलीपेन कृतम् अश्वमेधयज्ञानुष्ठानम्, यज्ञशेषे रघोः हस्ते राज्यभारं दत्वा वानप्रस्थावलम्बनम् इत्यादिविषयाणां वर्णनानि सन्ति। चतुर्थसर्गे रघोः दिग्विजययात्रा, तदीयसाम्राज्यविस्तृतिः, विश्वजित्यज्ञसम्पादनम् इत्यादिविषयाणां वर्णना प्राप्यते। अत्र प्राचीनभारतस्य राजनैतिकचित्रम् अङ्कितं वर्त्तते। पञ्चमसर्गे कौत्सस्य उपाख्यानमस्ति। षष्ठसर्गे इन्दुमत्याः स्वयम्वरवर्णना[122] अस्ति। सप्तमसर्गे इन्दुमत्याः विवाहः, अष्टमसर्गे इन्दुमत्याः आकस्मिकमृत्युः, पत्नीमृत्युशोकस्तब्धस्य अजस्य विलापः,[123] नवमदशमयोः सर्गयोः देवगणकृता नारायणस्तुतिः, रामरूपेण नारायणाविर्भावकथा, दशरथस्य पुत्रेष्टियागः, तस्य पुत्रप्राप्तिः एवंविधानां विषयाणां वर्णना अस्ति। एकादशसर्गात् पञ्चदशसर्गपर्यन्तं विद्यते रामस्य विद्याचर्चा, तद्विवाहः, तद्वनवासगमनं, रावणेन सीताहरणं, रामरावणयोः युद्धं, रावणवधः, रामलक्षणसीतानाम् अयोध्याप्रत्यागमनं, लोकापवादभयात् रामेण सीतापरित्यागः, लवकुशयोः जन्म, सपुत्रसीतया सह रामस्य पुनर्मिलनं, सीताया अग्निपरीक्षा, तस्याः पातालप्रवेशः इत्यादिविषयजातम् आकलितम् अस्ति। षोडशसर्गात् ऊनविंशतिसर्गपर्यन्तं कुश-अतिथि-निषध-नल-नाभ-पुण्डरीक-घोष-शङ्खन-व्युषिताश्व-विश्वसह-हिरण्यनाभ-कौशल्य-व्राह्मथ-पुत्र-पुण्य-ध्रुवसन्धि-सुदर्शन-अग्निवर्णानां राज्ञां संक्षिप्तविवरणं प्राप्यते।

---

[121] श्रुतस्य यायादयमन्तमर्भकस्तया परेषां युधि चेति पार्थिवः।
अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवम्॥, *कुमारसम्भवम्,*तृतीयः सर्गः, श्लोकः- 21

[122] स तत्र मञ्चेषु मनोज्ञवेषान् सिंहासनस्थानुपचारवत्सु।
वैमानिकानां मरुतामपश्यदाकृष्टलीलान्नरलोकपालान्॥ ,*कुमारसम्भवम्,* षष्ठः सर्गः, श्लोकः- 1

[123] विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम्।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु॥, तत्रैव,अष्टमः सर्गः, श्लोकः- 43

*मालविकाग्निमित्रम्*- *मालविकाग्निमित्रम्* इति अस्ति महाकविकालिदासस्य प्रथमा नाट्यकृतिः[124]। राजनैतिकपटभूमिम् अवलम्ब्य नाटकमिदं विरचितमस्ति। पञ्चांकसमन्वितं नाटकमिदम् प्रख्यातं वर्त्तते। विदर्भराजकन्यामालविकायाः अग्निमित्रेण सह प्रणयः अस्य नाटकस्य मूलवर्णनविषयः। नाटकस्य अङ्गीरसः शृङ्गारः, वीरस्तु अत्र अङ्गरसेषु अन्यतमः। काव्येऽस्मिन् दृश्यते यत् राज्ञः अग्निमित्रस्य पत्नीद्वयमस्ति- धारिणी इरावती च। विदर्भराजमाधवसेनः एकदा राज्यच्युतः जातः। स निश्चयमकरोत् यत्तद्भगिनीं मालविकां विदिशाधिपतेः अग्निमित्रस्य हस्ते समर्पयिष्यति। नाटके दृश्यते यत् विदिशागमनपथे दस्युना मालविका अपहृता। भाग्यचक्रेण अग्निमित्रस्य सेनापतिः वीरसेनः मालविकां परिरक्ष्य अग्निमित्रस्य प्रथमपत्न्याः धारिण्याः सेवायां नियुक्तवान्। ततः एकदा राजा अग्निमित्रः मालविकां दृष्ट्वा अत्यन्तं मुग्धः अभवत्[125]। मालविकां प्राप्तुं राजा अग्निमित्रः अत्यधिकौत्सुकः भवति। राज्ञी धारिणी तत् ज्ञात्वा मालविकां कारागृहे प्रेषयति। परन्तु विदूषकस्य सहायेन पश्चात् मालविका कारागृहात् मुक्ता जाता। इत्यवसरे वीरसेनः माधवसेनमपि मुक्तं कृतवान्। ततःमालविका माधवसेनभगिनी भवति इति सर्वैः ज्ञायते। अतः धारिणी स्वेच्छया राज्ञः अग्निमित्रस्य हस्ते मालविकां समर्पयति[126] सपत्नीरूपेणापि मालविकां स्वीकृतवती च। एवं नाटकस्य परिसमाप्तिः परिलक्ष्यते।

*विक्रमोर्वशीयम्*- महाकविकालिदासेन विरचितं *विक्रमोर्वशीयम्* त्रोटकजातीयमुपरूपकम्[127]। उर्वशी-पुरुरवसोः प्रणयः अस्य दृश्यकाव्यस्य

---

[124] S. N. Dasgupta, *A HISTORY OF SANSKRIT LITERATURE,* Calcutta University Press, Calcutta, 1947, P- 136

[125]राजा- दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः
संक्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव।
मध्यः पाणिमितो नितम्बि जघनं पादावरालाङ्गुली
छन्दो नर्तयितुर्यथैव मनसि श्लिष्टं तथास्या वपुः॥, *मालविकाग्निमित्रम्,* द्वितीयांकः, श्लोकः- 3

[126]धारिणी- इदमार्यपुत्रः प्रियनिवेदनानुरूपं पारितोषकं प्रतीच्छत्विति, तत्रैव,पञ्चमांकः, गद्यांशः

[127] M. Krishnamachariar, *HISTORY OF CLASSICAL SANSKRIT LITERATURE,* Tirumalai-Tirupati Devasthanams Press, Madras, 1937, P- 548

मूलवर्णनाविषयः। ऋग्वेदे[128], मत्स्यपुराणे[129], महाभारते च उर्वशी-पुरुरवाख्यानं दृश्यते। रूपकेऽस्मिन् पञ्चांकाः सन्ति। काव्यस्य अङ्गीरसः शृङ्गारः, करुणस्तु अत्र अङ्गरसेषु अन्यतमः। एकदा केशीनामकः एकः असुरः उर्वशीम् अपहर्तुं यतते। तदा प्रतिष्ठानपुराधिपतिः पुरूरवा स्वकीयविक्रमेण केशीं विजित्य उर्वशीम् उद्धरति। प्रथमदर्शने एव उर्वशीपुरूरवा च परस्परं प्रति आकृष्टः जातः[130]। पुरूरवा मर्त्ये वर्त्तते किन्तु उर्वशी इन्द्रस्य आह्वानेन स्वर्गं गच्छति। स्वर्गे पुनः लक्ष्मीस्वयम्वरम् इति नाटकस्य अभिनयः भवति। तत्र उर्वशी लक्ष्मीभूमिकाम् निर्वहति। तदा मेनका उर्वशीं पृच्छति यत् कं प्रति तदीयं प्रेम वर्त्तते, तत्प्रश्नस्य उत्तरप्रदानकाले उर्वशी पुरुषोत्तमनाम न उक्त्वा असावधानतया पुरुरवनाम उक्तवती[131]। तदा क्रुद्धः भरताचार्यः उर्वशीं मर्त्यगमनरूपाभिशापेन शपति[132]। उर्वशी शापेन वरः लभते। तदा उर्वशी मर्त्ये वधूवेशेन तिष्ठति। किन्तु इन्द्रस्य पणः अस्ति, यदा उर्वशी पुत्रस्य मुखदर्शनं करिष्यति, तदा मर्त्यमानवस्य प्रणयबन्धनं छित्त्वा सा स्वर्गम् प्रत्यागमिष्यति[133]। एवंप्रकारेण बहुघटनवर्णनान्तरम् अस्य दृश्यकाव्यस्य परिसमाप्तिः भवति।

*अभिज्ञानशकुन्तलम्*- *अभिज्ञानशकुन्तलम्* इति नाटकं महाकविकालिदासस्य सर्वश्रेष्ठा काव्यकृतिः[134]। शकुन्तलादुष्यन्तयोः प्रणयः अस्य नाटकस्य मूलोपजीव्यविषयः। नाटकस्य मूलं वेदव्यासेन विरचितं

---

[128] *ऋग्वेदः*, मण्डलम्- 10, सूक्तम्- 95

[129] *मत्सपुराणम्*, अध्यायः- 25

[130] राजा- यदयं रथसंक्षोभादंसेनांसो रथोपमश्रोण्याः।
स्पृष्टः सरोमविक्रियमङ्कुरितं मनसिजेनेव॥, *विक्रमोर्वशीयम्*, प्रथमांकः, श्लोकः- 12

[131] द्वितीयः- ततस्तया पुरुषोत्तम इति भणितव्ये पुरूरवसीति निर्गता वाणी।, तत्रैव, तृतीयांकः, गद्यांशः

[132] द्वितीयः- येन ममोपदेशस्त्वया लङ्घितस्तेन न ते दिव्यं स्थानं भविष्यतीत्युपाध्यायस्य शापः।, तत्रैव

[133] उर्वशी- यदा स मम प्रियसखो राजर्षिस्त्वयि समुत्पन्नस्य वंशकारस्य मुखं प्रेक्षिष्यते तदा त्वया भूयोऽपि ममसमीपमागन्तव्यमिति।, तत्रैव, पञ्चमांकः, गद्यांशः

[134] R. M. Bose, *KÂLIDÂSA: ABHIJÑÂNA-ŚAKUNTALAM,* Modern Book Agency Private Ltd., Calcutta, 1950, P- LXVI

महाभारतम्[135]। नाटकेऽस्मिन् सप्तांकाः विद्यन्ते। नाटकस्य अस्य नायकः राजा दुष्यन्तः, नायिका च शकुन्तला। शकुन्तलायाः जन्मदाता पिता महर्षिविश्वामित्रः, माता च मेनका। जन्मनः पश्चात् सा पितृभ्यां परित्यक्ता। वने परित्यक्ता शकुन्तला शकुन्तपक्षिणालालिता पालिता च[136]। एवंकारणेन तस्याः नाम शकुन्तला भवति इति। एकदा महर्षिकण्वः शकुन्तपक्षिणा परिपालितां शकुन्तलां दृष्ट्वा तां तदीयाश्रमे आनीतवान्[137]। नाटकस्य अस्य कथावस्तु यद् राजा दुष्यन्तः मृगयार्थं निर्गम्य मालिनीनदीतीरे महर्षिकण्वस्य आश्रमम् आगतवान्। तत्र राजा दुष्यन्तः कण्वस्य पालिताकन्यां शकुन्तलां दृष्ट्वा तां प्रति प्रणयाकृष्टो भूत्वा गान्धर्वमतेन तत्पाणिग्रहणं कृतवान्। राजा दुष्यन्तः शकुन्तलां राजान्तःपुरं नेष्यति इति प्रतिश्रुतिं विधाय स राजधानीं गन्तुम् उद्यतो जातः। गमनात् प्राक् राजा दुष्यन्तः स्वनामांकितम् अङ्गुरीयकम् एकं शकुन्तलायै दत्तवान्। एतदवसरे महर्षिः दुर्वासा आश्रमम् आगम्य अतिथिसत्काराभावात् क्रुद्धः भूत्वा शकुन्तलां शपति यत्तस्याः प्रणयी प्रमत्तव्यक्तिरिव तां कदापि न स्मरिष्यति[138] इति। ततःअनसूयाप्रियंवदयोः प्रचेष्टया एषा शकुन्तलायाः प्रथमा त्रुटिः इति कारणात् एषः मुनिः अभिज्ञानाभरणदर्शनेण शापस्य अवसानं भविष्यति इति अभिशापस्य क्षीणत्वं प्रकाशितवान्। ततः राजधानीगमनकाले शकुन्तलाहस्तात् राजनामांकितम् अङ्गुरीयकं जले निपतति। अत: राजधानीमागम्य राज्ञः समीपे उपस्थिता शकुन्तला शापकारणात् विस्मृतिविद्धस्तस्य राज्ञः सन्मुखे विवाहचिह्नरूपेण स्थितं अङ्गुरीयकं प्रदर्शयितुम् असमर्था जाता[139]। अतएव सा राज्ञा दुष्यन्तेन

---

[135]तत्रैव, P- LIII

[136]M. R. KALE, *THE ABHIJÑÂNAŠAKUNTALAM OF KÂLIDÂSA,* 10thEdn. MotilalBanarsidass, Varanasi, 1969, P- 57

[137]तत्रैव।

[138]विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोअपि सन्
कथां प्रमत्तः प्रथमं कृतामिव॥, *अभिज्ञानशकुन्तलम्,* चतुर्थांकः, श्लोकः- 1

[139]शकुन्तला- (मुद्रास्थानं परामृश्य) हा धिक्। अङ्गुलीयकशून्या मे अङ्गुलिः।, तत्रैव, पञ्चमांकः,गद्यांशः

अभिशापकारणात् प्रत्याख्याता अभवत्[140]। ततः विविधघटनाप्रवाहात् पश्चात् धीवरात् अङ्गुरीयकं प्राप्य राजा दुष्यन्तः सर्ववृत्तान्तं ज्ञात्वा पुरातनघटनम् अनुस्मृत्य मारीचाश्रमम् आगत्य सपुत्रशकुन्तलया सह पुनः मिलितो भवति।[141] अनेन नाटकस्य अस्य सफलसमाप्तिः जायते।

❖❖❖

[140]राजा- किं चात्रभवती मया परिणीतपूर्वा ? तत्रैव।

[141]मारीचः- दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान्।
श्रद्धा वित्तं विधिश्चेति त्रितयं तत् समागतम्॥ तत्रैव, सप्तमांकः, श्लोकः- 29

# Pāṇinīyaśikṣā: A Sanskrit Phonetic Reference Manual

Dr. Anirban Dash

## Introduction:

The word 'Veda'[142] means wisdom. It is considered as the earliest sacred scripture of India. The six auxiliary sciences were developed for the preservation of the Vedas known as Vedāṅgas i.e. 1. śikṣā (the science of articulation and pronunciation), 2. kalpa (text related to prescribing rituals and giving rules for sacrificial acts), 3. vyākaraṇa (the science of grammar), 4. nirukta (the science of etymological interpretation of words), 5. Chandas (the science of metre) 6. jyotiṣa (the science of astronomy). The term 'aṅga' in 'vedāṅga' may even be taken to mean limb. Therefore, the chandas is considered as feet, kalpa as hands, jyotiṣa as eyes, nirukta as ears, śikṣā as nose and vyākaraṇa as the mouth of the Vedas [143]. It is for this reason that one studying the Veda with all its limbs attains the highest position in the realm of Brahma. Each of these vedāṅgas has its own special importance in comprehending and facilitating the Vedic studies.

---

[142] Vedic period from the 1500 to 1000 BCE (According to Max Müller)（Max Müller）1500 -1000

[143]chandaḥ pādau tu vedasya hastau kalpo'tha paṭhyate /
jyotiṣāmayanaṃ cakṣur niruktaṃ śrotramucyate //
śikṣā ghrāṇaṃ tu vedasya mukhaṃ vyākaraṇaṃ smṛtam /
tasmāt sāṅgamadhītyaiva brahmaloke mahīyate//
Pāṇinīya-śikṣā 41-42

Specimen as follows:




The earliest reference with regard to the number of the Vedāṅgas occurs in ṣaḍviṃśa-brāhmaṇa of Sāmaveda[144]. A passage quoted in the Mahābhāṣya under the name of '*āgama*' is a clear confirmation about the existence of vedāṅga at that time. The meaning of that passage is: "A brahmin should (learn to) recite (and) should understand the Veda along with its auxiliary sciences without expecting any reward"[145].

To justify the requisite of this conference, I would like to present you the Pāṇinīyaśikṣā: A Sanskrit Phonetic Reference Manual, for the better understanding of the ancient Sanskrit phonetic structures. I will begin by explaining the purpose of the śikṣā text before going into a more detailed analysis of the various aspects of it. I will conclude by introducing some of the most important phonetic

---

[144] Winternitz,vol. I, p.191

[145] āgamaḥ khalvapi / brāhmaṇena niṣkāraṇo dharmaḥ ṣaḍaṅgo vedo'dhyeyo jñeyaśca iti / pradhānaṃ ca ṣaṭsvaṅgeṣu vyākaraṇam / pradhāne ca kṛto yatnaḥ phalavābhavati – Paspaśāhnika, p.7

techniques used in Vedic and as well as in the classical Sanskrit.

Treatise on "phonetics" generally divided into two types i.e. śikṣā and prātiśākhya. Both deal with Vedic and their recitation rather than Sanskrit or Vedic language as such. This makes phonetic manual very special in some sense. The observations contained in the phonetic manuals are of non-generalized, highly specific nature, and thus they provide a microscopically detailed picture of the sounds of Sanskrit as used in specific oral scriptural traditions. They contain a highly developed set of analytic tools and terminology which has won the admiration of Western linguistics and Sanskritits ever since the discovery of Sanskrit by the West (cf. Whitney 1866; Allen 1953:3ff.)

The ancient great seers have laid down specific instructions for the Vedic recitations. It is recommended that; the teacher should face to east or north or north-eastwards and recite the text. It would be proper for the disciple to listen to the recital and learn it thoroughly. The science that deals with this branch of teaching is called śikṣā. Sāyaṇācārya defines the meaning of the word śikṣā in Ṛk-bhāṣyabhūmikā as follows: "where the manner of the pronunciation of accents and alphabets are learnt and taught is called śikṣā."[146]

The term śīkṣā is derived from the root 'śikṣ' means desire to be able to learn. Therefore, the knowledge of *śikṣā* was preliminary to study the Vedas. Authentic recitation of the Vedic texts is depended upon its proper pronunciation[147]. This point is made clear in the Ṛg-Veda i.e. "yadeṣām anyo

[146]svaravarṇāḥ uccāraṇa-prakāro yatra śikṣyate upadiśyate sā śikṣā
[147] vāca uccāraṇe vidhim pā. Śi V.Ed. V.2

मध्ये विविधमतभेदः परिलक्ष्यते। केचन तु लवङ्गीविषयं सत्यरूपेण केचन तु मिथ्यारूपेण विषयमिदं विवेचितम्। किंवदन्त्याः सत्यासत्यताविवेचनायाः प्रागेव लवङ्गीविषयं परिस्फुटनीयमस्माकम्। केषाञ्चन मते लवङ्गी आसीत् अकबरस्य कन्या[215]। एकस्मिन् दिवसे जगन्नाथेन सह वार्तालापसमये तत्र लवङ्गी नाम यवनकन्यायाः मस्तके जलपूर्णघटनिधाय प्रवेशः अभवत्। तदा अकबरेणादिष्टः जगन्नाथः मस्तकोपरिघटसहितायाः लवङ्ग्याः रूपवर्णनप्रसङ्गेनोक्तम् -

इयं सुस्तनी मस्तकन्यस्तकुम्भा
कुसुम्भारुणं चारुचैलं दधाना।
समस्तस्य लोकस्य चेतः प्रवृत्तिं
गृहीत्वा घटे न्यस्य यातीव भाति॥[216]

जगन्नाथस्य एतादृशवर्णनं श्रुत्वा मुग्धः सन् अकबरः जगन्नाथं यथामति इप्सितविषयं याचितुमवदत्। पण्डितराजस्तु यवनकन्यां प्रथमदर्शनैव तस्याः रूपलावण्येन अतिशयमुग्धः अभवत्। यवनरमण्याः रूपमुग्धः जगन्नाथः तदावसरे स्वीयाभिलाषः पूरणार्थमुक्तम् –

न याचे गजालिं न वा वाजिराजिं न वित्तेषु चित्तं मदीयं कदापि।
इयं सुस्तनी हस्तविन्यस्तकुम्भा लवङ्गी कुरङ्गी दृगङ्गीकरोतु॥[217]

अनन्तरं वचनवद्धेन अकबरेण जगन्नाथस्य एतादृशा अयाचितयाचना स्वीकृता। परन्तु केषाञ्चित् पण्डितानां मतानुसारेण पण्डितराजः शाहजहानृपस्य आश्रितासीत् न तु अकबरस्य[218]। पण्डितराजेन शाहजहानृपसमीपतः लवङ्गीं याचितवानिति। विवाहानन्तरं तत्कालीनसमाजः जगन्नाथस्य अनेन असवर्णसम्बन्धेन असन्तुष्टः जातः। यवनरमणी-संसर्गदोषात् जगन्नाथः समाजवहिष्कृतः अभवत्। अनन्तरं सः वाराणसीं गत्वा गङ्गातटे आश्रयं लव्धवान्। श्रूयते तदा परमदुःखवशादेव गङ्गालहरीद्वारा गङ्गामातुः स्तुतिः विहिता जगन्नाथेन। अनन्तरं गङ्गा तस्यावेगाप्लुतया रचनया प्रभावितः सपत्नीजगन्नाथं प्लावितवतीति, अथवा विवाहानन्तरं पत्नीवियोगेन

---

215 पण्डितराजजगन्नाथ-शेमुषीसमुन्मीलन,मनुलता शर्मा, पृ-१४-१५
भामिनीविलासः, हरदत्तशर्मा (भूमिकांश) पृ, ४-५
216 पण्डितराजकाव्यसंग्रहः, लवङ्गीप्रशंसायाम्, पद्य-५८४
217 पण्डितराजकाव्यसंग्रहः, लवङ्गीप्रशंसायाम्, पद्य-५८२
218 पण्डितराजजगन्नाथ-शेमुषीसमुन्मीलन,मनुलता शर्मा, पृ-१६

व्यथितः सन् वाराणसीं गत्वा गङ्गास्तुतिः कृता गङ्गा च तं स्वक्रोडे परमस्नेहेन गृहीतवतीति[219]। अतः अनुमीयते उक्तकिंवदन्त्यानुसारं यत् गङ्गास्तुतिपरका गङ्गालहरी एव जगन्नाथस्यान्तिमरचना इति।

**लवङ्गीवृत्तान्तस्य समीक्षणम्**

पण्डितराजस्य जीवने लवङ्गी नाम यवनरमणीमाश्रित्य उक्तकिंवदन्ती यद्यपि बहुरोचका प्रतीयते विपक्षीयानां मध्ये तथापि तेषां यथार्थतायाः विषये पण्डितानामैक्यमतं न तादृशं परिलक्ष्यते। ऐतिहासिकदृष्ट्या जगन्नाथसम्पर्कित-तथ्यानाञ्च परिशीलनेन अस्याः किंवदन्त्याः ग्रहणयोग्यता तथा सार्विकसत्यता तु न विश्वसनीया इति। मूलतः बहुप्रतिभाधरस्य पण्डितराजस्य चरित्रोपरि विरोधिनां विरोधतैव यवनरमणीसंसर्गदोषरूपपङ्कस्य प्रक्षिप्तत्वेन जनसमाजे प्रचलितासीत्। समग्रतथ्यानां विश्लेषनेन प्रस्तुतानां केचित विन्दुभिः पण्डितराजस्य जीवनसम्बन्धं लवङ्गीवृत्तान्तं मिथ्यात्वं प्रतीयते सर्वैव -

केषाञ्चन जनानां मतानुसारेण जगन्नाथस्य सम्बन्धम् अकबरेण सह स्थापयित्वा लवङ्गी नाम यवनकन्याम् अकबरस्य कन्यारूपेण परिगणितम्। परन्तु विषयमिदं न तु समर्थनीयम्। ऐतिहासिकदृष्ट्या अकबरसम्बन्धीयग्रन्थेषु कुत्रापि लवङ्ग्याः नामोल्लेखः न प्राप्तः। अपि च अकबरस्य पुत्ररूपेण जहांगीरः एव सर्वजनप्रसिद्धः भवति। यदि लवङ्गी अकबरस्य पुत्री स्यात्तर्हि जहांगीरेण सह लवङ्गी भगिनीसम्बन्धाबद्धा भवति। परन्तु कुत्रापि लवङ्ग्या सह तस्य भ्राता-भगिनीसम्बन्धस्य प्रमाणं न लब्धम्[220]। अतः जगन्नाथेन सह लवङ्ग्याः अकबरस्य वा सम्बन्धविषयः नूनमिति प्रवादोऽयं प्रतिभाति।

यदि लवङ्गी अकबरस्यैव पुत्रीति स्वीक्रियते तथापि विषयमिदं न वास्तवपरकम् असंलग्नत्वेन वा प्रतीयते यत् अकबरसदृशेन नृपेण कथमगणिपरिचारिकाः विहाय स्वपुत्रीं जलानयनायादिष्टवान् इति। यदि वा सा आदिष्टा तथापि अकबरेण स्वकन्यायाः मस्तके जलपूर्णघटसहितायाः रूपलावण्यवर्णने विधर्मी अज्ञातपुरुषः नियुक्तः इति विषयस्तु अलीक-असम्भवत्वेन प्रतिभाति। अतः अकबरेण सह लवङ्गीसम्बन्धस्तथा लवङ्ग्या सह जगन्नाथस्य परिणयविषयोऽपि सर्वथा मिथ्यैवेति अनुमीयते।

---

219 जगन्नाथपण्डितः,भि.ए.रामास्वमी,पृ-१९-२०
भामिनीविलासः, हरदत्तशर्मा, (भूमिकांश) पृ, ४-५
220 पण्डितराजजगन्नाथ-शेमुषीसमुन्मीलन,मनुलता शर्मा, पृ-१७- १८

केचन विद्वांसः पुनः लवङ्गीं शाहजाहानृपस्य कन्यारूपेण उपस्थापयन्ति तथा प्रचलितायाः कथायाः सम्बन्धं शाहजाहानृपेण सह स्थापयितुमिच्छति। ऐतिहासिकग्रन्थानां परिशीलनेन ड.भि.ए. रामास्वामी-महोदयस्य मते शाहजहानृपेण तस्मिन् समये भिन्नधर्मावलम्बिभिः सह यवनरमणीनां प्रणयविषयः निषिद्धः कृतः।[221] अतएव शाहजहानेन स्वपुत्री पण्डितराजाय सम्प्रदत्ता इति विषयमपि असम्भवं प्रतिभाति, लवङ्गीप्रणयप्रसङ्गोऽपि सर्वैव मिथ्येति अनुमीयते इति।

अनन्तरं यवनरमणीसंसर्गदोषात् पण्डितराजः समाजवहिष्कृतः सन् वाराणसीमागत्य गङ्गालहरी नाम गङ्गास्तुतिद्वारा गङ्गायां निमज्जीतवानिति विषयं यदि सत्यं स्यात्तर्हि गङ्गास्तुतिपरका गङ्गालहरी एव पण्डितराजस्यान्तिमरचना भवितुमर्हति। परन्तु एतदपि मिथ्यात्वेन परिगणितम्। यतः पण्डितराजेन स्वयमेव तस्य प्रमुखप्रसिद्धग्रन्थे रसगङ्गाधरे तस्य पञ्चलहरीनामोल्लेखः कृतः। अतः दृश्यते – '**मन्निर्मिता पञ्चलहर्यः भावस्य**'[222] इति। अपि च गङ्गालहर्याः प्रथम-पञ्चदश-एकादशश्लोकास्तु रसगङ्गाधरे जगन्नाथेन उदाहरणस्वरूपेण उल्लिख्यते।[223] यदि गङ्गास्तुतेरनन्तरं सपत्नीजगन्नाथेन गङ्गासलिले निमज्जितमिति तर्हि कथमेतत् सम्भवपरं भवेदिति। अतः लवङ्ग्या सह जीवनविसर्जनविषयमपि न तु प्रमाणितम्, सर्वैव विपक्षीयानां कल्पना मित्याप्रलापेव प्रतिभाति।

लवङ्गीसम्बन्धानां पद्यानामाधारिकृत्य ये समालोचकाः पण्डितराजस्य सम्बन्धं लवङ्ग्या सह कर्तुमिच्छन्ति तेषां युक्तिरेषापि तु न ग्रहणीया। रामास्वामिनः मतानुसारेण लवङ्गी यदि पण्डितराजस्य पत्न्यासीत्, तया सह यदि जगन्नाथस्य किञ्चिदपि प्रणयविषयः आसीत्तर्हि कथं तामधिकृत्य पद्यानि सर्वानि तस्य प्रसिद्धग्रन्थेषु नोल्लिखितानि। अपि च भामिनीविलासस्य सम्भोगश्रृङ्गारे, शाव्तविलासे पत्नीवियोगजनिते शोकविलापे वा लवङ्गीप्रसङ्गः कथं न स्थापनीयः इति[224]। यद्यपि पण्डितराजेन तदीयकाव्यस्य उदाहरणत्वेन स्वरचितानि पद्यान्येव संगृहीतानि। एतद्विषये पण्डितराजेन स्वयमेवोक्तम् –

निर्माय नूतनमुदाहरणानुरूपं

[221] जगन्नाथ पण्डित, वि.ए.रामास्वामी,पृ-२१
[222] पण्डितराजकाव्यसंग्रहः (भूमिकांशः),पृ-६
[223] तत्रैव
[224] जगन्नाथपण्डितः, भि.ए.रामास्वामी,पृ-२०-२१

काव्यं मयाऽत्र निहितं न परस्य किञ्चित्।
किं सेव्यते सुमनसां मनसाऽपि गन्धः
कस्तुरिकाजननशक्तिभृता मृगेण॥[225]

तथापि लवङ्गीसम्बन्धानां लिखितपद्यानां कुत्रापि न स्थानं परिलक्ष्यते। पुनः पण्डितराजेन स्वयमेव लिखितम् –

दुर्वृत्ता जारजन्मानो हरिष्यन्तीति शङ्कया।
मदीयपद्यरत्नानाम्मञ्जुषैषा मया कृता॥[226]

अतः लवङ्गीसम्बन्धानां श्लोकानां पण्डितराजेन तस्य भामिनीविलासे तेषामुपनिबन्धनं कथं न कृतमिति। अनेनानुमीयते यत् लवङ्गीसम्बन्धानि सर्वाणि पद्यानि पृथकतया अपरैः संयोजितानीति। वस्तुतः किंवदन्त्यः काल्पनिकविषयात्मिकाः भवन्ति। लवङ्गीसम्बन्धा जनश्रुतिरपि प्रलापः एव। एतस्याः किंवदन्त्याः समर्थनं गतानुगतिकचिन्ताधारायाः प्रकाशः एव। रामास्वामिनः मतानुसारेण लवङ्गीप्रणयप्रसङ्गं मिथ्यैव प्रतीयते यतः कुत्रापि जगन्नाथेन तस्य समग्ररचनासु यवनरमणी तथा यवनरमण्याः सौन्दर्यविषयं नोपस्थापितम्[227]।

अनेन प्रकारेण उक्तानां तथ्यसूत्राधारेण जगन्नाथसम्बन्धं लवङ्गीवृत्तान्तं तु विरोधिनां मिथ्याप्रचारस्तथा पण्डितराजस्य चरित्रस्योपरि कलङ्कप्रदानेच्छा प्रतीयते। किंवदन्ती तु कल्पनाप्रसूतानाम् अलीकविषयानां सारमेव, परन्तु एतदपि सत्यं यत् किंवदन्त्याः बास्तविकता पूर्णतया यद्यपि न सम्भवति तथापि सम्पूर्णरूपेणापि कल्पनाप्रसूता वास्तववर्जिता न भवति। किंवदन्त्याः सत्यविन्दुः अवश्यमेवास्ति यद्यपि तत्र सत्यांशानि नाममात्रानि एव वा। लवङ्गीवृत्तान्तं सत्यत्वेन ग्रहणे विन्दवः यथा -

लवङ्गीविषयस्य प्राचीनता अस्याः किंवदन्त्याः यथार्थतायाः प्रमाणमेव[228]। अस्याः प्राचीनतायाः कारणादेव ड.आर्येन्द्रशर्मणा, ड.मञ्जुलताशर्ममहोदययापि किंवदन्तीनां सत्यताविषयं सम्पूर्णरूपेण नास्वीकृतम् इति।

---

[225] रसगङ्गाधरः, १/६
[226] भामिनीविलासः(शान्तविलासः)- ४६
[227] जगन्नाथपण्डितः,भि.ए.रामास्वामी,पृ-२१
[228] पण्डितराजजगन्नाथ-शेमुषीसमुन्मीलन, मनुलता शर्मा, पृ-२४

जगन्नाथस्य प्राप्तग्रन्थेषु उक्तलवङ्गीप्रशस्तीनामुल्लेखः यद्यपि नोपलभ्यते तथापि एतत्तु न प्रमाणितं यत् तस्य प्राप्तग्रन्थानाम् अप्रकाशितांशे तेषामुल्लेखः न भवेदिति[229]। सर्वेषामेव कवीनां रचनायां तस्य जीवनाधारितस्य सकलविषयस्योल्लेखः न तु अत्यावश्यकरूपेण ग्रन्थमध्येषु प्रदीयते।

अधिकस्तु पण्डितराजस्य लिखनकौशलमपि लवङ्गीसम्बन्धानां पद्यानामस्तित्वविषये उत्तमप्रमाणं भवितुमर्हति। शैलीगतदृष्ट्या दृश्यते यत्, पण्डितराजस्य रचना तु मुलतः माधुर्य-प्रसाद-गुणसम्पन्ना, गीतात्मका, तथा अनुप्रासादिशब्दालङ्कारविभूषिता भवति। लवङ्गीविषयकेषु पद्येष्वपि उक्तशैली नितरामनुभूयते। लवङ्गीविषये पद्यानि यथा –

यवनी नवनीतकोमलाङ्गी शयनीयं यदि नीयते कदाचिद्।
अवनीतलमेव साधु मन्ये न वनी माघवनी विनोदहेतुः॥
यवनी रमणी विपदः शमनी कमनीयतमा नवनीतसमा।
उहिऊहिवचोऽमृतपूर्णमुखी स सुखी जगतीह यदङ्कगता॥[230]

उक्तपद्येषु 'गजालिं-वाजिराजिं', 'यवनी-रमणी-शमनी', 'लवङ्गी-कुरङ्गी-दृगङ्गी', 'कमनीयता-नवनीतसमा', 'पूर्णमुखी-सुखी', 'भासमाना-रम्भासमाना', प्रभृतयः स्थानेषु अनुप्रासिकता नितरां दृश्यते। अतः एतस्याः भाषारीत्यानुसारेण लवङ्गीविषयकपद्यानि पण्डितराजस्यैव लेखनीप्रसूतानि इति अनुमीयते। अनेन लवङ्गीसम्बन्धायाः किंवदन्त्याः सत्यताविषयोऽपि प्रबलः भवति।

उक्तालोचनया पर्यालोचनया वा वक्तुं शक्यते यत् जगन्नाथस्य जीवने लवङ्गी नाम यवनतमण्याः प्रभावः पूर्णतया न परिलक्षितं सर्वमेव न सत्यमिति। परन्तु मुघलसमये पण्डितराजस्य परिचयः काचित् यवनकन्यया सहाभवतिति तु अनस्वीकार्यम्। आर्येन्द्रशर्मणापि तस्य पण्डितराजकाव्यसंग्रहे विषयमिदं समर्थ्य उक्तम् – 'Presuming that the well-known Lavangi verses are genuine, the story that Panditaraja fell in love with a Muslim girl in the Mughal Court may also be true'.[231]

---

229 पण्डितराजजगन्नाथ-शेमुषीसमुन्मीलन, मनुलता शर्मा, पृ-२२
230 पण्डितराजकाव्यसंग्रहः(लवङ्गीप्रशंसायाम्) पृ-१९०. ५८५-५८६
231 पण्डितराजकाव्यसंग्रहः (भूमिकांशः) पृ-१०

अतः किंवदन्त्यानुसारं लवङ्गीसम्बन्धं सम्पूर्णविषयं तु मिथ्याप्रलापत्वेन असत्यरूपेण तु यद्यपि परिगणितं तथापि पण्डितराजस्य जीवने काचित् यवनरमणी अवश्यमेवासीत् अपि च तस्य फलस्वरूपेण समाजस्थितानां ब्राह्मणानां रोषानले अपि स पतितः इति विषयोऽयं नोपेक्षणीयः इति।

**सहायकग्रन्थपञ्जी**


- शर्मा, आर्येन्द्रः, पण्डितराजकाव्यसंग्रहः, उसमानियाविश्वविद्यालयः, हैद्रावादः, प्रथमसंस्करणम्, १९५८
- पण्डितराजजगन्नाथः, लहरीपञ्चकम् (चन्द्रप्रभाख्याया संस्कृतव्याख्यया समन्वितम्), वाचस्पतिभुवनेश्वरकरशर्मा, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, प्रथमसंस्करणम्, २०१०
- पण्डितराजजगन्नाथः, रसगङ्गाधरः(मर्मप्रकाशटीकासहितः), सम्पा. सन्ध्या भादुडी, संस्कृत-पुस्तक-भाण्डारः, कलिकाता।
- शास्त्री, भि.ए.रामास्वामी, जगन्नाथपण्डितः, जोसेफ्-इन्डास्ट्रियाल-स्कुल-प्रेसः, आन्नामालाइनगरम्, १९४२
- शर्मा, मनुलता, पण्डितराजजगन्नाथ शेमुषीसमुन्मीलन, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी, प्रथमसंस्करणम्, २००३
- शर्मा, हरदत्तः, भामिनीविलासः, ओरियेन्टाल वुक् एजेन्सि, पुना, १९३५
- अग्रवालः, हंसराजः, संस्कृतसाहित्येतिहासः, चौखाम्वा-सुरभारती-प्रकाशन्, वाराणसी, २००२
- दाहालः, लोकमणिः, संस्कृतसाहित्येतिहासः, चौखाम्वा-कृष्णदास-अकादेमी, वाराणसी, चतुर्थसंस्करणम्, २०१६


❖❖❖

# Delineation of rasa according to the *Natyasastra* of Bharata.

Dr. Bidisha Misra

**Abstract -** Bharata who is considered to be the author of the *Natyasastra* has systemized the well developed art of music and dance of the vedic era. it contains 36 chapters and more than six thousand verses. Minute details of dramatic art are there in the *Natyasastra*. It is believed amongst scholars that the date of composition of the *Natyasastra* is somewhere between second century BC to second century AD. The *rasa* theory is perhaps the most important chapter of the *Natyasastra* is in chapter six. This theory has stimulated both creativity and critical discourse in the Indian arts for nearly two thousand years. *Rasa* refers to aesthetic experience. This unique experience or *rasananda* is said almost to be equivalent to the *brahmananda*.

***Key words -*** *rasa, aesthetic pleasure, sahrdaya, dramatic expression, bhavas.*

**Introduction** - The text of the *Natyasastra* is an encyclopedic work covering topics of literature, poetry, drama, architecture, sculpture, painting, music and dance, construction of a stage to genres of acting, body movements, make up and costumes, role and goals of an art director, grammar, the musical scale and what not. All the Indian arts have branced from its comprehensive treatment of artistic experience, expression and communication content. Muni Bharata who is considered to be the author of the Natyasastra has systematize the well developed art of music and

dance of the vedic era. It contains 36 chapters and more than six thousand verses. Fifth *veda* or *Natyaveda* is the other name of this *sastra* as the word or speech is extracted from Rigveda, music and song are from Samaveda, the art of acting histrionic expressions from Yajurveda and the elements of *rasa* from Atharvaveda.(1) Minute details of dramatic art are there in the *Natyasastra*.

It is believed amongst scholars that the date of composition of the *Natyasastra* is somewhere between second century BC to second century AD. Prior to that, there were such works separately on drama or dance or music or existed in oral forms. Bharata compiled all the prevalent works and oral traditions into one huge comprehensive text. Kalidasa accredited Bharata muni as the author of the *Natyasastra* in his *Vikramorvashiya* – II-7 and *Kumarasambhava* (7-91).

There are 36 chapters in the *Natyasastra*. The *rasa* theory is perhaps the most important chapter of the *Natyasastra* is in chapter six. In chapter VI Bharata mentions that the eleven aspects are very important to define the picture of drama in so far as the author and the actor are concerned. There are eight types of *rasas*, the ninth *santa rasa* is added later, eight *sthayibhavas*, thirty three *sanchari bhavas*, eight *satvika bhavas* are there. *Abhinaya* which is histrionic expression is of four types – *sattvika*, v*acika*, *angika* and *aharya*. *Vritti* which is mode of expression and *pravritti* which is regional identity are of four types each, *bharati*, *sattvati*, *Kaishiki* and *arabhati*, a*vanti*, *dakshinatya*, o*drimagadhi* and *panchalamadhyama* respectively (2). *Siddhi*, the success is of two types *daivi* and *Manusi*. *Svara* is of seven notes sa, ri, ga, ma, pa, da, ni. *Ranga* the theatre is three forms *Chaturasra*, *Vikrishta* and *tyasra*. These are the essence of *Natyasastra*. The

*rupaka* or *natyakrti* is enacted on the stage and the audience gets the desired aesthetic pleasure.

The theory of *rasa* has been enumerated by Bharata in the sixth chapter of the *Natyasastra* which has stimulated both creativity and critical discourse in the Indian arts for nearly two thousand years. Indian Dramaturgy and rhetoric offer the idea of *rasa* in dramatic expression or poetry in a unique way. *Rasa* refers to aesthetic experience, colloquially it can be translated to taste. Experience of *rasa* is a kind of generalization with the character and the story. This individual experience is tasted through the expression of *Bhava*. The mind of a spectator or *sahrdaya* can experience the *rasas* when the *bhavas* or permanent moods are being expressed. This *sahrdaya* is not just any one, he is a person who has a good aesthetic taste and a sensitive heart.

These *rasa* and *bhava* are interdependent as *rasa* can not be experienced without *bhava* and *bhava* has no existence if *rasa* is not produced. *Rasa* is kind of a knowledge. It is one of its own kind. *Bhavas,* the emotions have no meaning in the absence of *rasa*.

*Rasa* and *bhava* occupy a significant treatment by Bharata. For the embellishment of a dramatic presentation *abhinaya, dharmi, vritti, pravritti, siddhi, svara, atodya, gana* and *ranga* are required. But according to Bharata, *rasa* (aesthetic pleasure) is produced (*rasanispatti*) from a *samyoga* (combination) of *vibhavas* (determinants) and *anubhavas* (consequents) and complementary(*sancari*) or deviant(*vyabhicari*) transient feelings *"tatra vibhavanubhavavyabhicarisamyogadrasanispattih*[3]*.*

These *vibhavas, anubhavas* and *vyabhicari bhavas* are known as causes, effects and auxiliaries in the spoken language. *Rasa* accompanied by these

*bhavas* become the source of ananda "*Yatha hi nanavyanjanausadhidravyasamyogadrasanispattir-bhavati ………. tatha nanabhavopagata api sthayino bhava rasatvamapnuvantiti*"[4].

Then the question arises, what are these *vibhavas, anubhavas* and *vyabhicaribhavas?* Bharata explains *vibhavas* ( the determinants) are the causes of feeling in a spectator[5]. Basically *vibhavas* are the words or actions or expressions of actor that involves feelings in the audience. *Anubhava* ( the consequent) is the effect which is made to feel things by means of gestures and movements of major and minor limbs. Voluntary expressions like smile, shedding tears, laughter, scary looks, angry looks etc. are considered as *anubhava.*

Thus *vibhavas* and *anubhavas* create a *sattlva* state. The *vibhavas* are of two types – *alambana vibhavas* and *uddipana vibhavas.* Hero and heroines are considered as *alambana* and seasons, flowers etc. are the u*ddipana.* All human beings have some basic emotions like joy, sorrow, anger, fear etc. that drive our overall behavior, these inherent emotions are called *sthayibhava* or static emotion such as love etc. is of eight types. In the *Natyasastra* there are eight *sthayibhavas – Rati* (love), h*asa* (mirth), *soka* (sorrow), *Krodha* (anger), *Utsaha* (fortitude), *bhaya* (fear), *Jugupsa* (disgust), *vismaya* (Wonder).

The emotions those do not have stability like *vibhavas, sthayibhavas* but rise, exist, and vanish quickly are called *sancari bhava* or *vyabhicari bhava* are the auxiliary or temporary feetings in human beings. Bharata lists as many as 33 transitory feelings. Those are - *nirveda* (aversion), *glani* (depression), *sanka* (doubt), a*suya* (envy), *mada* (intoxication), *srama* (weariness), *alasya* (indolence), *dainya*

(piteousness), *cinta* (sorrow), *moha* (passion), *smrti* (recollection), *dhrti* (Courage), v*rida* (shame), c*apalata* (waywardness), harsa (Joy), avega (agitation), *Jadata* (stupor), garva (arrogance), *visada* (despair), *anautsukya* (inquisitiveness), *nidra* (sleep), *apsmara* (epilepsy), *supta* (dream), *vibudha* (awakening), *amarsa* (indignation), *avahitta* (concealment), *ugrata (ferocity), mati (knowledge) vyadhi (sickness), unmada (insanity), marana (death), trasa (fright) and vitanka (*deliberation*).*

These *bhavas* are subordinates to the principal *rasa*. The sentiment is caused by the *vibhavas,* expressed by the a*nubhavas* and nourished by *sancari bhavas* becomes *rasa*. When the *sthayibhava,* the permanent mood is experienced due to *vibhava, anubhava* and *vyabhicari* then it becomes *rasa*. They are called *Natya rasa* which is very important in any kind of art presentation.

Bharata has classified *rasas* into eight-*sringara* (amorous), *hasya* (humorous), *karuna* (pathetic), *raudra* (furious), *vira* (Valorous), *Bhayanaka* (horrifi), *bibhatsa* (repugnant), *adbhuta* (wondrous). He has also indicated the corresponding colours and presiding deities of all the *eight rasas*. All the *rasas* have several sub divisions – *sringara rasa* has two sub-divisions – *sambhoga* and *vipralambha*. Here *anga* the action, *neepathya* – the costume and *vak* – the speech vary correspondingly. *Hasya rasa* has six subdivisions – *smita, hasita,* v*ihasita, upahasita, apahasita, atihasita,* k*aruna* has got three subdivisions – *manasika, vacika, angika,* v*ira rasa* is divided into *danavira, dharmavira,* and *yuddhavira*. v*yaja, aparadha,* and v*itrasita* are the threefold divisions of *bhayanaka rasa. Bibhatsa rasa* has two subdivisions –

*shuddhaja* and *udvegaja*. *Adbhuta rasa* has also two subdivisions – *divyaja* and *anandaja*.

So from the above discussion we can surmised that Bharata is not in favour of admitting *santa* as a separate *rasa*. In the Kavyamala and Kasi editions of Bharata's work, it is very much prominent that Bharata was in favour of only eight *rasas*. Only in the Gaekwad edition of Chapter VI of Bharata's work reveals that Bharata has accepted *santa* as the ninth *rasa*. (6)

In the *rasasutra,* Bharata is silent about the meaning of the words *samyoga* or *nispatti*. So this *rasa-sutra* has been interpreted by different rhetoricians in various way. The interpreters are - Bhatta Lollata, Bhatta Samkuka, Bhatta Nayaka, and Abhinavagupta. According to Abhinavagupta, Bhattalollata appears to be the first commentator on Bharata's *rasasutra* who opined that *rasa* is primarily produced in the original hero or heroine whose character is imitated by the actor on the stage. Later Sri Sankuka contradicted Bhtta Lollata's opinion and furnished that the unique, poetic inference of the supposed permanent emotion in the actor alone generates charms in the spectators. Still later, Bhattnayaka another reputed commentator, condemned these two arguments outright and gave the opinion that *rasa* is experienced by the audience only as a result of the histrionic expression of an actor who portrays the emotions pertaining to the character described in the play. But Abhinavagupta was not convinced by the reasoning of Bhattanayaka. So he examined the views of all the three commentators in his commentary Abhinavabharati (Ch.VI) and established with analytical reasoning that the permanent emotions originate in the hero or heroine and in the audience which become sublimated and are changed into a universal experience of the audience. Then the audience gets delighte with a continuous feeling of joy, which is known *as carvana* or *rasa.* The *vibhavas* and

*amubhavas* which are described by the poet give away their individual character and turn into general character by eliminating from them the character of individuality. Abhinavagupta also reveals that due to the make-up and attire of the actor, he becomes the real hero in the eyes of the spectators. All the previous connections and influences with the real hero like Rama etc. of the audience are manifeste by some bodily reactions like perspiration, harripilation etc., which shows that the spectators completely enter into the emotions of the actor. So *rasa* is nothing but this generalized emotions which render into aesthetic pleasure of the audience.

## *Conclusion*

This manifestation becomes the source of transcendent charm and is spoken as *rasa*. This *rasananda* is said almost to be equivalent to the *brahmananda*.

## Reference

1. Natyaastra, Babulal Shuklashastri, P-6
2. Natyasatra, Kedarnath sahityabhusana, Rashtriya Sanskrit Samsthan, P-92
3. Ibid, P-93
4. loc.cit
5. N.S, translation M.M. Ghosh, P.119
6. G.O.S N.S. VI/16

**Bibliography**

1] Chaudhuri, Satyadev. *Glimpses of Indian Poetics*. New Delhi; Sahitya Akademi, 2002

2] Krishnamoorthy, Dr. K. *Indian Literary Theories*.. New Delhi ; Meharchand Lochhmandas Publication, 1985.

3] Sahityabhusana, Pt. Kedarnath. *Natyasastram*. New Delhi ; Rashtriya Sanskrit Samsthan, 2002

4] Babulal, Shukla Shastri. *Natyasastra,* Varanasi; Chaukhamba Sanskrit Sansthan, 2022

5] Vatsyayan, Kapila, *Bharata The Natyasastra*, New Delhi ; Sahitya Akademi, 1996.

❖❖❖

# सामान्यपदार्थविषयकनैयायिकाभिप्रायविमर्शः

**सुजनदासः**

**प्रबन्धसारः**

चतुर्वर्गेषु प्रधानभूतस्य मोक्षस्य प्राप्तये न्यायविद्भिः सप्तपदार्थस्य कल्पना कृता। शृङ्गग्राहिकन्यायेन आत्मज्ञानाभावात् पदार्थज्ञानेन इतरव्यावृत्त्या आत्मज्ञानं सम्भवति इत्युक्तम्। सप्तपदार्थेष्वन्यतमं तावत् सामान्यम्। तल्लक्षणनिरूपणे प्राचीननव्ययोर्मध्ये चिन्ताशक्तेर्वैलक्षण्यम् अस्माभिः दर्शितम्। तदनु सत्ताजातेः सामान्यपदार्थरूपे स्वीकारे नास्ति काचित् युक्तिरिति रघुनाथशिरोमणिना प्रतिपादितम्। सामान्यलक्षणे सन्निवेशितानां पदानां ग्रहणहेतुरपि नैयायिकदृष्ट्या आलोचितोऽत्र।

**कूटशब्दाः** अनेकसमवेतत्वं, नित्यत्वं, सत्ताजातिः, सामान्यस्य भेदः चेत्यादयः।

वैशेषिकानां चतुर्थः पदार्थस्तावत् सामान्यम्। समान एव इति कृत्वा स्वार्थे ष्यञ्-प्रत्यये नपुंसकलिङ्गे च सामान्यमिति पदं व्युत्पन्नम्। महर्षिकणादेन अनुवृत्तिप्रत्ययस्य कारणत्वेन सामान्यमुक्तम्- "भावोऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव।[232] यः पदार्थो नित्यः, एकः, समवायसम्बन्धेन अनेकानुगतश्चेति तदेव सामान्यम्। यथा- गोत्वं नित्यरूपेण सर्वेषु गोव्यक्तिषु समवायेन विद्यमानतया सामान्यमिति कथितम्। सामान्यस्य लक्षणे विशेषणत्रयं द्रष्टव्यं नित्यम्, एकम्, अनेकानुगतञ्चेति।

## १. सामान्यलक्षणे निवेशितपदानामुपादेयता

एकमनेकानुगतं सामान्यम् इत्युक्ते सति संयोगे अतिव्याप्तिः जाता। तथाहि उच्यते- 'अनेकसमवेतत्वं संयोगादीनामप्यस्ति, अत उक्तम्- नित्यत्वे

[232] वैशेषिकसूत्रम्- १.२.४।

सतीति।[233] कारणं हि संयोगनामकस्य गुणस्य समवायेन अनेकाधिकरणवृत्तिता पूर्वविदिता। किन्तु लक्षणे नित्यत्वे सतीति विशेषणं संयुज्य तदतिव्याप्तिः निवारिता भवति। संयोगे एकत्वम्, अनेकानुगतत्वं सन्नपि नित्यत्वं न कदापि तिष्ठति। ननु किं नाम नित्यम्? अनित्यपदार्थानां प्रागभाव-प्रध्वंसाभावयोः विद्यमानत्वेन ते प्रागभावप्रतियोगिनः प्रध्वंसाभावप्रतियोगिनश्च भवन्ति। नित्यानान्तु अभावद्वयोः विरहात् ते अप्रतियोगिनो भवन्ति। तस्मात्, सामान्यस्य लक्षणं भवति- प्रागभावाप्रतियोगित्वे सति अनेकसमवेतत्वम् उत प्रध्वंसाभावाप्रतियोगित्वे सति अनेकसमवेतत्वमिति। बहुविधाः युक्तीः प्रदर्शयन् किरणावलीकारः नामान्यस्य नित्यत्वं प्रतिपादयति- "अतएव एव सामान्यस्य द्रव्यादिभ्यो भेदः, अत एव नित्यत्वम्। द्रव्याद्यभेदे सामान्यस्य द्रव्यादिविनाशे विनाशः, तदुत्पादे चोत्पादः स्यात्, भेदे तु नायं विधिरवतिष्ठत इति।[234] प्रशस्तपादेनापि द्रव्यगुणकर्मभ्यः पृथक्त्वेन सामान्यस्य नित्यत्वं साधितम्- लक्षणभेदादेषां द्रव्यगुणकर्मभ्यः पदार्थान्तरत्वं सिद्धम्। अत एव च नित्यत्वम्। [235]

तदतु लक्षणे 'अनेक' इति पदं संयोज्य बोधयति यत्- सामान्यस्य अनेकाधिकरणवृत्तित्वमस्ति। अन्यथा नित्यत्वे सति समवेतत्वमिति लक्षणस्य, गगनपरिमाणे अतिव्याप्तिः जायते- नित्यत्वे सति समवेतत्वमिति लक्षणं गगनपरिमाणवादीनामप्यस्ति, अत उक्तम्- अनेकेति।[236] आकाशस्य नित्यद्रव्यत्वेन तदधिकरणे स्थितं गगनपरिमाणमपि नित्यमिति ज्ञातव्यम्। आकाशस्य द्रव्यत्वेन, परिमाणस्य च गुणत्वेन अनयोः सम्बधः समवायः अङ्गीकृतः। तस्मात् नित्यत्वेन समवेतत्वेन च गगनपरिमाणमपि सामान्यरूपेण स्वीकृतं भवति। 'अनेक' इति पदस्य संयोजनात् लक्षणार्थो भवति- यो नित्यः सन् अनेकाधिकरणे समवेतत्वमिति। गगनपरिमाणस्य

---

[233] कारिकावली, शङ्कररामशास्त्री, पृष्ठा. 98।
[234] किरणावली, सामान्यप्रकरणम्।
[235] प्रशस्तपादभाष्यम्, ढुण्ढिराजशास्त्री, पृष्ठ २८१।
[236] कारिकावली, शङ्कररामशास्त्री, पृष्ठा. ९८।

नित्यत्वं समवेतत्वञ्चेति धर्मस्य विद्यमानत्वे सत्यपि आकाशव्य विभुत्वात् तत्परिमाणस्य अनेकाधिकरणवृत्तित्वं न सम्भवति। तेन गमनपरिमाणे नातिव्याप्तिः जाता।

सामान्यं समवायसम्बन्धेनैव अवच्छिन्नं भवति, न केनापि अन्येन सम्बन्धेन इति लक्षणस्थितेन 'समवेतपदेन' अवगन्तव्यम्। पदस्यास्य संयोजने का उपादेयता? तत्रोक्तं हि अत्यन्ताभावे अतिव्याप्तिं वारयितुं तन्नियोजनम्- "नित्यत्वे सत्यनेकवृत्तित्वमत्यन्ताभावेऽप्यति, अतो वृत्तित्वसामान्यं विहाय समवेतत्वमित्युक्तम्।[237] घटस्य अत्यन्ताभावो नित्यः सन् अनेकाधिकरणे विद्यते। अत्यन्ताभावोऽयं प्रतियोगिस्वरूपत्वेन अथवा अनुयोगिवरूपत्वेन तदधिकरणे स्वरूपसम्बन्धे तिष्ठति। तेन अत्यन्ताभावे नित्यत्वम्, अनेकाधिकरणत्वञ्च इति विशेषणद्वयं सदपि समवायसम्बन्धेन वृत्तित्वविरहात् सामान्यलक्षणं नातिव्याप्तम्। ततश्च नित्यत्वे सति अनेकसमवेत्वमिति लक्षणं कृतम्।

**१.१. अनेकसमवेतत्वमित्यस्य अर्थविश्लेषणम्**

एकं न भवतीति विग्रहे अनेकपदस्य सिद्धिर्भवति। अत्र एकभिन्नत्वम् अनेकत्वम् इत्यर्थो गृह्यते। एकभिन्नत्वं खलु एकप्रतियोगिकभेदवत्त्वमिति। तर्हि अनेकसमवेतत्वेन एकप्रतियोगिकभेदविशिष्टे समवायसम्बन्धेन वृत्तित्वम् अवगम्यते। इत्यर्थे कृते सति जलपरमाणोः रूपे अतिव्याप्तिः जायते। भिन्नरूपविशिष्टयोः जलपरमाणुद्वयोर्मध्ये प्रथमपरमाणौ द्वितीयपरिमाणोः भेदः जायते। यत्किञ्चित् एक- इतिकृत्वा द्वितीयपरमाणुं सङ्गृह्य एकप्रतियोगिकभेदवत्वेन प्रथमपरमाणुः तावत् एकप्रतियोगिकभेदवान् भवति। तस्मिन् परमाणौ समवायेन रूपस्य विद्यमानतया नित्यत्वे सति अनेकसमवेतत्वमिति लक्षणस्य रूपे अतिव्याप्तिः जाता। तदुत्तरे उक्तं ह्यत्र एकभिन्नत्वेन एकत्वावच्छिन्नप्रतियोगिताकभेदवत्त्वं गृहीतम्। अर्थात् समानरूपेण एकं न इति भेदविशिष्टस्य पदार्थस्य अनेकत्वं सम्भवति। यत्किञ्चित् एकं न इत्याकारे एकत्वविशेषस्य भेदाश्रयः पदार्थः अनेकरूपेण नैव

[237] तत्रैव, पृष्ठा १००।

अङ्गीकृतः। एकत्वसङ्ख्याविशिष्टत्वात् एकत्वविशेषाश्रयत्वात् च कस्मिंश्चिदपि परमाणौ नास्ति एकत्वसामान्यम्। जलपरमाणोः रूपस्य एकसमवेतत्वेन तत्र नातिव्याप्तिः। ननु एकत्वावच्छिन्नप्रतियोगिताकभेदः अप्रसिद्ध एव? विद्यमानं पदार्थद्वयमवलम्ब्य 'उभयमेकं न' इति प्रतीतेः तद्भेदस्य प्रसिद्धत्वेन न कश्चित् दोषः।

रामरुद्रेण उक्तं हि- 'वस्तुतस्तु स्वप्रतियोगिसमवेतत्व-स्वाधिकरणसमयेतत्वोभयसम्बन्धेन भेदविशिष्टत्वस्यैव अनेकसमवेतत्वान्न काप्यनुपपत्तिः। एतेन तादृशभेदानुयोगितावच्छेदकद्वित्वाद्यवच्छिन्नजाति-वृत्तित्वमप्रामाणिकं जातेर्निरवच्छिन्नवृत्तित्वादिति दूषणमपास्तम्।[238] अर्थात् स्वप्रतियोगिसमवेतत्वं, स्वाधिकरणसमवेतत्वं च उभयसम्बन्धेन भेदविशिष्टस्यैव अनेकसमवेतत्वं भवति। यथा- घटत्वसामान्यस्य सर्वेषु घटेषु समवायेन वृत्तित्वं भूत्वा, अपि च तत्सामान्यम् उभयसम्बन्धेन भेदविशिष्टो भवति। स्वप्रतियोगिसमवेतत्वम् इत्यत्र स्वपदेन घटत्वाश्रयभेदो बोद्धव्यः। तस्य घटभेदस्य घटत्वसामान्ये विद्यमानत्वेन घटत्वसामान्यं स्वप्रतियोगिसमवेतसम्बन्धेन भेदविशिष्टं भवति। तदनु स्वाधिकरणसमवेतत्वम् इत्यत्र स्वपदेन तत् घटभेद एवं स्वाधिकरणपदेन घटभेदस्य अपरं किञ्चित् घटाधिकरणं बोध्यम्। तस्मिन् घटेऽपि घटत्वसामान्यस्य विद्यमानत्वेन तत् सामान्यं स्वाधिकरणसमवेतं भवति। उभयसम्बन्धेन भेदविशिष्टत्वात् घटत्वं सामान्यम् इत्यर्थः। अर्थात् सामान्यलक्षणे अनेकसमवेतत्वेन उभयसम्बन्धेन विशिष्टस्य धर्मस्यैव ग्रहणं भवेत्।

उदयनाचार्येण अनेकसमवेतत्वस्य व्याख्या किञ्चिदन्यप्रकारे प्रदत्ता- "समानानां भावः स्वाभाविकः अनागन्तुकः धर्मः सामान्यमित्यर्थः। तथा च धर्मिणां बहुत्वे धर्मस्य चानागन्तुकत्वे विवक्षिते नित्यमनेकवृत्तिसामान्यमिति सामान्यलक्षणं सूचितम्।[239] तस्य मतानुसारेण अनेकसमवेतत्वस्य द्वौ अर्थौ भवतः- एकत्वसङ्ख्याशून्यसमवेतत्वम्, अनेकत्वसङ्ख्याशून्यसमवेतत्वं वेति।

[238] रामरुद्रीटीका (कारिकावली), शङ्कररामशास्त्री, पृष्ठा 98।
[239] किरणावली, सामान्यप्रकरणम्।

प्रथमार्थे गृहीते सति द्रव्यत्यजातौ अव्याप्तिः स्यात्। घटत्वं यस्मिन् घटे समवेतं, यो घटः कदापि एकत्वसङ्ख्यायाः अनाश्रयो न भवति। द्वितीयार्थस्य ग्रहणे सति गुणवृत्तिजातौ अव्याप्तिर्जाता। न्यायमते गुणे गुणाभावात् अनेकत्वसङ्ख्याविशिष्टम्य गुणस्य गुणपदार्थवृत्तिता अप्रसिद्धा। ततश्च समाधानमत्र- अनेकसमवेतत्वेन स्वाश्रयान्योन्याभावसामानाधिकरण्यं बोधितव्यम्। घटत्वाश्रयस्य घटस्य अन्योन्याभावाधिकरणे पृथग्घटे घटत्वस्य समवेतत्वेन घटत्वं स्वाश्रयान्योन्याभावसामानाधिकरण्यं भवति। नैयायिकैः सामान्यन्य जातेर्वा पारिभाषिकार्थो गृह्यते। उदयनाचार्येण जातिशब्दस्य व्युत्पत्तिलभ्यार्थेन सामान्यस्य स्वरूपम् आलोचितम्। सामान्यं स्वाभाविकधर्मरूपेण व्याख्यातम्। स्वाभाविकधर्मस्य द्व्यर्थः सम्भवति। स्वभावजन्यः, स्वभावाश्रितश्चेति। जातेः नित्यत्वेन सभावजन्यधर्मो जातिपक्षे अप्रयुक्तः। समानानां भावः इति व्युत्पत्त्या उपाधेरपि जातित्वं स्वीकृतं भवेत् तस्याः स्वभावाश्रितत्वात्। तस्मात् अनागन्तुक इति जातेर्विशेषणं प्रदत्तम्। अर्थात् साक्षात्समवायसम्बन्धेन सम्बन्धिततया घटत्वपटत्वादेः अनागन्तुकधर्मत्वेन जातित्वम् अङ्गीकृतम्।

**२.सामान्यस्वीकारे युक्तिः**

प्रशस्तपादाचार्येण सामान्यप्रकरणे अनुवृत्तिप्रत्ययकारणम् इत्युक्तम्- 'स्वविषयसर्वगतमभिन्नात्मकमनेकवृत्ति एकद्विबहुष्वात्मस्वरूपानुगमप्रत्यकारि स्वरूपाभेदेनाधारेषु प्रबन्धेन वर्तमानमनुवृत्तिकारणम्। कथम्? प्रतिपिण्डं सामान्यापेक्षं प्रबन्धेन ज्ञानोत्पत्तावभ्यासप्रत्यजनिताच्च संस्कारादतीत-ज्ञानप्रबन्धप्रत्यवेक्षणात् यदनुगतमस्ति तत्सामान्यमिति।[240] तत्र न केवलं सामान्यस्वरूपः, सामान्यस्वीकारे युक्तिरपि निर्देशिता। यथा- कस्याश्चित् व्यक्तेः सम्मुखस्थितेषु भिन्नाकृतिविशिष्टेषु गोषु 'अयं गोः' 'अयं गोः' इत्याकारे प्रतीतिः व्यवहारश्च भवति। अनुवृत्तिप्रत्ययोऽयं सर्वेषु गोष्वेव क्रमाणुसारेण भूयते। किञ्चित् साधारणधर्मं विहाय सर्वेषु गोव्यक्तिषु अनुवृत्तिप्रतीतिः इयं नैव सम्भवति। तेन सर्वेषु गोषु गोत्वनामको धर्मः स्वीकृतः, सा एव जातिरिति

[240] प्रशस्तपादभाष्यम्. ढुण्ढिराजशास्त्री, पृष्ठ- २७६।

प्रसिद्धा। न केवलम् अनुगतप्रतीतिः अपि च विशेषबुद्धौ जातिः व्यावृत्तिहेतोः साधिका भवति। तस्मादुच्यते- "अपरं द्रव्यत्वगुणत्वकर्मत्वादि अनुवृत्तिव्यावृत्तिहेतुत्वात् सामान्यं विशेषश्च भवति। तत्र द्रव्यत्वं परस्परविशिष्टेषु पृथिव्यादीष्वनुवृत्तिहेतुत्वात् सामान्यं गुणकर्मभ्यो व्यावृत्तिहेतुत्वात् विशेषः।[241] द्रव्यत्वं द्रव्यत्वसामान्यस्य ज्ञानेन साकं द्रव्येतरगुणादीनामपि व्यावर्तयति।

केवलम् अनुगतप्रतीत्या जातिसिद्धेः सिद्धान्तम् असमीचीनम्। कारणं हि द्रव्यगुणकर्मभिः अपि तत् प्रतीतिः भूयते। काचित् दण्डविशिष्टपुरुषान् अवलोक्य एकैकशः पुरुषे 'अयं दण्डी' 'अयं दण्डी इत्याकारे अनुगतप्रतीतौ अनुगतधर्मस्तावत् दण्डो भवति। तत्र दण्डः खलु द्रव्यं न तु जातिः। अपि च गमनरतासु व्यक्तिषु 'अयं गमनवान्' 'अयं गमनवान्' इत्यकारे प्रतीतौ अनुगतधर्मरूपेण क्रिया एव अवगम्यते। तदुत्तरे कथ्यते हि- अत्रापि जात्या अनुगतप्रतीतिर्भवति। प्रथमदृष्टान्ते दण्डेन अनुगतप्रतीतौ न जातीयत्वस्य ज्ञानं प्रागेव ज्ञातव्यम्। सर्वेषां दण्डानां विलक्षणरूपेण ज्ञानविषयत्वे सति ततोऽनुगतबुद्धिः नोत्पद्यते। अर्थात् अनुगतप्रतीतौ जातिरेव निर्वाहिका भवति। प्रचीनानां मते एषा खलु सामान्यपदार्थस्वीकारे युक्तिः। नव्यनैयायिकैः कार्यतावच्छेदकत्वेन, कारणतावच्छेदकत्वेन वा जातिसिद्धिः कृता। वादिवागीश्वराचार्येण अनुमानप्रमाणेन जातेः सिद्धिः प्रदर्शिता-

कारणस्य हि सिद्धत्वाद् विकल्पस्यापि भेदतः।
व्यावृत्तेरपि भिन्नत्वादन्योऽन्याश्रयदूषणात्॥[242]

अनुगतप्रतीतेः हेतुमात्रेण जातिसिद्धिः न सम्भवति। जातिबाधकत्वेन केषाञ्चित् अनुगतधर्माणां जातित्वं न स्वीकृतम्। तत्र अनुगतधर्मः उपाधिरूपेण प्रसिद्धः। सा उपाधिः द्विधा-अखण्डोपाधिः, सखण्डोपाधिः चेति।

---
[241] तत्रैव, पृष्ठ- २७६।
[242] मानमनोहर - 115।

यदुपाधिः किञ्चित् प्रकारे विश्लेषयितुम् अशक्ता, सा अखण्डोपाधिः। यथा- अभावत्वम्, विषयत्वम्, अनुयोगित्वञ्चेति। अपकृष्टपरिमाणवत्त्वेन मूर्तत्वस्य निर्वचनात् तदेव सखण्डोपाधिः इति।

**३. वैशेषिकमते सामान्यस्व विभागः**

सामान्यस्य भेदद्वयं वैशेषिकैः स्वीकृतम्। यथा- परसामान्यम् अपरसामान्यं चेति- 'सामान्यं द्विविधं परमपरञ्च।[243] परत्वमधिकदेशवृत्तित्वम् अपरत्वमल्पदेशवृत्तित्वं चेति सिद्धान्तमुक्तावस्यां सामान्यस्य भेदद्वयोर्लक्षणं प्राप्तम्। द्रव्यगुणकर्मसु विद्यमानत्वात् सत्ताजातिः अपरजात्यपेक्षया अधिकदेशवृत्तित्वेन परसामान्यमिति उक्तम्। सत्ताजात्यपेक्षया अल्पदेशवृत्तित्वेन द्रव्यत्वजातेः अपरसामान्यत्वं स्वीकृतम्। पुनश्च पृथिवीत्वं द्रव्यत्त्वजात्यपेक्षया अल्पदेशवृत्तित्वेन अपरसामान्यं, द्रव्यत्वं च परसामान्यमिति कथितम्। यत्किञ्चित् द्वयोः जात्योर्मध्ये परापरभावो नैव सम्भवति। यथा- घटत्वपटत्वयोर्मध्ये परापरभेदः कर्तुम् अशक्तः। एकाधिकरणे समवेतद्वयोः जात्योर्मध्ये परापरभावः सम्भवति। तस्मात् कैश्चित् नैयायिकैः समानाधिकरणम्, असमानाधिकरणञ्च इत्यनेन सामान्यस्य भेदद्वयम् अङ्गीकृतम्। समानाधिकरणजातेः परापरभेदेन पुनर्द्विधा विभज्यते।

सामान्यन्य भेदद्वयमिति सिद्धान्तम् असमीचीनमेव। सत्ताजात्यपेक्षया कस्याश्चिदपि जातेरभावात् सत्ताजातिः सर्वदेव परसामान्यरूपेण व्यवह्रियते। नान्ति काचित् एतादृशी जातिः यदपेक्षया पटत्वस्य परसामान्यत्वं स्वीकृतं भवेत्। तेन सर्वदा घटत्वस्य अपरसामान्यरूपेण व्यवहारः कृतः। सत्ताजात्यपेक्षया घटत्वजात्यपेक्षया च द्रव्यत्वस्य परापरसामान्यत्वं स्वीकृतमस्ति। अर्थात् केवलपरजातिः, केवलापरजातिः, परापरजातिश्चेति भेदात् सामान्यस्य त्रिविधत्वम् अङ्गीकर्तव्यम्-

द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते।
पराभिन्ना च या जातिः नैवापरतयोच्यते॥

---

[243] प्रशस्तपादभाष्यम्. ढुण्ढिराजशास्त्री, पृष्ठ- २७६।

द्रव्यत्वादिकजातिस्तु परापरतयोच्यते।
व्यापकत्वात् परापि स्याद् व्याप्यत्वादपरापि॥[244]

**४. सत्ताजातिविषये प्राचीन-नव्ययोर्मतवैलक्षण्यम्**

प्राचीननैयायिकैः अनुगतप्रतीतेः कारणरूपेण सत्ताजातिः स्वीकृता। तदुक्तं हि- तत्र सत्तासामान्यं परमनुवृत्तिप्रत्ययकारणमेव।[245] द्रव्यं सत्, गुणः सत्, कर्म सदिति अनुगतप्रत्ययात् समवायेन द्रव्यादित्रिकवृत्तेः सत्तायाः जातित्वम् अङ्गीकृतम्। तस्याः जातेः द्रव्यादितः पृथगवस्थितिः एव प्रसिद्धा। सामान्यं सदिति प्रकारे सामान्यादिषु चतुर्षु पदार्थेष्वनुगतप्रतीतिः सत्यामपि तत्र सत्तायाः एकार्थसमवायसम्बन्धेन वृत्तिता ज्ञेया। कैश्चित् नव्यनैयायिकः तन्मतं निराकृतम्- धर्मादीनामतीन्द्रियत्वेन तत्र प्रत्यक्षायोगात् जात्यादावपि सद्व्यवहाराच्च। घटादौ सद्व्यवहाराच्च वर्तमानत्वनिबन्धनः।[246] तेषां मतेन पदार्थस्वरूपं विहाय नास्ति सत्तायाः किञ्चित् पृथक्त्वम्। वस्तुतस्तु वर्तमानकालस्य सम्बन्धनत्वेन सत् प्रतीतिः इति रघुनाथशिरोमणेः वक्तव्यमेव। तन्मते सत्तायाः भावस्वरूपत्वं स्वीकृते सति समीचीनं भवति। जगदीशभट्टाचार्येण तदुत्तरे अतीतानागतकालेऽपि सत् प्रतीतेः केवलं वर्तमानकालस्वरूपिणः सतः सिद्धान्तः अयौक्तिकः इत्युक्तम्- "वस्तुतो घटः सन्नित्यादिप्रतीतेः वर्तमानत्वादिरूपसत्तावगाहित्वेनैव उपपत्तेः सत्तासामान्ये प्रमाणाभाव इत्यत आह सा चेति। अनुवृत्तेरिति। भावी भूतो वर्तमानश्च सर्व एव घटः सन् न तु असन् इत्याकारकानुगतप्रतीतेः हेतुत्वात् नियामकत्वात् सामान्यमेव, न तु वर्तमानत्वरूपा, भाविनि अतीते वर्तमानत्ववाधेन तादृशमतेः भ्रमत्वापातादिति नव्याः।[247] दिनकरभट्टेन द्रव्यत्वावच्छिन्नतादात्म्यसम्बन्धा-वच्छिन्नकारणतानिरूपितकार्यतावच्छेदकतया सत्ताजातिः अनुमिता। तन्मतं दूषयित्वा अन्ते च प्रभाटीकाकारेण द्रव्यं जातिमत्' इत्याकार प्रतीतत्वेन सत्तायाः जातित्वं निरूपितम्। तथा चोक्तम्- तस्मात् सर्वत्र

[244] कारिकावली, कारिका-8, 9।
[245] प्रशस्तपादभाष्यम्, ढुण्ढिराजशास्त्री, पृष्ठ- २७६।
[246] पदार्थतत्त्वनिरूपणम्, पृ.48।
[247] सूक्तिटीका, सामान्यप्रकरणम्।

जातिमानित्याकारकप्रत्ययानुरोधेन सर्वत्रैक जातिसिद्धौ सैव तान्त्रिकैः सत्तेति व्यवह्रियते। इत्थं च सन्नितिप्रतीतिविषयत्वं सत्पदशक्यतावच्छेदकत्वं च तस्या एव स्वीक्रियते। परं तु द्रव्यादित्रिकस्य समवायेन सत्तावत्त्वात् तत्र सत्पदप्रयोगो मुख्यः, सामान्यादिवित्रिकस्य एकार्थसमवायेन सत्तावत्त्वात् तत्र सत् प्रयोगो गौण इति विवेकः।[248]

**५. बौद्धानां सामान्यखण्डनस्य प्रत्युत्तरम्**

क्षणिकवादम् उपस्थापयता बौद्धाचार्येण सामान्यपदार्थौ निराकृतः। बौद्धमते सर्वे सत्पदार्थाः क्षणिकाः भवन्ति। तत्र नित्यरूपेण कश्चित् धर्मः स्वीकृते सति तेषां क्षणिकत्वस्य सिद्धान्तः नैव तिष्ठति। प्रतीत्यसमुत्पादवादिभिः बौद्धैः प्रधानभूतेषु द्वादशतत्त्वेषु कार्यकारणभावः मन्यते। द्वादशतत्त्वानां सापेक्षता किञ्चित् कारणतावच्छेदकं अथवा कार्यतावच्छेदकं विहाय नैव सम्भवतीति वादिवागीश्वराचार्येण सामान्यप्रकरणे समालोचिता। सामान्यसिद्धौ निर्देशितानुमाने कारणस्य हि सिद्धत्वादिति हेतुना क्षणिकत्ववादे अनुगतधर्मस्य व्यवहारो तेन दर्शितः-

कारणस्य हि सिद्धिवाद् विकल्पस्यापि भेदतः।
व्यवृत्तेरपि भिन्नत्वादन्योऽन्याश्रयदूषणात्॥[249]

**६. उपसंहृतिः**

पारिशेष्यात् वक्तु शक्यते यत् सामान्यलक्षणविषये एतैदृशं विशेषणं न्यायवैशेषिकाणामाचार्याणां विशुद्धचिन्ताशक्तेः धारकः वाहकश्चेत्यत्र नास्ति कश्चित् सन्देहः।

**सन्दर्भग्रन्थाः**

**संस्कृतग्रन्थाः**

अन्नभट्टः-तर्कसंग्रहः(सम्पा.). श्रीगोविन्दाचार्य, वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०१९।

उदयनाचार्यः- किरणावली (सम्पा.)नरेन्द्रचन्द्रवेदान्ततीर्थ कलिकाता : एशियाटिक सोसाइटि, २००२।

248 प्रभाटीका (कारिकावली), शङ्कररामशास्त्री, पृष्ठा 118।

249 मानमनोहर - 115।

उदयनाचार्यः- न्यायकुसुमाञ्जलिः- (सम्पा.) पद्मप्रसाद् उपाध्याय एवं कुष्टिराज शास्त्री. तृतीयसंस्करण, वाराणसी : चौखम्मा संस्कृत भवन।
गोतमः- न्यायवसनिम् (सम्पा.) पद्मप्रसाद् शास्त्री एवं हरिरामशुक्ल. वाराणसी: चौखम्भा संस्कृत भवन, २०१८।
प्रशस्तवेवाचार्यः- पदासंग्रह (सम्पा.). नारायणमिश्र वाराणसी : चौखम्भा संस्कृत संस्थान, २०१६।
माधवाचार्यः- सर्वदर्शनसंग्रह (सम्पा.). उमाशङ्करशर्मात्रृषि वाराणसी : चौखम्बा विद्याभवन, २०१६।
मृणालकान्तिगङ्गोपाध्यायः- भाषापरिच्छेदे सप्तपदार्थ, प्रथमसंस्करण, कलिकाता : संस्कृत बुक डिपो. १४२१।
रघुनाथशिरोमणिः- प्रदार्थतत्त्वनिरूपणम् (सम्पा.). मधुसूदन भट्टाचार्य, कलिकाता : संस्कृत कलेज, १९७६।
वाचस्पतिमिश्रः- न्यायवार्तिकटीका (सम्पा.). राजेश्वरशास्त्री द्राविड तृतीयसंस्करण वाराणसी : चौखम्भा संस्कृत भवन २०१३.
बादिवागीश्वरः- मानमनोहर (सम्पा.) स्वामी- योगीन्द्रानन्दः, वाराणसी: प्रदर्शन प्रकाशन प्रतिष्ठानम्, २०००।
विश्वनाथतर्कपञ्चाननः- कारिकावली. (सम्पा.).शङ्कररामशास्त्री द्वितीयसंस्करण दिल्ली : चौम्बा संस्कृत प्रतिष्ठान, २०१६।
व्योमशिवाचार्यः- व्योमबती. (सम्पा.). गौरीनाधशास्त्री. वाराणसी : चौखम्भा संस्कृत संस्थान, १०८४।
शङ्करमिश्रः- वैशेषिकसूत्रोपस्कारः (सम्पा.). नारायणमिश्र. वाराणसी : चौखम्भा प्रकाशन, २०११।
शङ्करमिश्रः- कणादरहस्यम् (सम्पा.). विन्ध्येश्वरीप्रसाद द्विवेदी, वाराणसी : चौखम्बा संस्कृत सिरिज अफिस, २००७।
शिवादित्यः- सप्तपदार्थी. (सम्पा.). तपनशङ्करभट्टाचार्य. कलिकाता : संस्कृत बुक डिपो, २०१२।
श्रीधराचार्यः- न्यायकन्दली (सम्पा.). जे. एस. जेटाले एवं वि.जि पारित्र. भादाद्रा : एम्.एस् युतिभा सिटि अफ बरोदा प्रेस्. खण्डनखण्डखाद्यम् (सम्पा.). नविकान्त झा. द्वितीयसंस्करण. वाराणसी : चौखम्भा संस्कृत संस्थान।

**आङ्ग्लग्रन्थाः**

Bhaduri Sadananda, Njaya Vaseska Setaphyses. First Reprint, Pune: Bhandarkar Oriental Rescarch Institue, 2021. Darapadarthasar.Ed. F. W. Thares. 3h Edition, Varanasi: Chowkhanbha Sanskrit Series Office, 1999.
Dasgupta, Surendranath, History odian Philosophy 6 Edition. Delhi : Motilal Banarsidass, 2015.
Banarsidass, 2011 Potter, Karl H. Early Ed. Sibajiban Bhattacharyya. 1" Edition. Vol. XIII, Delhi :

❖❖❖

# The Foundation of Yoga according to the Upanishads

Dr. Jagamohan Acharya

**Abstract**

Upanishad is the path of knowledge of the Veda. Upanishad is an ocean spiritual manasa from which the stream of knowledge are continuously flowing in this world and purifying the heart of all the human beings. The Upanishad is the principal of Indian philosophical thinking.

The yoga its style of practice and different divisions have been described in the Upanishads. The spiritual learning of the Upanishad is based on the soil of yoga. The Upanishad is the base of liberation. Liberation is impossible without transcendental knowledge and transcendental knowledge cannot be attained without yoga. Thus it appears that the yoga has an interrelation with the Upanishads.

Yoga is admitted as the best resources for self-realization. Yoga is explained on more than one times in the Upanishads. With main subject matter of Upanishads, yoga has been determined completely in some of the Upanishads and yoga has been discussed casually in some Upanishad.

The characteristics of yoga have been determined in different manners in different Upanishads. Unconditional peace of mind is called yoga. The nature of mind is fickleness. It is always moving. But the restless mind is lack of knowledge that means that is ignorance. Keep the mind under own control and connect the mind with super mind is yoga .Yoga means connection, link, association, union, tie etc.

Yoga is nothing but self-control of the mind from its function and the act of considering the ultimate reality in whole is called knowledge. Yoga is restraint of mental action. The unmoving condition of the sense organ is called yoga. This is called yoga where there is no survival of other thing excepting the individual soul and the supreme soul. Yoga is restrained of sense organs from their own function and unification of mind and soul. The internal and external link of the individual soul and the supreme soul is called yoga.

According to the Upanishad the root is yujiryoge with the suffix ghan. The meaning is yujate anena iti. It meaning is to be connected or united. Patanjali has used the word yoga from the root yuj and the meaning is meditation. Mediation is the path of connection. This is the style of philosophy. Upanishad point is yoga is the way of samyoga, connection, link of the soul and supreme soul, mind and the super mind human body to sacred body etc.

Different varieties of yoga have been mentioned in different manner, like pursuance of the excellence, function and manner of human being. Yoga is divided into different varieties like two varieties, three varieties, four varieties, eight variety in different Upanisads. The yogic topics like jnanayoga, karma yoga, mantra yoga, lay yoga, hatha yoga, raja yoga, kundalini, satcakra etc are discussed in the Upanishads.

## Introduction

Upanishad is the pride of the Indian Philosophy and culture. The Upanishad is the path of the Vedas. The thought of Upanishad activate the initial inner inspiration of the human soul. From the Upanishads various streams of thoughts can be obtained. In the Upanishad along with a picture of truth we get

indications as the basic facts of religion. Upanishad is the best and highest teaching of our religion. So Upanishad is related to our daily life. The Upanishad is the sources of energy and inspiration to the soul.

The aim of the Upanishad is to search for truth. In the various ways the truth is reveal. The reality of Brahman can be grasped through self-realization. Complete joy and peace which is god is the mans highest and ultimate goal. Brahman, knowledge of Brahma, self-realization etc are the main subject of Upanishad. With the main subject matter of Upanishad yoga has been also discussed casually or elaborately in some Upanishad. Yoga is the path of achievement of the ultimate goal of Upanishad. The main dealing of Upanishad is to attain the supreme soul. Yoga is the mediator to fulfill this goal. Brahman can be known by sravana, manana, and nididyasana.

According to *paingalopanisad,* the act of hearing the spiritual advices from preceptor with a respectful bent of mind is called sravana. The act of searching for the meaning of things heard in a lonely place is manana. The determination of mind with perfect attention of the meaning is nididhyasa. Nididhyasa is knowledge of science. Sravana of the cause of manana, manaan is the cause of nididhyasa and nididhyasa is the cause of attaining Brahman. This is the path and process of yoga. Yoga is one of the means to attain Brahman .By practicing yoga and knowledge one may realize Brahman. After yoga inner soul can be purified, the sense organs, mind, intellect can be organized, then Brahman can be realized.

The root of yoga philosophy is planted in the Upanishad. And the eight fold division of yoga is also discussed.

## Meaning of the word Yoga

The word yoga has been formed by the root yujir *yoge,* in the means to be united, *yuj samadhau* in the meaning meditation, *samadhi scittavrttinirodha, yuj samyamane*.

The word has been used in different meanings. According to the Upanisadic point of view *yujir yoge' yujyate anena iti yoga*h. Meditation is the main point of Patanjali. In meditation connection of one to other is yoga. Mostly union is yoga which is reflected in our ancient text. Meditation is also the union. Meditation is the path of emancipation. Emancipation means detached means *viyoga*. This *viyaoga* is yoga. Then the root *yuj samadhau* is important. Samadhi is the pre step of detached and yoga is upper step of union. This is original yoga. Dictionary meaning of the yoga is, the act of yoking joining, attaching, harnessing, putting to, team, vehicle, conveyance, application, performance, occasion, opportunity, union, combination, contact with, connection, relation,, concentration of thoughts, abstract contemplation, meditation and self-realization etc.

Yoga is connection union etc. this connection is not ordinary connection. Human spirit may attain complete union with supreme sprit are *isvara*. The union is individual soul with the universal soul. Yajnavalkyas view is 'union of *atma* and *paramatma* is yoga'. [*samyoga yogaiti ukto jivatmaparamatmanayah*, sarvasarsanasamgrahha.]

This union is Samadhi. Samadhi means samyavastha of jivatma and paramatma. Vyasa in his vyasabhasya said 'yogah samadhih' [yogabhasya, 2.1] yoga is Samadhi samyavastha.so yoga is possible in all ground of citta. Samadhi become successful only when

there is union between concentrated mind and the object to be meditated.

**Yogic tradition**

The *anusasana* of yoga is ancient. Yoga is our ancient monument. Very common use of the word yoga is connection. The word connection has created an internal secret meaning by the philosophers. Many places of the Vedas yoga have been mentioned. [RV, 1.5.3, 1.18.7., 1.30.7; SV 163, 742, 743; VS .1.14; AV.20.26.1 etc.]

Both the word Yoga and Yogi has been praised. Prayer of god is yoga which is reflected in Vedas. The idea of yogic science developed in Brahmana, Aranyaka, Upanisad and Puranas. Most of the Puranas has show the process of yoga with its divisions. Yoga has been described as emancipation. Emancipation is possible after deep meditation. Meditation is successful after self- realization. Self realization is the cause of control of mind. In yogic science mind is first and foremost important chapter.

*Srimadbhagavatgita* is the foundation stone and the star building of yoga. If we want to discuss may be all the slokas of *Gita* is related with yoga. The unattachment starts from *visada* and end in *moska.* According to Yogasastra when a man forsakes all his thinking, that dissolute condition of mind is called yoga. *Yajnavalkyasamhita* say, 'connection of individual self and supreme self is yoga' [1.44, *samyoga yoga iti ukto jivatmaparamatmanoh*]

*Yogavasistha* mentioned that yoga is crossing of this ocean of universe [*samsarottarane yuktir yogasabdena kathyate*, 6.1.13.3]

**Upanishad Yoga**

The Upanishad is the spiritual manasa lake from which the stream of knowledge continuously flowing

in this world and purifying the heart of all human beings. The theory and practice of yoga have been described in the Upanishads. The spiritual learning of the Upanishad is the based on the soil of yoga. The Upanishad is the base of emancipation. Emancipation is impossible without transcendental knowledge. Transcendental knowledge cannot be attained without yoga,. Yoga is admitted as the best means for self-realization.

The characteristic of yoga has been determined in different manners in Upanishads.

*Mahopanisad-* The means for complete peace of mind is called yoga. [*manah prasamanopayo yoga iti abhidhiyate,* 5.42]

*Sandilya upanisad-* Yoga is restraint of mental action. [yogas *tadvrttirodhah,* 1.41]

*Kathopanisad-* The motionless condition of the sense organ is called yoga [*tam yoga iti manyante sthiram indriyadharanam,* 2.3.11]

*Aksyupanisad-* here there is no existence of other thing excepting the individual soul and the supreme soul is called yoga.[*avedanam vidur yogam cittaksayam akrtriman,*1.2.3]

*Maitrayanyupanisad-* Yoga is restraint of the sense organs from their own function and unification of mind and soul.[6.25]

*Yogasikhopanisad-* The combination of duals like anus and soul, rajas and retas, the sun and the moon, that the individual soun and the supreme soul are called yoga. [1.68-69]

**Mind in the Upanishad**

Mind is the most powerful and king of the sense organs. Mind is the cause of all positive and negative behavior. *Mahopanisad* say, peace of mind is yoga. Peace is the key point. The nature of mind is fickleness.

Mind always moving and the restless of mind is ignorance. The *mahopanisad* said, 'destruction of mind is destruction of ignorance' [*esa eva manonasastv avidyanasah,* 4.109]

For salvation it is necessary to keep the mind under control. Mind is the cause of bondage and emancipation of a person. Both attachments with body and detachment of over body are hold by mind. It moves both anger and jealousy.Restraint of mind is yoga. Mind without its function is called restraint of mind. Motion is the nature of mind, so the motionless or action less or mind is yoga.

*Kathopanisad* says, yoga is quite condition of the sense organs. The sense organs always like to attach with his own objects. This is called restlessness of sense organ but the act of divesting the sense organs from their own objects is action less position of sense organs. When the sense organs become inactive means controlled mind gradually attached to Brahman and all the desires and doubts of mind is removed. So the *kathopanisad* mentioned that whose sense organs are not inactive they can never attain the supreme soul. [*kathopanisad,* 1.2.24]

According to *aksyupanisad* sensation of no other thing save the individual soul and supreme soul is yoga. After the control of mind all the sorrow and troubles disappear. Then the mind is dissolved in the soul and only truth is remains.

*Maitrayanyupanisad* is said yoga is the union of mind and soul after separation from all types of thinking. The supreme soul sustains two types of soul, prana and surya. Prana is inner soul and surya is the outer soul. With the help of practicing yoga the sense organs become inactive and mind of the yogi becomes concentrated and the doors of the emancipation open.

*Yogasikhopanisad* point our that, the dual connection is yoga. The connection like apana and prana, rajas and taijas, surya and candra, individual soul and supreme soul.atc. The knowledge of individual soul and the supreme soul is called yoga and union is these two is yoga.

***Nirvanopanisad***

Yoga perfected through truth is the true monastery. [*satyasiddhi yogo mathah,*33]. Yoga is union with the self. This self is attained through truth and through rejects of untruth.Purity of mind leads to perfect knowledge. With self knowledge Brahman is identify. *Taittiriyopanishad* [2.1.1] says 'knower of brhman attains the supreme statuses. Mind restraint self control is their patched garment. [*Nirvanopanisad, manonirodhini kantha,* 37] Cloth protects body against cold, heat etc. So also the mind detached from sense objects because of constant dwelling upon Brahma protect the yogis against cold and heat etc. Union of the soul either Brahman one sets blissful nature of the self. [*Nirvanopanisad: yogena sadananda svarupa-darshanam,* 38]. Various grades of happiness mention in *taittiriyopanisad*. The increasing levels of happiness are associated with increasing level of vastness of the self with which the individual identifies himself. The degrees of happiness are only the expression of the supreme bliss of the true self. In *nirvikalpaka samadhi* one attains this supreme bliss.

***Kaivalyopanisad***

Seeking a solitary peace, sitting in a comfort posture, maintaining internal and external purity and keeping the neck, head, and body erect, is meditation. [*Kaivalyopanisad,* 4] A man of self restraint should resort to a solitary peace for mediation on the self or Brahman. Meditation is internal and external

purification of the being. There is only one path, the path of purity which leads to divinity. External purity related to body and its external environment. Internal purity is related to mind and its internal environment. Practice of yoga is possible to purify the internal and external parts of our body.

***Amritabindopanisad***

Mind is mainly twofold that is pure and impure. Impure mind is that which hankers after objects of desire and the pure mind is that which is free from desire. [*Amritabindopanisad,* 1] The various steps of mind like super mind, illuminated mind, over mind etc. Mind is the cause of bondage and liberation. When engrossed in sense organ is bondage when release from sense organs is liberation. [*Amritabindopanisad,* 2]

The mind should be restraint. So long till it dissolves in the heart. This is jnana (self realization) and dhyan (meditation) the rest is mere argumentation and verbosity. A yogi restraint the mind with the firm conviction that nothing else exists apart from atman and nothing over originated out of this atman. Being one with that consciousness, the yogi attains intuitive realization of atman.

***Muktikopanisad***

According to *muktikopanisad* method of mind control is study of spiritual knowledge, association with religious people, complete renunciation of desire and control of pulsation of life force. These are the perfect method to control the mind. [*muktikopanisad* 44-45] Mind cannot control by force, the Upanishad say those ignorant people who want to conquer the mind by force they want to bind the frenzied elephant with lotus fiber [*muktikopanisad* 47]There are two seeds for the tree of the mind, one is pulsation of prana (vital

energy) and the second is intense desire.[ *muktikopanisad* 48]

**The seven grounds of Yoga**

The *mahopanisad* [5.23-25] and *varahopanisad* [4.1-2] describe seven ground of yoga. These are known as knowledge. The salvation arising from these seven grounds. These seven grounds are, *1. subheccha 2. vicarana 3. tanumanasi 4. sattvapatti 5.asamsakti 6. padartha bhavana 7. turyaga*.

*Yogatattvopanisad* have described the four stages of yoga. That is, *1. arambha 2. ghata 3. paricaya 4. nispati*

**Kinds of Yoga**

Exercise is not yoga, but this is the path of yogic realization. Physical, ethical, spiritual, meditation all are the path of yoga. The realization of yoga means that by which physical, mental, and intellectual strength of the yogi is expressed and he is emancipated from this painful world both internal and external. The principal menas of yoga is union. This union is one world to another. These union depends in varieties of yogic practices all the varieties of accomplishment depends on concentration of mind. Because without concentration of mind with sense organs nothing is complete successfuilly.the different varieties of yoga has been mentioned in pursuance of the quality, function, and manner of human being. Varieties of yoga are mentioned but all the varieties are in one way that is emancipation.The varieties of yoga mentioned in the Upanishad are different.

**According to the Upanishads-**

*Trisikhibrahmanopanisad*-[23] Yoga is divided into two varieties that is,jnanayoga and karmayoga.

*Yogatattvopanisad*-[19] There are four varieties of yoga, namely mantrayoga, layayoga, hathayoga and

rajayoga. Asthangayogas are also discussing in this Upanishad.

*Svetasvataropanisad-[*113] Dyanayoga is yoga.

*Yogarajopanisad*-[1.2] and *Yogasikhopanisad*-[1.129] Four types of yogas are mantrayoga, hathayoga, layayoga and rajayoga

*Varahopanisad*[1.10]Three types are mantrayoga, layayoga, hathayoga.

*Sandilyopanisad*-[11] Eight types of yogas are described.

*Mantrabhahmanopanisad*[1/1]Eeight types of yoga are discussed.

*Jabaladarsanopanisad*[1.3] Eeight types of yoga are discussed.

*Advayatarakopanisad*[1] and *mandalabrahmanopanisad*[1.3]= Mainly two types of yoga namely, tarakayoga and amanaskayoga.The taraka yoga is also two types, murtitaraka and amurtitarka.

Much more Upanishads are discussing about the yoga and varieties.In general the varieties of yoga according to Upanishad are, 1. jnanayoga 2. karmayoga 3. mantrayoga 4. layayoga 5. hathayoga 6. rajayoga 7.dhyanayoga 8. astangayoga 9. tarakayoga 10. amanaskayoga etc.

**Problem and solution**

In the path of yoga a yogi must be face obstacles. So yogi can not reach his target without patience. With the patience yogi can cross the stairs one after another and then gradually cross his goal. The Upanishads describe the obstacle of the path of the yoga. According to *yogatattvopanisad* [30-31] laziness, pride, deceitful talk, accomplishment of mantara, greed for women etc. are the obstacle during practice of yoga. Amrtanadopanisad mention fear, anger, laziness,

unnecessary sleep, unnecessary waking, unlimited food, starvation are the obstacle of the path of yoga. The yogi should forsake these obstacles. All these are depends upon mind, the *kenopanisad* said; the supreme Brahman can be obtained by *tapa, dama* and *karma*. [4.8] *Sama, vicara, santosha* and *satsanga* are the door keeper of emancipation. *Mundakopanisad* say that the devotee devoid of all demerits attains Brahman remaining in his own body in the form of luster through truthfulness, austerity and observance of brahmacarya.[3.11.5] *Pasupatabrahmopanisad* also mention the same . Paravidya can be mastered by truth, austerity, and brahmacarya.[22]

The Brahman is to be obtained through sravana, manana, and nididyasana. Mind is both pure and impure. Mind without desire is pure and with desire is impure. Impure mind is the cause of bondage of human being and the pure mind brings emancipation. [*maitrayanupanisad,* 4.6-11, *brahmabinoupanisad,* 1]

**Conclusion**

Yoga means both *samyoga* and *viyoga*. *Samyoga* is not possible without *viyoga* and the process of yogaviyoga is depends upon the mind. So yoga is *cittavrtti nirodhoh*. Protest to function of mind is yoga.

Yoga is the matter of self realization. All cannot realize equally. Each yogi can have realized according to his capacity. The method of practice of all is not same. Each Yogi has practice as per his goal. Although the goal of all is same but the processes is different. In all process mind with sense organs are the cause of emancipation. Transformation of the *sat- cit- ananda* in this body is the proper yoga. The body is the temple of the gods. The Upanishads also say the body is the temple of *shive* and it can attain all types of success.[*yogasikhopanisad,*1.168 ;*skandopanisad,*10] In

Upanishad yoga, it is said that human body is the place of many pilgrimages, gods, lokas, Vedas, matras etc. Knowledge arises from yoga and involvement of yoga comes from knowledge. A complete idea of yoga and its positive and negative reaction for human being is completely discussed in the Upanishads.

## References


- Acharya, Sriram Sharma,108 Upanishads(brahmavidya khanda, jnanakhanda, sadhanakhanda,) Samskriti Samsthan, Bareli, 1971
- Ashok kousic, yogadarsan (Hindi bhasya), subodha publication,New Delhi, 2004
- Kar,Parimal, Upanishad saptaka(Bangla), Sanskrit Pustak Bhandar, 2007
- Mishra,P.K and others, The Foundation of Yoga, Dept. of Yogic science,Utkal University,2010
- Pradep, Path of Liberation, Rashtriya Sanskrit sansthan, New-Delhi,2008
- Puranattukari,Ashokan,Ed. Dhatukosah,Bharatmudra, Karla, 1992
- Sastri, Ashok Chaterjee, Upanishad yoga and patanjala yoga- A comparative Approach, University of Calcutta, 1989
- Sharma, Uma Shankar (rishi), sarvadarshan samgraha (Hindi), Choukhamba Vidya Bhavan, Varanasi, 2001
- Upanisad smgrahah, Jagadish Shastri,MLBD,1980
- 10 William,Sir Monier Monier, A Sanskrit English Dictionary, MLBD, 2002


❖❖❖

# नीतिशतकविमर्शः

डा.श्वेतपद्माशतपथी

संस्कृतवाङ्मयस्य एकः सुप्रसिद्धः कविः दार्शनिकः तथा वैयाकरणः भवति भर्तृहरिः। तस्य कृतिषु मुख्यं भवति व्याकरणदर्शनमाधारीकृत्य वाक्यपदीम्। एतद्विहाय अन्यत् लघुकाव्यत्रयं तेन विरचितम्- यथा नीतिशतकम्, वैराग्यशतकम्, श्रृङ्गारशतकम्। एतत् शतकत्रयमिति संस्कृतवाङ्मये सुविदतम्। जीवने नीतिशिक्षायास्तात्पर्यं बहुधा विद्यते तथा नीतिहीनं जीवनं निष्फलमिति मत्वा भर्तृहरिणा नीतिशतकं लिखितम्। तथैव जीवने वैराग्यं वा अनासक्तभावः आवश्यकः ; इति हेतोः वैराग्यशतकं विरचितम्। पुनश्च आदिरसः श्रृङ्गारः। जीवनस्य परिपूर्णतायै श्रृङ्गारस्य वैशिष्ट्यमाकलय्य कविना भर्तृहरिणा श्रृगांरशतकं प्रणीतम्। किन्तु सत्सु अपि त्रिषु शतकेषु नीतिशतकस्य अधिकतया विशेषत्वं जीवनेऽनुभूयते;यतः अत्र एकस्य सुस्थ-सुन्दर-जीवनयापनस्य कृते श्रृङ्खलायाः अथवा नीतेः आवश्यकता अस्ति इति प्रतिपादितम्। अतः प्रबन्धेऽस्मिन् नीतिशतस्य विषये सवशदमालोचनं क्रियते।

ततः परम् उपनिषत्सु, रामयणमहाभारतपुराणादिषु महाकाव्येषु या शैली वर्णिता, सा तु भवति पद्यमयी। कालिदासादिभिः कविभिः विरचितानि बहूनि काव्यानि अपि पद्यमयानि भवन्ति। पद्यकाव्यमपि द्विधा विभाज्यते। यथा महाकाव्यं तथा खण्डकाव्यं। महाकाव्यस्य लक्षणमलङ्कारशास्त्रेषु सुष्ठुरूपेण वर्णितम्। तथैव खण्डकाव्यस्यापि। खण्डकाव्यं भवति-

खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च।[250]

एतत् खण्डकाव्यं लघुकाव्यमिति अपि कथ्यते। आकारेण बृहत्त्वात् काव्यं महाकाव्यं, तथा आकारेण लघुत्वात् काव्यं लघुकाव्यं भवति इति प्रथितम्। किन्तु महाकाव्यापक्षेया लघुकाव्यं पाठकानामधिकतया रुचिकरं जायते। तत्र कारणं यत् लघुकाव्ये स्वल्पेषु पद्येषु कविः स्वीयभावं प्रकाशयति। पुनश्च अत्र कवेः भावावेगः यथा तीव्रः रचनाविन्यासः अपि तथैव मनोहरः। इदं खण्डकाव्यं वा लघुकाव्यं कदाचित् गीतिकाव्यमपि उच्यते। अर्थात् अत्र

[250] सा. द. 6.45

सङ्गीतस्य काचन मूर्च्छाना अनुभूयते। तथैव रसस्य मादकदा एकं निर्द्दिष्टं विषयमाधारीकृत्य विरचिते – एकस्मिन् खण्डकाव्ये वा लघुकाव्ये वा गीतिकाव्ये काव्यान्तरापेक्षया विषयस्पष्टता अधिकतया उपलभ्यते।

उदाहरणं यथा- महिकविकालिदासविरचतं मेघदूतम्। इदमेकं खण्डकाव्यं वा लघुकाव्यं वा गीतिकाव्यं भवति। अलकापुर्य्यां निवसन्त्याः स्वीयपत्न्याः सविधं रामगिरितः स्वीयभावावेगपूर्णहृदयस्य संन्देशं प्रेशय विरही यक्षः काव्यस्यास्य सर्वाणि पद्यानि मन्दाक्रान्ताच्छन्दसा संगीतमयशैल्या एव गायति। अतः गीतिकाव्यम्।

अस्यामेव परम्परायां परवर्त्तिनि काले केचन कवयः शतंपदैः काव्यं विलिख्य स्वयमनोभावं व्यक्तीकृतवन्तः। शतं पद्यैः मण्डितं काव्यं शतकमिति प्रसिद्धमभूत्। तादृशं शतकत्रयं भवति नीतिशतकम् , वैराग्यशतकं तथा श्रृङ्गारशतकं। सम्भवतः एतत्शतकत्रयं संस्कृतवाङ्मयस्य सर्वप्रथमं शतकत्रयमेकेनैव कविना विरचितम्। यतः भर्तृहरिः अतीव प्राचीनकविः। तस्य समयः यद्यपि ऐतिहासिकैः एतावता कालेन ते निर्धारितः , तथापि बहुविधप्रमाणनुसारं तस्य समयः षष्ठीशताब्दीतः प्रारभ्य सप्तमशताब्दीं यावद् समये एकः निर्द्दिष्टः कालः भवितुं शक्यते। शतककाव्यपरम्परायाः आलोचनेन ज्ञायते यत् षष्ठशताब्दीतः प्राक् न केनाऽपि एकेन कविना एवम्भूतं शतकत्रयं विरचितम्। अतः शकत्रयरनायाः सर्वप्रथमं श्रेयः भर्तृहरिं प्रति एव गच्छति। नीतिशतकम् एकशतश्लोकसंवलितमेकं सुललितं खण्डकाव्यं अस्मिन् काव्ये भर्तृहरेः शास्त्रज्ञानं, नीतिपालनं, सिद्धान्तनिर्धारणं तथा कलाज्ञानं – सर्वमेव प्रतिफलितम्।

कविः भर्तृहरिः उज्जयिन्याः राजा आसीत् इति केचन कथयन्ति। परन्तु राजकीयकार्यं वा राजकीयमैश्वर्यं तस्मै सुखं दातुं समर्थं नासीत्। अतः स संसारं प्रति वीतस्पृहः सन् राजप्रासादं तत्याज इति किंवदन्ती अस्ति- यत् एकदा सः यदा राजदरवारे पण्डितैः सार्धमासीत् ,तदा एकः ब्राह्मणः तत्र अगत्य तस्मै एकम् अमृतफलं प्रदत्तवान्। तस्य फलस्य भक्षणेन राजा सर्वदा युवकः स्थास्यति तथा तस्य मृत्युः कदापि न भविष्यति इति उक्तवान्। राजा इदं श्रुत्वा तत् फलं स्वयं न खादित्वा तस्य प्रियतमा महिषी चिरं यौवने तिष्ठतु तथा कदाचिदपि तस्याः मृत्युर्न भवतु इति मनसि निधाय प्रियतमायै पत्न्यै तत् फलं प्रदत्तवान्। सा पत्नी फलस्य महत्त्वं ज्ञात्वा तत् फलं स्वयं न खादित्वा तस्याः गोपनप्रेमिकः एकः महामन्त्री नित्ययुवकः भवतु तथा च स अमरः

अस्तु इति विचिन्त्य तस्मै अमृतफलं प्रदत्तवती। महामन्त्री अपि तत् फलं स्वयं न खादित्वा तस्य गोपनप्रेमिकायै प्रदत्तवान्। अन्ततोगत्वा सा गोपनप्रेमिका वस्तुतः राजानं भर्त्तृहरिं प्रति आसक्ता आसीत्। अतः सा तत् अमृतफलं स्वयं न खादित्वा राजा सर्वदा युवा भवतु; अमरश्च अस्तु इति मनसि विचार्य्य तस्मै राज्ञे तत् फलं प्रादात्। पूर्वप्राप्तं फलं पुनः दृष्ट्वा राजा अनुसन्धानद्वारा सर्वं ज्ञात्वा अतीव निराशः अभूत्। वैराग्येण जर्जरितः सन् कथितवान् यत्

यां चिन्तयामि मनसा मयि सा विरक्ता।
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः॥
अस्मत्कृते च परितुष्यति काचिदन्या
धिक्ताञ्च तञ्च मदनञ्च इमाञ्च माञ्च॥[251]

इदमेव नीतिशतकस्य प्रथमं पद्यं सूचयति यत् संसारे मनुष्यः स्वजीवने सफलतायाः यात्रायाः प्रारम्भात् एव संसारस्य कुटिलता-छलना-प्रवञ्चनादिविषये प्रथमतः जानीयात्। तदनन्तरं नीतिशतके प्रदत्तैः उपदेशैः यदि स्वजीवनं चालयेत्, तर्हि सः सर्वाङ्गसुन्दरः भवेत्।

नीतिशतके ये ये उपदेशाः प्रदत्ताः, तेषु मुख्याः, अत्र दिङ्मात्रम् उपस्थाप्यन्ते यथा - स्वजीवने साफलताप्राप्त्यर्थं गुणिगणसकाशात् ज्ञानार्जनम् अस्माभिः कर्त्तव्यं, मूर्खता सर्वदा सर्वथा च वर्जनीया; यतः मूर्खजनः जीवनावधौ असंपूर्णः असमर्थः, अतः नितयमसफलः भवति तथा स्वजीवनं निरर्थीकरोति। मानवजीवनं पवित्रीकर्त्तुम् महामूल्यमुदेशं प्रददता भर्त्तृहरिणा उच्यते यत् –

लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः।
कदाचिदपि पर्यटञ्शशविषाणमसादये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्॥[252]

सर्वदा मूर्खता एव निन्दनीय यतः कवेः मतानुसारं संसारेऽस्मिन् असंभवमेव संभवितुं शक्यते। यथा अग्निः जलेन वारयितुं; सूर्यातपः छत्रेण, गजः निशितांकुशेन, रोगः औषधपानेन निराकर्त्तुं शक्यते। परन्तु मानवस्य जडता नैव निवारणीया इति कृत्वा भर्त्तृहरिणा स्पष्टतया प्रतिपादितं यत् मूर्खस्य

[251] नीतिशतकम्-2
[252] तत्रैव, 5

कृते न वा शास्त्रविहितं नाऽपि लौकिकञ्च किमपि औषधमस्ति। मूर्खत्वविनाशकः उपायो नास्त्येव। अतः उच्यते-

शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो
नागेन्द्रो निशितां कुशेन समदो दण्डेन गोगर्दभौ।
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्॥[253]

मानवजीवने दुर्जनः सदा परिहर्त्तव्यः इत्येतदर्थं समुचितोपदेशमाध्यमेन महाकविना नीतिशतके उक्तम् यत् – खलजनाः अतीव भयङ्कराः, ये अन्येषां जनानाम् अपकारं कुर्वन्ति एव। केनाप्युपायेन दुर्जनाः सन्मार्गे वर्तयितुं दुःसाध्या भवन्ति। अतः उच्यते – यः खलान् सत्पथे नेतुमिच्छति, सः कथमपि मधुविन्दुना क्षाराम्बुधेः माधुर्य्यमिच्छति, यदेव असंभवम्, यथा-

व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
छेत्तुं वज्रमणिञ्छिरीषकुसुमप्रान्तेन संनह्यते।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरिहते
नेतुं वाञ्छति यः खलान्पथि सतां सूक्तैः सुधास्यन्दिभिः॥[254]

यदा किंचिज्ज्ञोहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोस्मीत्यभवदवलिप्तं मम मनः।
यदा किंचित्कंचिद्बुधजनसकाशादवगतं
तदा मूर्खोस्मीति ज्वर इव मदो मे व्यपगतः॥[255]

साहित्यसंगीतकलानां प्रशंसा अतीव सुन्दरतया महाकविना स्वग्रन्थे कृता। यतः साहित्यं विना, संगीतं विना उत्तमकलाकौशलादिकं विना मानवजीवनम् आनन्दविरहितं निष्प्राणं जायते। संसारेऽस्मिन् एतादृशः साहित्यसंगीतकला- विमुखः नरः परन्तु साक्षात् पशुपदवाच्यः भवति यस्य कुत्राऽपि आदरः न संभवति। अतः उच्यते –

साहित्यसंगीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम्॥[256]

---

[253] तत्रैव,11
[254] तत्रैव, 6
[255] तत्रैव, 8
[256] तत्रैव,12

अतः बहुजन्मलाभादनन्तरं जीवः यदि मानवरूपेण जन्मग्रहणं करोति, तर्हि एतदेव तस्य परमं सौभ्गयम्। अतः तस्य मानवजन्म एव केवलम् उत्तमज्ञानार्जनेन सफलं जायते। यदि जनः विद्या विभूषितान्तकरणः , सदा तपोयुक्तः , दानशीलः, उत्तमचरित्रयुक्तः स्यात् , तर्हि तस्य जीवनं परिपूर्णताम् अवाप्नोति। तदवैपरीत्ये मनुष्यरूपेण पशुभूतास्ते भूमौ भारभूताः संचरन्ति इत्युच्यते नीतिशतके यथा-

येषां न विद्या न तपो न दानं न ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूत्वा मनुष्यरूपेण मृगाश्चरन्ति॥[257]

विभोः असीमयानुकंपया मनुष्यः स्वीयैः अन्तर्निहितगुणग्रामैः सदा राजते। कोऽपि तस्य तादृशीं प्रतिभामपहर्त्तुं न समर्थः। इति सुन्दरतया कविना प्रकृष्टोदाहरणमाध्यमेन वर्ण्यते यत् –

अम्भोजिनीवननिवासविलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां
वैदग्ध्यकीर्त्तिमपहर्त्तुमसौ समर्थः॥[258]

अस्मात् सुस्पष्टं यत् मानवस्य लोकविश्रुतां स्वाभाविकनिपुणतां, तस्य यशः कीर्तिम् अपहर्त्तुं, वा तस्मात् पृथक्कर्त्तुं सृष्टिकर्त्ता ब्रह्माऽपि न समर्थः, अन्यस्य तु का कथा इति।

अस्माकं व्यवहारः सर्वदा उत्तमसंस्कारसंपन्नः भवेत्। सर्वेषां वचनमपि सुसंस्कृतं तथा परिमार्जितं भवेत् इति नीतिशतके प्रतिपादितं यथा-

केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥[259]

सज्जनानां कृते सद्भिः सह सदा संगमः करणीयः, येषां सन्मार्गप्रदर्शनेन उत्तमज्ञानवितरणेन मानवजीवनं तापत्रयदहनात् विमुक्तः भूत्वा परमशान्तिं लभते। जनः सर्वदा सुखी जीवति। अतः वर्ण्यते यथा-

---

[257] तत्रैव,13
[258] तत्रैव,18
[259] तत्रैव,19

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्संगतिः कथय ! किं न करोति पुंसाम्॥[260]

मानवजीवनावधौ सकलवाधानां दूरीकरणार्थं बहुमूल्यमुपदेशं प्रददता महाकविना उक्तं यत् –

दुर्जनः परिहर्तव्यो विद्यया भूषितोऽपि सन्
मणिनाऽलंकृतः सर्पः किमसौ न भयंकरः॥[261]

अर्थात् एकः मानवः विद्यया विभूषितः भवतु नाम, परन्तु महामूल्येन मणिना अलंकृतः सर्पः यथा भयंकरः यथा भयंकरः तथा प्राणनाशकः सन् विद्यालंकृतः असज्जनः भयानकः भूत्वा प्राणिनां नाशकः भवति। एतदर्थं दुर्जनसङ्गः सर्वदा नरेण परिहर्त्तव्यः। किन्तु सज्जनः नित्यं वन्दनीयः येन मानवस्य उपकारः एव भवति। महज्जनाः उत्तमगुणानाम् अधिकारिणः भवन्ति। एतदर्थं ते सर्वैः अनुकरणीयाः। महात्मनां गुणाः भवन्ति यथा- विपदि अवचिलिताः ते धैर्यधारणेन दुःखयन्त्रणादिकं दूरीकुर्वन्ति। समृद्धौ क्षमाशालिनः, सभायां वाक्पटुयुक्ताः, संग्रामे पराक्रमयुक्ताः, यशसि प्रीतिसंपन्नाः. वेदादिषु आसक्ताः भवन्ति। अतः संसारेऽस्मिन् एतादृशाः विराजन्ते, सर्वदा संसारस्य उपकारं साधयन्ति। तेषां निर्मलचरित्रं सदा सर्वोत्कृष्टगुणैः उद्भासितं दृश्यते यथा-

संपत्सु महतां चित्तं भवत्युत्पलकोमलम्।
आपत्सु च महाशैलशिलासंघातकर्कशम्॥[262]

पुनश्च उच्यते यत् – मानवः यदि आचारव्यवहारे अत्यन्तम् अनुद्धतः तथा विनम्रः स्यात् , तर्हि स सदैव सकलकार्यम् अक्लेशन साधयन् सर्वैः प्रशंसनीयः भवति। परोपकारसाधनेन ते यशस्विनः जायन्ते इतिकृत्वा यथार्थतया महाकविना प्रतिपादितं यत् –

भवन्ति नम्रास्तरवः फलोद्गमैः
नवाम्बुभिर्भूमिविलम्वनो घनाः।

---

[260] तत्रैव, 23
[261] तत्रैव, 53
[262] तत्रैव, 66

अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्॥[263]
अतः सर्वैःपरोपकारः कर्त्तव्यः इत्यपि नीतिशतके उच्यते –
श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्नतु कंकणेन
विभाति कायः करुणापराणाम्
परोपकारैर्न तु चन्दनेन॥[264]
अतः प्रसिद्धिः अस्ति-
अष्टादशपुराणेषु व्यासस्य वचनद्वयम्
परोपकारः स्वर्गाय पापाय परपीडनम्॥

एवं प्रकारेण जीवनं सर्वाङ्गसुन्दरं कर्त्तुं ये ये उपदेशाः प्रदत्ताः ते संप्रत्यपि प्रासंगिकाः। अतः महात्मभिः प्रदत्ताः उपदेशाः अस्माभिः सदा परिपालनीयास्तथा अनुसर्त्तव्याः, यतः सज्जनाः मानवस्य कृते सन्मार्गप्रदर्शकाः भवन्ति॥

## सहायकग्रन्थसूची


1. नीतिशतकम् -भर्त्तृहरिविरचितम्, बालमुकुन्देन विरचितया संस्कृतव्याख्यया विभूषितम्, प्रकाशकः लाला रामनारायण लाल् , इह्लावाद। 1911
2. नीतिशतकम् -भर्त्तृहरिविरचितम्, (पद्यानुवादः श्री जानकीवल्लभ पट्टनायकः) प्रकाशकः विद्यापुरी, कटकम् -1990
3. नीतिशतकम् -भर्त्तृहरिविरचितम्, (अनुवादः गोविन्दचन्द्र साहु) प्रकाशकः –श्री जगन्नाथ रथ प्रकाशनम्, कटकम्-2021
4. संस्कृत साहित्य इतिहास- प्रो.हरेकृष्ण शतपथी, किताब महल, कटक-2023
5. संस्कृतसाहित्येतिहास, रामचन्द्रमिश्रः, चौखम्बा प्रकाशन, वाराणसी-1975


❖❖❖

[263] तत्रैव, 71
[264] तत्रैव, 72

# प्राचीनसंस्कृतवाङ्मये नारीणां वर्णनम्

दीपान्विता सुलक्षणी

## 0.0 उपोद्घातः

ऐतिहासिकदृष्ट्या प्राचीनकाले प्रणीता ग्रन्था एव तत्तत्समयस्य समाजे विद्यमानानां मानवानां व्यवहारम्, चिन्ताधाराश्च प्रकाशयन्ति। सृष्टेः प्रारम्भकाले साधारणजनेषु काऽपि भेदभावविषयिणी धारणा न दृश्यते। परन्तु मानवानां मनोरञ्जनाय पात्रादीनां नायकनायिकानाञ्च विषये चरित्रोपस्थापने भेदोपभेदाः भरतचार्यप्रणीते नाट्यशास्त्रे परिलक्ष्यते। अतोव नायिकापात्राणां (नारीणां ) उत्पतिविकासश्च कथमभूत्? वेदोपनिषद् पुराणादिषु नायिकानां नारीणां वा तात्पर्यं किम्? एतेषां विविधविषयाणामवधारणा विविधप्राचीनसंस्कृतग्रन्थेषु कृतास्ति। प्राचीनसंसकृतनिबन्धग्रन्थेषु साधारणतो नारीणामङ्गवर्णनं सौन्दर्यविषये च विशेषभावेन दृश्यते। नार्यः खलु कोमलाङ्गिन्यो भवन्ति। पुरुषाणामपेक्षया नारीणामङ्गानां सैन्दर्यमधिकतया अनुभूयते। विशेषरूपेण उपमालङ्कारमाश्रित्य तासां विविधाङ्गानां रमणीयवर्णनं सर्वेषां कृते हर्षदायकं भवति।

## 1.1 वेदे नारीवर्णनम्

अखिलभूमण्डलेऽस्मिन् समुपलब्धेषु विविधभाषागतप्राचीनग्रन्थेषु वेदः सर्वेभ्यः प्राचीनतम इति सर्वैरेव स्वीक्रियते। संस्कृतवाङ्मये वेदानां स्थानमन्यतमम्। काव्यरसस्य मुख्यावलम्बनादिव्यापारो भवति नायिका। यस्या अपरूपयौवनसंपन्ना-लावण्ययुक्ता-कान्तिमाधुर्य्यादि-गुणविशिष्टा-हृदयाकर्षिता च अन्येभ्यो विशिष्यते। वस्तुतः वेदे कुत्रापि नायिकेति शब्दस्य साक्षात् प्रयोगो नैव दृश्यते। अपि तु नायिकेति शब्दमभिव्यञ्जयितुं रूपसौन्दर्य्यालङ्कारादिभिः तात्पर्यसूचकस्य नायिकार्थद्योतकस्य शब्दस्य प्रयोगोमन्त्रेषु विशेषतया परिलक्ष्यते। वैदिकसाहित्ये नारीणां कृते प्रयुक्ताः दुहितृ-मातृ-स्वसृ-जाया-इडा-अम्बा-काम्यादिशब्दास्तासां वैशिष्ट्यं माहात्म्यं वा प्रतिपादयन्ति। वैदिकवाङ्मये नायिकाशब्दस्याधारः तथा पर्य्यायहेतुकशब्दाः कुत्रचित् देवीरूपेण, नारीरूपेण, पुत्रीरूपेण, क्वचिन्मातृरूपेण क्वचिच्च पत्नीरूपेण वा दृष्टिगोचरी भवन्ति। अतो वैदिककालात् नारीपात्रस्य विशेषमहत्त्वं दरीदृश्यते, परन्तु वैदिकानाम् ऋषीणां स्तुतिपरकचिन्ताधारा

काव्यरसेन अनुकल्पितं कृत्वा कतिपया वैदिकदेव्यः उषा-वाग्देवी-श्रीदेवी-रात्रि-पृथिवी-सरस्वती-अरण्यानीप्रमुखाः वर्णिताः सन्ति।

वेदेषु वर्णितेभ्यो देवीसूक्तेभ्यः तथा देवीनां रूपमाधुर्येण नायिकायाः सौन्दर्यस्य परिचायकतत्त्वं प्राप्यते, नाट्यस्याधारभूमयः सम्वादसूक्तानि अपि नायिकायाः विशेषत्वं सौन्दर्यंचोपस्थापयति। ऋग्वेदस्य दशममण्डलस्य पञ्चनवतिः संख्यकसूक्तस्यान्तर्गतं "पुरुरवा-उर्वशीसम्वादः" प्रसिद्धोऽस्ति। अत्र मर्त्यमानव पुरुरवसा सह निःसर्गसुन्दर्या अप्सरस उर्वश्याः प्रणयगाथा वर्णितास्ति।

वैदिकवाङ्मये उपनिषदां स्थानं चतुर्थं ब्रह्मज्ञानप्रतिपादनत्वात् महत्त्वपूर्णं च। वैदिकसूक्तेषु येन प्रकारेण दार्शनिकविचारधारायाः स्वरूपं प्राप्यते उपनिषत्सु अपि सत्सदृशं विकसितरूपं दृष्टिगोचरं भवति। केनोपनिषदि देवीरूपेण विराजिताया उमादेव्या अतीवलालित्यमयसौन्दर्यवर्णनं दृश्यते। तत्र नारीषु श्रेष्ठा उमा हैमवतीति नाम्ना सूचिता सा रुद्रपत्नी, हिमालयस्य पुत्री, विद्याया अधिष्ठात्री देवी तथा च शोभामयी ब्रह्मविद्यारूपिणी भवति। सर्वज्ञेन ईश्वरेण सह उमादेवी सदा हि विराजते। अतोऽनेन प्रकारेण अत्र नारीणां महत्त्वं प्रतिपादितम्। वेदान्तदर्शनेऽपि "सर्वं खल्विदं ब्रह्म" इति महावाक्यानुसारं नारी अपि ब्रह्मणोऽन्तर्भूता भवति। ब्रह्म-मायया शक्त्या हि जगत् प्रपञ्चं रच्यते, परन्तु प्रकृतार्थे माया ब्रह्मणोऽभिन्ना शक्तिर्भवति। यतो माया त्रिगुणात्मिका, नारी अपि त्रिगुणात्मिका। अनेन कारणेन अस्माकं शास्त्रे शक्त्या अनेकावतारतत्त्वं परिलक्ष्यते, तथा सर्वत्र नारीप्रशंसा वर्णिता।

## 1.2 नारीप्रशंसा

स्मृतिशास्त्रे नारीणां पतिव्रतास्वरूपं वर्णितमस्ति, यत् नाट्यशास्त्रे स्वाधीनपतिकानायिकारूपेण अभिधीयते यथा- सा स्त्री स्वाध्वी, या मनोवाग्देहैः भर्तारं न व्यभिचरति। लोकेऽस्मिन् एतादृशी स्त्री कीर्तिमाप्नोति, तदनन्तरम् अपरे लोके स्वर्गादिसुखं प्राप्नोति। याज्ञवल्क्यस्मृतौ अपि पत्यनुसारं भूषितया स्त्रिया सह सहवासस्य विधानं सूचितमस्ति, येन स्त्री सदा स्वपत्युः प्रित्यनुरक्ता भवितुमर्हति। मनुस्मृतौ नारीणां संरक्षणं तथा तासां महिमप्रदानेन सदैव कस्मिंश्चित् स्थाने अनैतिकविधिमाध्यमेन नारीणां स्थानं गौणमिति पक्षमपि प्राप्यते। येन अद्यतनमानवसमाजं प्रति चरमः विद्वेषस्य प्रभावितरूपं दृश्यते।

### 1.3 पुराणे नारी वर्णनम्

अग्निपुराणे अग्निदेवेन वशिष्ठाय स्त्री-पुरुषयोः शरीरलक्षणं वर्णनं कृतम्। पुरातनकाले यो भगवन् समुद्रः गर्गमुनिमुपदिशति स्म, तत्र स्त्री-शरीरलक्षणं यथा- सा स्त्री उत्तमा पदवाच्या, यस्याः ऊरुजघनौ तथा नितम्बप्रदेशः स्थूलः, नेत्रे मदिरे तथा उन्मत्तपारावतसदृशे भवतः। यदुक्तम्-

शस्ता स्त्री चारुसर्वांगी मतमातंगगामिनी।
गुरुजघना या च मत्तपारावतेक्षणा॥[1]

अपि च यस्याः केशः सुन्दरः कृष्णवर्णयुक्तः, लघुशरीरं तथा लोमरहितमंगं भवति, यस्याः दर्शने हृदये मोहस्योद्रेकं जायते, पादयुगलौ पृथिव्याः समभूमितलं पूर्णरूपेण स्पृशति, स्तनद्वयं परस्परं संयुक्तं स्यात्। नाभिः दक्षिणावर्तमेव, योनेः आकृतिः पीप्पलपत्रसदृशमेव, गुल्फद्वयेन अन्तःप्रविष्टमेव पूणमांसालयुक्तं भवति, नाभिः अंगुलसदृशः गभीरः। कृशोदरी च भवेत्, यस्याः शरीरे रूक्षरोमावलीनिमित्तं रूक्षशरीरं भवति ताः रमण्यः न शोभनीयाः। नक्षत्र-वृक्ष-नदी-माध्यमेन यस्याः नामकरणं भवति तथा कलहादिकं यस्याः सर्वदा अतीव प्रियं भवति सैव स्त्री अपि प्रिया न भवति। यदुक्तम्-

सुनीलकेशी तन्वंगी विलोमांगी मनोहरा।
समभूमिस्पृषशौ पादौ संहतौ च तथा स्तनौ॥
नाभिः प्रदक्षिणावर्त्ता गुह्यमश्वत्थपत्रवत्।
गुल्फौ निगूढौ मध्येन नाभिरंगुष्टमानिका॥
जठरं न प्रलम्बश्च रोमरूक्षा न शोभना।
नर्क्षवृक्षनदीनाम्नि न सदा कलहप्रिया॥[2-3]

नाट्यशास्त्रे या नायिका सा सत्ययुगे तथा वेदोत्तरयुगे अप्सरा इति नाम्ना अभिहिता। वाल्मीकिरामायणे बालकाण्डे नायिकायाः तथा अप्सरसः उत्पत्तिविषयकं  वर्णनं दृश्यते। तत्र मुनिश्रेष्ठो विश्वामित्रो रघुकुलनन्दनं श्रीरामं विशालपुर्य्यां प्राचीनेतिहासस्य वर्णनप्रसंगे देवराजेन्द्रस्य मुखात् श्रुतं वर्णयति। दितेः पुत्रो दैत्यः तथा अदितेः परं धर्मात्मनः पुत्रः देवता। उभौ असीमशक्तिशालिनौ आस्ताम्। समुद्रमन्थनकाले सागरतः सुन्दरकान्तियुक्ता अनेका अप्सराः समुत्पन्नाः तासां अप्सरसां संख्याः षष्टिकोटिः । परन्तु ताः

नायिकाः देवानां दानवानां स्वपत्नीरूपेण अस्वीकृतवत्यः। अतः ता अप्सराः सामान्याः तथा साधारणस्त्रीरूपेण परिगण्यन्ते।

## 2.1 रामायणे नारीवर्णमम्

भरतचार्यप्रणीते नाट्यशास्त्रेऽपि सामान्यनायिकायाः सादृश्यं दरीदृश्यते। अतः परं पुनः वरुणस्य कन्या वारुणी सा सुरायाः तथा मदिरायाः देवीरूपेणाभिहिता। रामायणे नारीणाम् अनेकानि रूपाणि वर्णितानि सन्ति। यथा- माता कौशल्या, विमाता कैकेयी, विरहिणी ऊर्मिला, पतिव्रता मन्दोदरी, सती सुलोचना च। एतासां नारीणां प्रसंगो विद्यते परन्तु उदात्तचरित्रेण स्वकीया मुग्धानायिकारूपेण सीतादेवी प्रसिद्धिं लभते। अत्र महर्षिवाल्मीकिः सीतादेव्याः चरित्रं सर्वश्रेष्ठप्रतिव्रतारूपेण वर्णयति। सीता पतिव्रतासु अन्यतमा।

## 2.2 महाभारते नारीवर्णनम्

भारतीयलौकिकसाहित्ये रामायणानन्तरम् आर्षकाव्यं महर्षि-व्यासविरचितं 'महाभारतम् ' इति विश्वविदितम्। अत्र नारीचरित्राणां मध्ये देवी गंगा, सत्यवती, अम्बा, अम्बिका, अम्बालिका, गान्धारी, राजमाता कुन्ती, माद्री, दुःशीला, द्रौपदी, भानुमती, चित्रांगदा, सुभद्रा, वैशाली, उत्तरा, उलूपी, हिडिम्वा चेत्यादीनां नारीपात्राणां चरित्रवर्णनानि दृश्यन्ते। परन्तु एतासां मध्ये महाभारतस्य प्रमुखनारीरूपेण द्रुपदनन्दिनी-याज्ञसेनी-पाण्डववधूः द्रौपदी मानसे प्रसिद्धिं लभते।

## 3.1 नाट्यशास्त्रे नारीवर्णनम्

नारी अभिनेत्री वा नाटकस्य प्राणवाहिनी धारा सा स्वस्याः रूपसौन्दर्यस्याकर्षणेन सहृदयान् आनन्दयति तथा आकर्षति। भरताचार्येण अभिनेत्र्याः लक्षणप्रसंगे उक्तं यत्-

अथ रूपगुणोदार्यसौभाग्यधैर्यशीलसम्पन्ना।
पेशलमधुरस्निग्धधानुनादिकलचित्रकण्ठा च॥
हेलाभावविशेषज्ञाः सत्त्वेनाभिनयने च।
माधुर्येण च सम्पन्ना ह्यातोद्यकुशलस्तथा॥
स्वरतालयतिज्ञाश्च तथाचार्योपसेविकाः।
चतुरा नाट्यकुशलाश्चोहापोहविचक्षणाः।
रूपय्यौवनसम्पन्ना नाटकीयाः प्रकीर्तिताः॥[4]

नाटके आभ्यन्तरप्रकृत्यान्तर्गतमेव मुख्यरूपेण नायिकायाः महत्त्वं विशेषप्रशंसनीयं भवति। सामाजिकप्रतिष्ठया, सदाचारस्य पवित्रतया, वयोवैशिष्ट्येन, अङ्गसौन्दर्येण तथा कामभावस्य स्थित्याद्याधारेण च स्वरूपं विचार्यते।

## 3.2 वात्सायनप्रणीतकामसूत्रे नारीवर्णनम्

वात्सायनाचार्यप्रणीतं 'कामसूत्रम्' भारतीयसंस्कृतेः कामविषयक आकारग्रन्थोऽस्ति। कामशास्त्रम् ऐन्द्रियसुखादिहेतुकस्य विश्वप्रसिद्धो ग्रन्थ एव वर्त्तते। तत्र कामसूत्रे कामोपभोगाय मुख्यतः त्रिविधाः नायिकाः समुल्लिखिताः सन्ति। यथा- कन्या, पुनर्भू, वेश्या च। अविवाहिता तथा कुमारी कन्या इति कन्या नायिका। सा नवयौवना लज्जाशीला अपि च पित्रोः परतन्त्राधीना भवति। अत एव परकीया इत्यभिधीयते। उत्तमनायिकानां कृते एषा नायिका प्रयुज्यते। पूर्वपरिणीता नायिका यदि पुनर्विवाहं करोति तर्हि सा पुनर्भू नायिकाभिधीयते। एतादृशी नायिका नायकेन परित्यक्ता भूत्वा अथवा नायकस्य मरणानन्तरं स्वयमेव इच्छानुसारेण पुनर्विवाहं करोति। वेश्या नायिका अधमनायकस्य उपभोगयोग्या भवति। वेश्या नायिका असाधारणनायिका भवति। प्राचीनकाले वेश्या नायिका शिक्षिता, कामविद्यायां कुशला चासीत्। एतादृशी नायिका तदानीन्तनस्य समाजस्य एका अङ्गभूता इति मन्यते।

## 3.3 विभिन्नकाव्यनाटकादिषु नारीवर्णनम्

काव्यक्षेत्रे दृश्यकाव्यस्य सौन्दर्योत्कर्षसाधनाय नायिकायाः विशेषमहत्त्वमस्ति। नायिका काव्यशरीरस्य अनन्यभूता चित्ताकर्षणरूपा चरित्रसमन्विता भवति। अतः काव्येषु नायिकाभेदानां स्वरूपाणाञ्च वर्णनं काव्यशास्त्रे समुपलभ्यते। वराहमिहिरकृतबृहत्संहितायां कन्यायाः सगुल्फपाद-वर्णनं यथा –

स्निग्धोन्नताग्रतनुताम्रनखौ कुमार्याः
पादौ समोपचितचारुनिगूढगुल्फौ॥
श्लिष्टांगुली कमलकान्तितलौ च यस्या
स्तामुद्वहेद् यदि भ्रूवोऽधिपतित्वमिच्छेत्॥ [5]

अर्थात् यस्याः कन्यायाः पादौ स्निग्धौ, समुन्नतौ, अग्रभागतनुविशिष्टौ, रक्तवर्णनखयुक्तौ, समानौ, परिपुष्टसुन्दरौ, निगूढगुल्फविशिष्टौ, श्लिष्टांगुलियुक्तौ, तथा कोमलकान्तितुल्यसुन्दरकान्तिविशिष्टौ भवतः। राजत्वमिच्छुको मनुष्यः तया साकं विवाहं कुर्यात्। पण्डितश्रीगणेश्वररथवाचस्पतिशर्मविरचिते

प्रध्यापकलक्ष्मणचरणविश्वालमहोदयेनानूदिते प्रकाशिते च 'लिङ्गराजायनम्' इति काव्ये पार्वत्याः पादयोः महात्म्यं सुन्दरभावेन वर्णितमस्ति। कदाचित् देवी पार्वती लिङ्गराजस्य पूजार्थं वृक्षात् पुष्पमवचेतुं मनसि चिन्तयित्वा, देवदर्शनानन्देन निजपादपद्मद्वयं पीडयित्वा एकाम्रपीठमध्यभागस्य भ्रमणं कृत्वा ह्रदसमीपे विहरन्तीः कामधेनुः दृष्टवती। ताः कामधेनव आगत्य निजक्षीरैः प्रभुं लिङ्गराजं स्नपयित्वा हठात् पुनः प्रत्यावर्त्तनार्थम् उद्यता बभूवुः। पार्वती भक्त्या तासां कामधेनूनां क्षीरैः प्रभुं लिङ्गराजं स्नपयितुं ताः रुरोध। यदा पार्वती निजरूपेण ताः धेनू अवरोद्धुं समर्था नासीत्। तदा गोपालिनीवेशेन अवरुरोध। तस्मिन् समये कीर्त्तिवासनामकौ द्वौ राक्षसौ कामबाणपीडितौ सन्तौ बलात्कारेण पार्वतीमपहर्त्तुम् इष्टवन्तौ। पार्वती यथाशीघ्रं तयोः राक्षसयोः मनोभावं ज्ञात्वा विद्युदिव आकाशमार्गं गतवती। तत्परं तौ मदान्धौ राक्षसौ मारयितुं स्वपतिं शिवं स्मृतवती। शिवोऽपि गोपालवेशेन आगत्य उक्तवान् – "इमौ राक्षसौ अस्त्रपुरुषाभ्यां न वधयोग्यौ। तस्मात् त्वमेव तौ मारयितुं समर्थोऽसि। पार्वती यत्र भूमौ पादाभ्यां तौ मारितवती, सा भूमिः 'देवीपादहरा' इति तीर्थरूपेण प्रसिद्धा। पार्वती कीर्त्तिवासं मारयित्वा पृथिव्या राक्षसकृतं दुःखं दूरीकृत्य परिश्रमात् पर्वतगह्वरे निद्रां गतवती। तस्मिन् समये निजपादरूपादभिन्नः शिवः तत्रागत्य आत्मानं पार्वत्याः पादसंवाहनकार्ये नियुक्तवान्। यदुक्तं तत्र पद्याकारेण –

तदीहासुहा यत्र पद्मामियं सा हरा पाददेवी विपर्यासपूर्वाम्।
यथा तत्वधाच्छान्तिसौख्यप्रदाम्वा तथा तापहा भोगमोक्षस्थलीयम्॥
निहत्यमेन्यो भुवोभारमुग्रं विनाश्य क्लमात् स्वापमापाद्रिकुञ्जे।
समेत्य स्वरूपादाभिनेन्दुमौलिस्तदियांघ्रिसंवाहने त्वं युयोज॥[265]

संस्कृतनिबन्धग्रन्थेषु नारीणाम् अङ्गभूतहृदयविषये सुन्दरभावेन वर्णनं कृतम्। हृदयं वर्णत्रयेण निष्पन्नं भवति। (क) हृ-हरति इत्यानुसारेण हृदयं शरीरेण रसरक्तादीन् एकत्रीकरोति। (ख)द-ददाति इत्यानुसारेण हृदयमेव सर्वेषां धातूनां कृते रसरक्तादीन् पूरयति। (ग) य-यच्छति इत्यानुसारेण हृदयं आकुञ्चितं विस्तारितं च भवति। डा.सुनीलकुमारयादवविरचित-रचनाशारीरविज्ञानानुसारेण हृदयस्य स्वरूपं यथा-

पुण्डरीकेश सादृश्यं हृदयं स्यादधोमुखम्।

---

265 लिङ्गराजायने।

जाग्रतस्तद्विकसितं स्वगतश्च निमीलति॥
चरकसंहितायां हृदयमधिकृत्य वर्णनं यथा-
तत्र प्राणवहानां स्रोतसां हृदयं मूलमहास्रोतश्च।
रसवहानां स्रोतसां हृदयं मूलं दश च धमन्यः॥
सुश्रुतसंहितानुसारेण हृदयस्य वर्णनम्-
स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च।
हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते॥[266]

आदिशंकराचार्यः स्वकीयसौन्दर्य्यां भगवत्याः ओष्ठवर्णनावसरे कथयति यत् सुन्दरदन्तविशिष्टे ; मातः ; भगवति, तव स्वभावेन रक्ताभसौष्ठस्य शोभायाः सादृश्यं सूचयिष्यामि। प्रवाल लतायां यदि फलमायाति तत्र फलितं विम्वफलं उष्ठस्यप्रतिविम्वरागेण अरुणितपूर्वकं अंशतोऽपि उपमितभवितुं लज्जितं न भविष्यति। यदुक्तं पद्येन-

"प्रकृत्या रक्तायास्तव सुदति दन्तच्छदर-
प्रवक्षे सादृश्यं जनयितु फलं विद्रुमलता।
न विम्बं तद्विम्वप्रतिफलनरागादरुणितं
तुलामध्यारोढुं कथमिववविलज्जेतकलाया॥ 15

तथैव ग्रीवावर्णनावसरेऽपि सौन्दर्यलहर्य्यामुक्तम्-
" भुजाश्लेषान्नित्यं पुरदमयितुः कण्टकवती
तव ग्रीवा धत्ते मुखकमलनालश्रियमियम्।
स्वतः श्वेता काला गुरुवहुलजम्वालमलिना
मृणालीलालित्यं वहति यदधो हारलतिका॥16॥"

अभिनव-शारीरसंहितानुसारेण केशरोमादीनां वर्णनं यथा-
" केशा भवन्ति सूत्राणि वहिसत्वचादंकुरितानि हि।
अन्तस्त्वक्स्थितांकुरकेषुगाढरुढानियानिहि॥17॥
तृतीयमासाद् गर्भकालस्य केश-विकासः प्रजायते।
नेत्रोष्ठ-भ्रूवोरुर्ध्वं नासाच्छिद्रे तथैव च।
चिवुके चैव सर्वादौ केशाः प्रादुर्भवन्ति हि॥ 18॥(शा.स.2123-4)

सौन्दर्यलहर्य्यामपि आदिशंकराचार्यः एकस्मिन् पद्ये देव्याः सर्वांगानां वर्णनं कृतवान् यथा-

---

[266] सु.चि.2/2।

अराला केशेषु प्रकृतिसरला मन्दहसिते
शिरीषाभा चित्ते दृषदुपलशोभा कुचतटे।
भृशं तन्वी मध्ये पृथुरुरसिजारोहविषये
जगत्त्रातुं शम्भोर्जयति करुणा काचिदरुणा॥[11]

सौन्दर्यचेतनाभिवृद्धये अन्यतमो भवति कविशेरोमणेः कालिदासस्य ग्रन्थसमुच्चयः। तत् प्रणीते 'अभिक्षज्ञानशाकुन्तलम् ' इति नाटके नायिकायाः शकुन्तलायाः सौन्दर्यं कविकल्पनायाः सौन्दर्यचारुत्वेन आकृतिः यासां सुन्दरं सर्वमपि तासाम् अलङ्कारा एवं कल्पना दृष्टिसौन्दर्यस्याधारेण प्रकाशते। अनुरूपभावेन नायिकायाः शरीरसौन्दर्यस्य विचित्रोदाहरणं 'मेघदूतम्' इति काव्येऽपि प्राप्यते। तत्र महाकविकालिदासो वार्त्तासंवाहकदूतरूपमेघं नायिकां प्रति गृहगमनाय प्रेरयति। यस्याः शरीरं भवति कृशांगी, पूर्णयौवनसम्पन्ना, पक्कदाडिमवीजदन्ता, परिणतविम्बफलसदृशाधरोष्ठी, भीतमृगीसदृशनयना, दीर्घनाभियुक्ता, नितम्बभारेण मन्दगामिनी, कुचाभ्याम् ईषदवनता तथा तस्याः सृष्टिरचना प्रथमतया ब्रह्मणा निर्मिता। एवं प्रकारेण साहित्यजगति नायिकायाः सौन्दर्यं विशेषकल्पनाधारेण प्रसंगक्रमेण च प्रतिभाति। "किमिव हि मधुराणां मण्डनं नाकृतीनाम्" इति सुप्रसिद्धोक्त्यनुसारं सौन्दर्यशालिन्याः अपरूपलावण्यायाः नायिकायाः कृते न किमपि सौन्दर्यवृद्धिकारक-प्रसाधनभूतस्यालङ्कारस्य आवश्यकत्वम्। भामहाचार्यस्योक्त्यनुसारं- "न कान्तामपि निर्भूषं विभाति विनिताननम्" अर्थात् नायिकायाः मुखकमलं तनुलावण्यं च सौन्दर्यमेव भूत्वापि अलङ्कारेण सज्जीकरणं विना चारुत्वं प्रकाशते। संस्कृतसाहित्यवाङ्मये नायिकायाः कृते विविधालङ्काराणां प्रयोगवर्णनं दृश्यते। यदेव तत्कालीनसमाजस्य निदानात्मकरूपेण प्राप्यते। नार्यः विविधसौन्दर्येण रचितं तिलकं तथा पुष्पगुच्छेन निर्मितमलङ्कारं ललाटस्याभूषणरूपेण प्रयोगं कुर्वन्ति। यथा- हर्षचरितम् इति काव्ये मालत्याः ललाटे धारणकृतं तिलकमणेः प्रयोगवर्णनं दृश्यते। नारीणां कर्णयोः व्यवहृतस्य एतादृशस्य अलङ्कारस्य वर्णनं महाकविकालिदासस्य काव्यग्रन्थे प्रायशः प्राप्यते। यथा- सुवर्णेन निर्मितकुण्डलम्

केशान्नितान्तघननीलविकुञ्चिताग्रा-
नापूरयन्ति वनितानवमालतीभिः
कर्णेषु च प्रवरकाञ्चनकुण्डलेषु
नीलोत्पलानि विविधानि निवेशयन्ति॥[12]

अपि च महाकविबाणभट्टस्य काव्यग्रन्थेऽपि महाश्वेतायाः कर्णयोः शोभायमानं मणिनिर्मितकुण्डलम्, कादम्बर्याः कर्णयोः दोलायमानं पत्रमकरमाणिक्येन निर्मितकुण्डलाद्यलङ्काराणां वर्णनं दृश्यते-

" असंदेश-दोलायित-मणिकुण्डलम्"

" दोलायमानपत्रमकरमाणिक्यकुण्डलंदधतीम्।"

स्वप्नवासवदत्तनाटकस्य गतिप्रवाहसञ्चालिका भवति नायिका वासवदत्ता। नायिकायाः सौन्दर्य-सौख्यादिमाध्यमेन नाटकतत्त्वं प्राणवत् हृदयग्राह्यं च भवति। अत्र पद्मावती अपि अन्या नायिका विद्यते। द्वे नायिके रूपयौवनसम्पन्ने, विविधगुणेषुमण्डिते, पतिप्राणे, शिल्पनिपुणे, क्रीडाकुशले, विलासवत्यौ, प्रीतियुक्ते च भवतः। तथापि वैसादृश्यं केवलं वासवदत्ता त्याग-करुणा-शौर्यादीनां प्रतिमूर्त्तिः। अपि च सा पद्मावती धीरा, धर्मप्रिया, विनीता, सत्यवादिनी च भवति। नायिकायाः शरीरलावण्यम्, कान्तिमत्ता तथा सौन्दर्यम् एकं चित्ताकर्षकतत्त्वं भवति। अतो नाटकेऽस्मिन् मुख्यनायिकायाः वासवदत्तायाः शरीरसुन्दरता महत्वपूर्णविशेषता वर्तते। वासवदत्तायाः समग्रशरीरलावण्यं कान्तियुक्तं पद्मसदृशमिव विभाति। महाकविकालिदासः नारीणां शारीरिकसौन्दर्यप्रकाशने सिद्धयोगी आसीत्। दृष्टान्तमेव तस्य नाट्यकृतिषु स्पष्टं प्रतीयते। मालविकाग्निमित्रनाटके नायिकामालविकायाः शरीरसौन्दर्यमपरूपमेव ज्ञायते। विक्रमोर्वशीयनाटके नामान्तःकरणेन तथा नायिकायाः चरित्रचित्रणेन दिव्यगुणमण्डिता अलौकिकनिसर्गसुन्दरी स्वर्गलोकस्य सुखादिभौतिकपदार्थस्य उपभोगकारिणी च अप्सरा उर्वशी नायिका भवति। तस्याः शरीरसौन्दर्यं विशेषोत्कर्षाधायकं भवति।

मालतीमाधवनाटके रसास्वादनाय मुख्यनायिका भवति मालती। अत्र सम्पूर्णनाटके मालत्याः रूपयौवनसौन्दर्यं तथा नायिकोचितविशेषत्वं प्रतिभाति। तस्याः स्वभावो भवति अतीवगाम्भीर्यपूर्णः। मालत्याः शरीरसौन्दर्यं सर्वेषां कृते हृदयाकर्षणस्य केन्द्रविन्दुः भवति। तस्याः सौन्दर्यं सौन्दर्यस्याधिदेवतायाः सौम्यभवनादपि अपूर्वलावण्ययुक्तमेव भवति। सा निश्चितरूपेण चन्द्रकला इव शोभते। तस्याः सौन्दर्यमंकनाय कामदेवः अंकनतूलिकायां कमलपुष्पदण्डं तथा च वर्णांकनाय चन्द्रकिरणम् उपकरणान् आसन्। नायकः माधवः सर्वदा तस्याः सौन्दर्यं चिन्तयित्वा विवेकशून्यः सन् अनुस्मर्यते तथा स अतिकष्टेन मालत्याः स्मृतिं त्यक्त्वा प्रत्यक्षज्ञानस्वरूपं प्रत्यागतवान्। अलङ्कारः शरीरांगसौन्दर्यस्य एकमाध्यमो भवति। येन

विशेषत्वेन नायिका स्वस्याः सौन्दर्यं प्रकटयति। मालती स्वयमलङ्कारेण सुसज्जिता भूत्वा तथा पुष्पमालां धारयित्वा नवविकशितलतासदृशसौन्दर्याधारेण गच्छति। तस्याः अलङ्कारसौन्दर्येण विवाहमहोत्सवे अपूर्वशोभा आसीत्।

उत्तररामचरितनाटके स्वकीया शुद्धचरित्रस्वरूपा नायिका सीतादेवी। सीतादेवी जन्मत एव विशुद्धा। अतः तस्याः चरित्रपरीक्षणाय अन्यैः शोधकपदार्थैः प्रयोजनं नास्ति। तथापि सन्दर्भवशात् सीतादेव्याः पवित्रता पावकपरीक्षया प्रमाणीक्रियते। अतः श्रीरामचन्द्रः तस्याः शुद्धतावर्णनाय कथयति यत्-

उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः।
तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः॥[10]

देवीसीतायाः पवित्रताम् उद्घोषयन्त्याः अरुन्धत्याः प्रशस्तवाक्यश्रवणेन देवादयः चराचरप्राणिवर्गाश्च सीतांगीकारेण तां प्रणमन्ति। श्रीरामचन्द्रोऽपि हर्षेण देवीं सीतां स्वीकरोति। तदनन्तरं महर्षिणा वाल्मीकिना सह कुशलवौ प्रविशतः। अन्ते च कुशलवाभ्यां सह सीतारामयोः मेलनेन उत्तररामचरितम् इति नाटकस्य सुखसमाप्तिः परिदृश्यते।

नाट्यकारभट्टनारायणकृतं 'वेणीसंहारम्' इति नाटकस्य गति-प्रवाहिका सञ्चालिका च नायिका भवति द्रौपदी। द्रौपदी उच्चक्षत्रियकुलसम्भूता वीरांगना अपि च सा स्वीया मुग्धा नायिकारूपेण परिलक्ष्यते। नाटकेऽस्मिन् नायिकासौन्दर्यापेक्षया नायिकायाः सुतीव्रोग्रता मानता वा दृश्यते। द्रौपद्या अपमाननं भीमादिपाण्डवानां कृते वज्रतुल्यम्। अतः भीमादिपाण्डवानां प्रतिशोधस्य मूलक्षेत्रं भवति कुरुक्षेत्रम्। द्रौपदी अस्य ऋणयज्ञस्य व्रतपालिनी भीषणयुद्धाननन्तरं भीमो द्रौपद्याः केशवस्त्रयोरपकर्षणकं दुःशासनं तीक्ष्णकरजैः तद्वक्षोविदारणेन वधं कृत्वा तस्य हृदयस्य उष्णरुधिरं पिबति। नाटकेऽस्मिन् अपमानितां द्रैपदीं प्रति यथा भीमस्य क्रोधाग्निजनितसहानुभूतिः दृश्यते, पक्षान्तरे द्रौपद्या अपि भीमं प्रति वैराग्यजनितानुभूतिः परिदृश्यते। यथा-द्रौपदी भीमः हत इति मिथ्यासमाचारं श्रुत्वा वदति यत्- "नाथ भीमसेन! त्वया किल मे केशाः संयमयितव्याः न युक्तं वीरस्य क्षत्रियस्य -- शिथिलयितुम्। तत्र प्रतिपालय मां यावदुपसर्पामि पुनः वध्नातु नाथो दुर्योधनरुधिरार्द्रेण हस्तेन दुःशासनविमुक्तं मे केशहस्तम्।"

नाटकेऽस्मिन् कौरवैरपमानिता द्रौपदी तेषां विनाशाय प्रतिजानीते। सा वीरस्य उद्धत्यस्य च हेतोः केवलं भीमसेनं प्रति अनुरागिणी भवति। नाटकस्य वाक्प्रसंगेन प्रमीयते यद् द्रौपदी वीरक्षत्रियारूपेण चित्रिता भवति न तु विलासिनीरूपेण तस्याः मुखमण्डलं सदा हि क्षत्रियोचिततेजसा प्रदीप्तं भवति। इदानीन्तनसमाजे नारीं प्रति अपमानस्य योग्यदण्डविधानस्य प्रतिमूर्तिभवति द्रौपदी।

एवं प्रकारेण कविनाट्यकारादयो विभिन्नग्रन्थेषु नायिकास्वरूपाणां नारीणां चरित्रं प्रतिपादितवन्तः। तत्रापि नायिकानां भूमिका सर्वश्रेष्ठा वर्तते। काऽपि नायिका कामपीडिता, अलौकिका, दिव्यादिव्यगुणसम्पन्ना, मुग्धा, सद्गुणाश्रिता, जनप्रिया, अन्या च गुरुजनादेशसमलंकृता, अलङ्कारविभूषिता च भवति। प्रायशः सर्वासां नायिकानां शरीरसंरचना भिन्ना, तथापि सर्वा अलङ्कारैः सुसज्जिताः सुशोभन्ते। कविनाट्यकारादयोऽपि तासां शरीरं स्वकल्पनया विचिन्त्य तदनुरूपमलङ्कारसम्भूतं निरूपयन्ति।

**उपसंहृतिः**

साधारणतः समाजे आदर्शप्रतिष्ठार्थं मनुष्यं सन्मार्गेण परिचालनार्थं च नारीणां प्रमुखभूमिका सर्वादौ ग्रहणीया। शिशोः जननादारभ्य तस्य लालनपालन-मौलिकशिक्षाप्रदानादिविषये नारीणां दायित्वं सर्वोपरि न्यस्तम्। नार्यस्तु यत्र पूज्यन्ते रमन्ते तत्र देवताः इति मनुमहर्षेरुक्तरपि नारीणामुत्कर्षतां प्रतिपादयति। संस्कृतनिबद्धग्रन्थेषु नारीणां विविधविषयकवर्णनमाध्यमेन अलौकिकता प्रतिपादिता अस्ति। यतो नारी खलु शक्तिस्वरूपिणी। प्रसंगेऽस्मिन् शंकराचार्येणोक्तं सौन्दर्यलहर्यां मङ्गलाचरणपद्ये " हे भगवति !" भगवान् शिवो यदा शक्तियुक्तो भवति, तदा सृजनादिकार्ये समर्थो भवति। अन्यथा चलितुमपि सामर्थ्यं न तिष्ठति। अतो या भगवती चलितुमपि सामर्थ्यं न तिष्ठति। अतो या भगवती हरिहरब्रह्मादिभिराराध्या, तां पूण्यहीनो मनुष्यः कथं वा प्रणन्तुं स्तोतुं वा समर्थो भविष्यति? यद् भवतु वेदोपनिषत्-पुराण-रामायण-महाभारत-विविधकाव्यनाटकादिषु नारीणां विविधविषयकवर्णनेन संस्कृतवाङ्मयं काले काले समुत्कर्षान्वितं प्राचीनसंस्कृति-परम्परा-ऐतिह्यादिस्मृतिप्रदायकं च भवति।

**पादटीका**

1.सुनीलकेशी तन्वंगी विलोमांगी मनोहरा। (अ.पु.244.2)

2. गुल्फौ निगूढौ मध्येन नाभिरंगुष्टमानिका॥ (अ.पु.244.3)

3. जठरं न प्रलम्वश्च रोमरुक्षा....... (अ,पु.244.4)
4. रूपय्यौवनसम्पन्ना नाटकीयाः प्रकीर्तिताः।(ना.शा.34/51 )
5.स्निग्धोन्नताग्रतनुताम्रनखौकुमार्या (वृ.सं.स्त्रीलक्षणाध्याये-1 )
6.तदीहासुहा यत्र पद्मामियं ....त्वं युयोज।( लिङ्गराजस्य ज्ञानकाण्डे-13/14)
7.प्रकृत्या रक्तायास्तव सुदति दन्तच्छदरुचे
प्रवक्ष्ये सादृश्यं जनयितु फलं विद्रुमलता।(सौ.ल.62)
8.असंदेश-दोलायित-मणिकुण्डलम्
( कादम्बरी.पृ.429,चौखम्वा संस्कृतसंस्थानम्,वाराणसी,1982)
9.दोलायमानपत्रमकरमाणिक्यकुण्डलंदधतीम्। (कादम्बरी.पृ.543)
10. उत्पत्तिपरिपूतायाः किमस्याः .......(उत्तररामचरितम्. 6/13)
11.जनकानां रघूणां च यत्कृत्स्नं गोत्रमङ्गलम्। (उत्तररामचरितम् 1/13)
12. केशान्नितान्तघननीलविकुञ्चिताग्रानापूरयन्ति वनितानवमालतीभिः
कर्णेषु........(ऋतुसंहारम्- 2/20)

## परिशीलितग्रन्थसूचीः-

1.वराहमिहिरविरचिता ‘बृहत्संहिता’ प्रकाशनम्- चौखम्वा विद्याभवनम्, वारणासी - 221001,संस्करणम्-2019
2. सौन्दर्यलहरी (आदिशंकराचार्यविरचिता) डा.नारायणदाशेन कृता व्याख्या, वासन्ती अफसेट्, रामकृष्णनगरम्, ब्रह्मपुरम्, प्रथमसंस्करणम्-2007।
3.चरकसंहिता, प्रकाशकम्-चौखम्वासुरभारतीप्रकाशनम्, वाराणसी, संस्करणम्-2013।
4.साहित्यदर्पणः(उत्कलानुवादः), उडिशा साहित्य एकाडेमी प्रकाशितः, द्वितीयसंस्करणम्-1987
5.अग्निपुराणम्, चौखम्वासुरभारतीप्रकाशनम्,वाराणसी।
6.कामसूत्रम्-वात्सायनप्रणीतम्, प्रतिभाप्रकाशनम्, दिल्ली-110007।
7.वासवदत्ता-सुबन्धुविरचिता, चौखम्वाप्रकाशनम्, वाराणसी, तृतीयसंस्करणम्-वि.सं.2066।
8.गोपीगीतम् (कितावमहल-प्रकाशनम् ) प्रथमसंस्करणम्- 1990।
9.सुश्रुतसंहिता, प्रकाशकम्-चौखम्वासंस्कृतसंस्थानम्, संस्करणम्- पुनःमुद्रणम्, वि.सं.2076।
10.ऋतुसंहारम् (कालिदासग्रन्थावली), उत्तरप्रदेशसंस्कृतसंस्थानप्रकाशितम्, सुदर्शनमुद्रकः, वाराणसी, प्रथमसंस्करणम्-सं.2000विक्रमाव्दः।

❖❖❖

# Health through Yoga

Dr. Rohit A. Talwalkar

**Abstract**

In this world there are different diseases crop up. Corona is one of them. Its adverse effect on our body and mind. Fear also increases because of corona. Teachings of Patanjali are useful even today. Yoga is boon to mankind. This paper focuses how yoga is useful for curing and preventing corona and how fear vanishes through yoga meditation.

**Key words**: Corona, health and yoga

## Introduction

Health is the most important among all things. World Health Organization defines health as "health is a state of complete physical mental and social well-being and not merely absence of disease." Scientists are busy in studying in nature of corona virus. In front of doctors presently three challenges. First rescue the corona virus patients. Second those who are not yet corona patient doesn't let them be corona. And third eliminate the futile anxiety of corona.Stress affects immunity. In such a situation meditation is aboon those in distress, and to humanity. It has been proved that meditation is most of the time better than medication. The word meditation is derived from Latin verb 'mederi' which means to heal. To get freedom from tension one has to practice meditation.

## Yoga meditation

In English Dictionary word meditation is not explained clearly. It is defined as 'to reflect upon', or to contemplate. But in Sanskrit, Chinese and Japanese

language it has explained precisely. It means to make the mind free from disturbing thoughts.

Sogyal Rinpoche says, "The gift of learning to meditate is the greatest gift you can give yourself in this life."[1]

A man is one who is master of his mind.The English word "man" is derived from Sanskrit √*man* which means mind. To be master of your mind is the meaning of being man.

The word yoga is derived from Sanskrit √*yuj* which means to join. Yoga-*darśana* is one of the important *darśana-s*. *Darśana* means direct experience. Yoga-*darśana* is also called *rājayoga-śāstra, bhāratiyamānasa-śāstra* and *pātañjala*-yoga-*śāstra*. One can improve physical, mental and emotional condition with the help of yoga. Yoga speaks about mind-body relationship.

Yoga advocates control over body, senses and mind, and recommends its perfection.

*Yamaniyamāsananaprāṇāyāmapratyāhāradhāra ṇādhyānasamādhayoṣṭāvaṅgāni.*[2]

Control, vows, posture, bioenergy control, withdrawal of senses from their objects, concentration, meditation and intense contemplation are eight limbs of yoga.

Non-violence, truthfulness, non-stealing, celibacy and non-hoarding are *yamas*. Cleanliness, contentment, austerity, self-study and surrender to God are *niyamas*.

Stable and comfortable pose is *āsana*. *Sthirasukhamāsanam.*[3]

**Prāṇāyāma**

Prāṇa means vital energy. It is also called citiśakti. Prāṇāyāma has two component parts. Prāṇa + Ayama. Ayam means extension or control. Prāṇāyāma

is not only control of breath but union of citiśakti with universal power through medium of breath.

Through control of breath one can attain cittavṛttinirodh makes brain active. Control over vital energy and extension of that energy are the purpose of Prāṇāyāma.

According to yoga, diseases and ailments are due to faulty ways of living, and bad habits. Since the cause of disease lies in the mistakes of the individual, its cure also lies in correcting those mistakes by the same individual. Man is enemy as well as friend of oneself. Man becomes ill because of ignorance of his own nature. With help of yoga one realizes own nature, and as a result he removes bad habits. Thus, man is responsible for causing as well as curing his diseases.

√ of all misery ailments is mind. All diseases originate in the mind first. The mere idea, I may catch cold prepares body for reception of germs. Meditation develops will powerand frees the mind from wrong notion. With meditation the physiology undergoes a change and every cell in the body is filled with more *prāṇa* (energy). This results in enthusiasm, joy and peace as the level of *prāṇa* in the body increases. Meditation brings brainwave pattern into an alpha state that promotes healing. Meditation brings personal transformation.

In the Harvard University research is going on how yoga practicesare useful on anxiety of corona virus. And they have realized by practice of yoga meditation one can get total relaxation. One patient who is corona positive by practice of yoga his result is negative.

- Ashwini Garg, captain within the service provider navy for 15 years, didn't enable Corona to dominate herself.




- He won the battle towards Corona even after Corona reported positive 5 times.

He claims that doing yoga for 2 weeks will increase WBC within the blood. Mental energy additionally elevated.[4]

Cleanliness is also one of the important steps of noble eight-fold path. By external cleaning (body face and hands) one can prevent corona virus.

**Mauna**

Silence is an old form of austerity. It is of two kinds. Akāra Mauna in which gestures, sign is allowed. But absence of speech in the Akara Mauna. This is not great and not useful in spiritual practice. Another Mauna is Kāshṭha Mauna which is useful for spiritual practice. Kashṭa is wood. In this Mauna not only absence of speech but also gestures, signs and writings etc. By observing noble silence, one acquires the power to refrain from useless talk and rude words.

Speech is tejomāyā according to Chhāndogya Upaniṣada. The gross portion of the tejas goes to

constitute bone, the middle portion to form marrow, and subtle portion to speech. Speech is a very powerful energy. 70% of the energy goes waste in the idle gossiping, if that energy is saved by Mauna that can be used for meditation. By practicing maun one can stop spreading germs of corona virus from saliva.

## Conclusion

In today's competitive and stressful world, and fast life, meditation plays a very important role. Meditation brings relaxation to the mind. Relaxation of mind is relaxation of brain and mind. Meditation offers peace and energy to the practitioner.

Teachings of *patañjali* are useful even today. Yoga is non-sectarian, and scientific techniques to observe mind and body. Yoga meditation cures diseases and destroys stress.

Yoga meditation will never do harm or will never have any adverse effect as some medicines.This technique of meditationis beneficial for physical and mental help of individual. Yoga practices of *āsanas* and meditation etc. may yield beneficial results even in absence of one's subscription to its philosophy.

Yoga meditation destroys futile anxiety. Yoga meditation is one of the tools to cure corona patients. With help of Yoga one can prevent corona.

### References

1. M.G. Chitkara (2001) Encyclopedia of Buddhism, APH Publishing House, New Delhi, Vol. VII p 9.
2. H. Aranya (1963) Yoga Philosophy of Patanjali, State University of New York Press Albany; YS II.29
3. Ibid: YS II. 46
4. Edited by Ashish Kumar | NavbharatTimes.com | Updated: 21 Apr 2020,

### Bibliography

1. M. R. Desai (1972) The Yogasutra of Patanjali, Desai Publication, Kolhapur
2. M.G. Chitkara (2001) Encyclopedia of Buddhism, APH Publishing House, New Delhi, Vol. VII
3. H. Aranya (1963) Yoga Philosophy of Patanjali, State University of New York Press Albany

❖❖❖

# भट्टिकाव्ये मीमांसादर्शनतत्त्वानां विश्लेषणम्

**देवसुजनमुखार्जी**

**प्रबन्धसारः**

आस्तिकदर्शनेषु अन्यतमं दर्शनं मीमांसादर्शनम्। अस्मिन् दर्शने मुख्यतया यज्ञपरकाणां वचनानां व्याख्यानं बहुप्रशस्यतया कृतं वर्तते। वेदस्य कर्मकाण्डमाधारीकृत्य इदं दर्शनं प्रवृत्तम्। अस्य दर्शनस्य प्रणेता महर्षिः जैमिनिः। इदं दर्शनमनीश्वरवादि दर्शनम्। अत्र आत्मादीनां विवेचनं नैव क्रियते। अनेन च दर्शनेन वेदस्य तथा वेदस्थितशब्दानां च नित्यताम् आपादयति। अस्मिन् दर्शने मन्त्र एव सर्वश्रेष्ठः।

महाकविना भट्टिना विरचितं काव्यं भट्टिकाव्यमिति प्रसिद्धम्। महाकविः भट्टिः तत्त्वज्ञः पण्डितः आसीत्। तेन विरचिते भट्टिकाव्ये न केवलं छन्दोऽलङ्काररसविशिष्टा गाथा विद्यते, अपि तु विविधदार्शनिकतत्त्वानां सम्भारोऽत्र दृश्यते। तत्रैव अन्यतमस्य मीमांसादर्शनस्य अपि भूरि सम्भारोऽत्र काव्ये दृश्यते। तेषां तेषां विषयाणां, प्रसङ्गानां, श्लोकानां च वेदोक्तमन्त्रैः सह याथार्थ्यं ख्यापयता कविना यथोक्तं तस्य विश्लेषणम् अस्मिन् प्रबन्धे यथामति क्रियते।

**कुञ्चिशब्दाः-** मीमांसा, दर्शनम्, यज्ञः, स्वर्गः, मन्त्रः, काव्यम्, वेदः, आस्तिकदर्शनम्।

महर्षिः जैमिनिः मीमांसादर्शनस्य प्रतिष्ठाता। तेन प्रणीतं मीमांसासूत्रं मीमांसादर्शनस्य सूत्रग्रन्थः। मीमांसावेदान्तदर्शनं समानतन्त्रम्। पूर्वमीमांसा कर्मकाण्डप्रधाना भवति। वेदस्य कर्मकाण्डे यानि सर्वाणि यागयज्ञादीनि विहितानि सन्ति तेषां समर्थनमेव अस्य वादस्य मुख्यमुद्देश्यम्। एतस्माद् अस्य अपरं नाम 'कर्ममीमांसा।'

मीमांसकैरुच्यते यत् वेदः अपौरुषेयः नित्यश्च। अपौरषेयत्वाद् वेदः भ्रान्तिरहितः। वेदः स्वतःप्रमाणश्च। वेदविहितकर्मकाण्डः धर्मः, वेदनिषिद्ध-कर्माचरणमधर्मः। वेदविहितकर्मानुष्ठानेन कर्मबन्धनेभ्यः जीवानां विच्छिन्ने सति मोक्षलाभः सम्भवति।

आत्मा नित्यः अमरश्च। मृत्युना आत्मध्वंसने सति 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति वेदवाक्यं निष्फलं स्यात्। मीमांसकैः आत्मा-स्वर्ग-नरकादीन् स्वीकुर्वन्ति, किन्तु जगतः कर्तृरूपेण ईश्वरः न मन्यते। ईश्वरः कर्मणः फलदाता नास्ति। यथार्थकर्मानुष्ठानेन फललाभो भवति। कर्मफलमेव सृष्टेः नियामकम्।

मीमांसकप्रभारकरमते प्रमाणं पञ्चविधम्, यथा- प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दः, अर्थापत्तश्चेति। किन्तु कुमारिलभट्टमते षट् प्रमाणानि। उक्तैः पञ्चभिः प्रमाणैः सह 'अनुपलब्धिः' इति नामकं प्रमाणं कुमारिलेन अभिप्रेतम्। मीमांसादर्शने कर्मैव धर्मः इत्यभिहितम्। कीदृशं कर्म धर्मरूपेण परिगण्यते इति प्रश्ने सति मीमासंकैः प्रत्युत्तरितं यत् वेदविहितं कर्मैव धर्मः। वेदविहितेन कर्मणा मुक्तिलाभो सम्भवति। वेदबोधितः अभिलषितपदार्थसाधनभूतो धर्मः। यथा - यागादयः।

अग्निहोत्रादियागादिकर्म धर्मः। पक्षान्तरे वेदनिषिद्धकर्मानुष्ठान-रूपमनिष्टसाधनम् अधर्मः। यथा विषाप्लुतबाणेन निहतपशूनां मांसभक्षणमधर्मः।

मीमांसादर्शनस्य प्रतिष्ठातुः जैमिनेः मुख्यमुद्देश्यमासीत् यागयज्ञान्वितानां वेदवाक्यानां दार्शनिकविश्लेषणम्। वेदस्य भागद्वयम्- मन्त्रः ब्राह्मणश्चेति। कर्मकाण्डे वेदस्य मन्त्रभागस्योपयोगिता अनस्वीकार्या। मन्त्रस्य यथार्थोच्चारणेन अपूर्वनाम्ना शक्तिविशेषः उत्पद्यते। अनया शक्त्या मुक्तिः स्यात्। मन्त्रलक्षणे जैमिनिनोक्तम् - "तच्चोदकेषु मन्त्राख्या।"[267]

महाकविः भट्टिः भट्टिकाव्ये अलङ्कार-च्छन्द-व्याकरशास्त्रैः सह दर्शनशास्त्रीयतत्त्वानामपि भूरि सन्निवेशं चकार। भट्टिकाव्यस्य विविधसर्गेषु छन्दोऽलङ्कारव्याकरणसाङ्ख्ययोगादीनाम् आलोचनं यथा दृश्यते तथैव मीमांसादर्शनस्यापि तत्त्वानामुपनिबन्धनं परिलक्ष्यते। काव्येऽस्मिन् बहुषु स्थानेषु वेदविहितयागकर्मणां प्रसङ्गो वर्णितः, यः मीमांसादर्शस्य सारः। एतद्विहायापि भट्टिकाव्ये प्रयुक्तैः विविधशब्दैः वाक्यैः च मीमांसादर्शनस्य समर्थनं दृश्यते। तदत्र अधुना वर्ण्यते।

[267]मीमांसादर्शनम् –२/१/३२

भट्टिकाव्ये शवर्या सह वार्तालापकाले रामचन्द्रेण पृष्टं यत् देवभोग्यहविमन्त्रैः शवरी शोधकार्यं करोति उत यज्ञे आहरणयोग्यायाः सोमलतायाः वन्दनं करोति?

अवश्यपाव्यं पवसे कच्चित्त्वं देवभाग्यविः।
आसाव्यमध्वरे सोमं द्रुजैः कच्चिन्नमस्यसि॥[268]

भट्टिकाव्ये सप्तदशसर्गे अपि इन्द्रजित् निकुम्भिलायज्ञागारे आवृत्त्या अग्नौ आहुतिप्रदानं कृतवान् –

तत्रेन्द्रजितमैक्षेतां कृतधिष्ण्यं समाहितम्।
सोऽजुहोत् कृष्णवर्त्मानमामनन्मन्त्रमुत्तमम्॥[269]

मन्त्रातिरिक्तो वेदभागो ब्राह्मणः। अयं द्विविधः– विधिः अर्थवादश्चेति। विधिः चतुर्विधाः– उत्पत्तिविधिः अपूर्वविधिः, विनियोगविधिः, अधिकारविधिश्चेति। एतद्विहाय अन्यदृष्ट्या विधिः द्विविधः– नियमविधिः परिसङ्ख्याविधिश्चेति। परिसङ्ख्याविधिः एकः निवर्तकविधिः। उभयोश्च युगपत्प्राप्तावितरव्यावृत्तिपरो विधिः परिसङ्ख्याविधिः। अनेन किमपि न विधीयते किन्तु इतरनिवृत्तिः स्यात्। अस्योदाहरणम् "पञ्च पञ्चनखा भक्ष्याः"[270] इति। येषां प्राणिनां प्रत्येकस्मिन् हस्ते पादे वा पञ्च पञ्च नखाः सन्ति ते प्राणिनः पञ्चनखाः इति। मानवाः अपि पञ्चनखाः। शास्त्रमते– शशक-शल्लकी-गोधा-खड्गी-कूर्मेतराः पञ्चनखाः न भक्षणीयाः। पञ्चनखसम्बन्धे रामयणे उक्तम्-

पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रियेण राघवः।
शल्यकः श्वाविधो गोधा शशकः कूर्मश्च पञ्चमः॥[271]

मनुसंहितायामस्ति -"श्वाविधं शल्यकं गोधां खड्गकूर्म्मशशांस्तथा...।"[272] (अत्र श्वाविधः शल्यकस्य विशेषणमिति।)

व्यक्तिविशेषे पञ्चनखविशिष्टप्राणिभक्षणे मनुष्याणामनुरागः स्यात्। किन्तु उल्लिखितेन विधिवाक्येन एतान् पञ्चनखान् विहाय अन्ये पञ्चनखाः न भक्षणीयाः। येषां रुचि वर्तते तैः एव पञ्चनखानां मांसभक्षणं क्रियते, किन्तु

---

[268]भट्टिकाव्यम्, ६/६५
[269]तत्रैव, –१७/३०
[270]पूर्वमीमांसादर्शनम् – सुखमयभट्टाचार्यः, पृष्ठा - ८१
[271]रामायणम्, किष्कन्ध्याकाण्डम् –१८/३९
[272]मनुसंहिता –५/१८

अपरेषां पञ्चनखानां मांसभक्षणं निषिद्धमस्ति। येषामासक्तिरेव नास्ति तैः मांसभक्षणं नैव क्रियते चेदपि विधिवाक्येन ते मांसभक्षणे न प्रेर्यन्ते।

इदं विधिवाक्यं समानरूपेण भट्टिकाव्ये अपि समुपलभ्यते। रामः सुग्रीवेण सह मित्रतां सम्पाद्य बालिनं हतवान्। मृत्योः प्राग् बाली राममुक्तवान्

पञ्च पञ्चनखा भक्ष्याः ये प्रोक्ताः कृतजैर्द्विजैः।
कौशल्याज शशादीनां तेषां नैकोऽप्यहं कपिः॥[273]

मीमांसादर्शने कर्म द्विविधम् – अर्थकर्म गुणकर्म चेति। यत्कर्म आत्मविषयकमपूर्वजनकं तदेव अर्थकर्म। इदं त्रिविधिम् – नित्यं नैमित्तिकं काम्यं च। यत् कर्म प्रतिदिनं करणीयम्, अकरणे प्रत्यवायसाधकमिति तदेव नित्यकर्म। यथा – सन्ध्योपासना-पितृतर्पणादीनि। कस्यापि निमित्तं यत्कर्म क्रियते तत् नैमित्तिकं कर्म। यथा – अशौचं, प्रायश्चित्तमिति। कामनापूर्वकं यत् कर्म क्रियते तत् काम्यकर्म। यथा - यागादयः।

भट्टिकाव्ये बहुवारम् एतद्दशानि कर्माणि समुपलभ्यन्ते। सन्ध्यावन्दना-प्रातःसन्ध्याजप-नित्यकर्म-पितृतर्पणप्रभृतीनां नित्यकर्मणां बहुवारं प्रयोगः संदृश्यते। भट्टिकाव्यस्य चतुर्थसर्गे रामस्य कर्मकुशलतावर्णनकाले कविः तस्य सन्ध्याकालीनो मन्त्रजपः, सूर्यप्रणामः, सन्ध्याजपस्य च प्रसङ्गमुल्लिखितवान् –

आतिष्ठद्गु जपन् सन्ध्यां प्रकान्तामायतीगवम्।
प्रातस्तरां पतत्रिभ्यः प्रबुद्धः प्रणमन् रविम्॥[274]

षष्ठसर्गे अपि सीताहरणानन्तरं पत्नीविरहेण दुःखितेन रामेण रोदनं क्रियते चेदपि पितृपुरुषाणामुद्दिश्य तर्पणं कृतवान्। आर्तेऽपि तेन कदापि धर्मः न परित्यक्तः –

स्नानभ्यषिचताम्भोऽसौ रुदन् शोकमूर्च्छितः।
तथ्यभ्यषिक्त वारीणि पितृभ्यः शोकमूर्च्छितः॥[275]

नैमित्तिकर्मरूपेण अशौचपालनस्य प्रसङ्गोऽपि उक्तः भट्टिकाव्ये। भट्टिकाव्यस्य तृतीयसर्गे दशरथस्य मृत्योरनन्तरं पुत्रभरतस्याशौचपालन-पितुः अन्तिमकृत्य-दाहसंस्कारिदीनां प्रसङ्गः उल्लिखितः।[276] लक्ष्मणभरताभ्यां पितुः मृत्युसंवादः रामेण अवगतः। तदनन्तरं नद्यां स्नात्वा पितरम् उद्दिश्य तर्पणं

[273]भट्टिकाव्यम्, –६/१३४
[274]तत्रैव, –४/१४
[275]तत्रैव, –६/२३
[276]तत्रैव, –३/३३-३५

कृतवान्।[277] ऊनविंशसर्गे अपि रावणस्य मृत्योरनन्तरं विभीषणस्य अशोच्यकर्मणः, रावणस्य देहसंस्कारादीनां, जलदानादिक्रियायाः, प्रेतक्रियायाः च प्रसङ्गः उल्लिखितोऽस्ति।[278] विंशसर्गे अपि सीतायाः अग्निप्रवेशरूपो प्रसङ्गः प्रायश्चित्तकर्म स्मारयति।

काम्यकर्म त्रिविधम्। यस्य कर्मणः फलभोगः इहलोके क्रियते तत् ऐहिकफलककर्म। मरणादनन्तरं परलोके यस्य कर्मणः फलमात्रं लभ्यते तत् पारत्रिकफलककर्म। यस्य कर्मणः फलमिहलोके तथा परलोके समुपलभ्यते तत् ऐहिकपारत्रिकफलककर्म। भट्टिकाव्यस्य प्रथमसर्गे दशरथकृतस्य पुत्रेष्टियज्ञस्य प्रसङ्गोऽपि उल्लिखितोऽस्ति।[279]

भट्टिकाव्यस्य अन्तिमसर्गे रामेण अश्वमेधयज्ञस्य आयोजनं कृतमासीत्।[280] अनेन यज्ञेन स्वर्गलाभो भवति। एवञ्च प्रथमसर्गे दशरथस्य वर्णनाकाले दशरथेन पितृतर्पणं तथा यज्ञेन स्वर्गदेवतानां तुष्टिविधानमपि उल्लिखितमस्ति।[281] मीमांसादर्शने दैव-पित्र्यकर्मणां कालनियमोऽपि उक्तः। महर्षिजैमिनिना पित्र्यकर्मणः कालनिर्धारणकाले प्रोक्तम्- "इतरेषु च पित्र्याणि"[282] अर्थात् दैवकर्मकालेतरे काले श्राद्धादिपित्र्यकर्म करणीयम्। येषां श्राद्धकर्मणां कालः सुनिर्दिष्टो नास्ति, तेषां सम्पादनं कृष्णपक्षे तथा अपराह्णकाले कर्तव्यम्।

भट्टिकाव्यस्य षष्ठसर्गे शवर्या सह वार्तालापकाले अमावस्यायां(कृष्णपक्षे) पितृतर्पणकरणार्थं रामेण शवरी आदिष्टा –

स तामूचेऽथ कच्चित्त्वममावास्यासमन्वये।
पितॄणां कुरुषे कार्यमपाकैः स्वादुभिः फलैः॥[283]

भट्टिकाव्यस्य विविधेषु स्थानेषु सोमयाजी[284]-सोमयाग[285]-कुण्डपाय्य-उपचाय्य-अग्निचित्य[286]-अग्निष्टोम-ज्योतिष्टोम[287]-आहिताग्नि-

---

[277]तत्रैव, –३/५०
[278]तत्रैव, –१९/९-१६
[279]तत्रैव, –१/१०-१२
[280]तत्रैव, –२२/३२
[281]तत्रैव, –१/२,४
[282]मीमांसादर्शनम्(जैमिनिसूत्रम्) –६/८/२५
[283]भट्टिकाव्यम्, ६/६४
[284]तत्रैव, –४/१२,५/११,१२
[285]तत्रैव, –५/३७

रथचक्रचित्[288]-दक्षिणाग्नि[289]-यज्ञीयपिष्टक-होमामृत[290]-यज्ञहवि[291]प्रभृतयः शब्दाः बहुवारं व्यवहृताः। एतैः शब्दैः मीमांसादर्शनस्य सारः स्मर्यते यत् वेदविहितकर्मानुष्ठानम्। तेषां वेदविहितानां कर्मानुष्ठानानां प्रयोगः भट्टिकाव्ये परिलक्ष्यते-ऋग्यजुषमधीयानान् सामन्यांश्च समर्चयन्।

बुभुजे देवस्यां कृत्वा शूल्यमुख्यञ्च होमवान्॥[292]

अतः उपर्युक्तालोचनेन स्फुटं प्रतीयते यत् भट्टिकाव्यस्य विविधेषु सर्गेषु वेदविहितकर्मणः यः प्रसङ्गो वर्णितः तेन मीमांसादर्शनस्य मूलतत्त्वमेव प्रतिपाद्यते। पुनरेतद्विहायापि विविधानां वाक्यानां शब्दानां च प्रयोगेण कवेः भट्टेः मीमांसादर्शने पाण्डित्यमवगम्यते। तेन साङ्ख्यदर्शनस्य प्रवक्तुः कपिलमुनेः नाम अपि उल्लिखितः- "सुप्रतिष्णातसूत्राणां कपिष्ठलसमत्विषाम्॥"[293]

**उपसंहारः**

परिशेषे उच्यते यत् महाकविभट्टेः मीमांसादर्शनानुसारिणि वेदविहितकर्मविषये यथार्थज्ञानमासीत्। तत्कृते भट्टिकाव्ये यथा मीमांसादर्शनोक्ततत्त्वानां बाहुल्यं दृश्यते तेन तस्य मीमांसाज्ञानेन सह वेदज्ञानमपि चकास्ति। प्रबन्धेऽत्र प्रकृतदर्शनस्य नैकानि उदाहरणानि तत्त्वोपस्थापनपुरःसरं सान्वयं यथामति मया विवृतानि इति शम्।

**सहायकग्रन्थपञ्जी**


- भट्टिकाव्यम्, (भट्टिः) – सम्पा. विनायकशास्त्री लक्ष्मण शास्त्री, पाण्डुरङ्ग जावजी, बोम्बे, 1934, (अष्टमसंस्करणम्)।
- भट्टिकाव्यम्, (भट्टिः) – सम्पा. गोविन्दशङ्कर, शास्त्री वापत, द प्रोप्रिटर, बोम्बे, 1887।
- भट्टिकाव्यम्, (भट्टिः) – सम्पा. विनायकनारायणशास्त्रीयोशी खचेश्वरविनायकयोशी च, प्रोप्रिटर अफ जावजी दादाजीस् निर्णय-सागर प्रेस, बोम्बे, 1900।
- भट्टिकाव्यम्, (भट्टिः) – सम्पा. हरिपदचट्टोपाध्याय, कलिकाता, 1928।
- मीमांसादर्शन, ड. श्री सम्पूर्णानन्द, रमेश बुक डिपो जयपुर, 1955।
- मीमांसा के पारिभाषिक पदों का परिचय, डॉ.किशोरनाथ झा, राष्ट्रियसंस्कृतसंस्थान, दिल्ली, 2013।


❖❖❖

[286]तत्रैव, ६/८८
[287]तत्रैव, –९/९७
[288]तत्रैव, –६/१३१
[289]तत्रैव, –६/६७
[290]तत्रैव, –५/१२
[291]तत्रैव, –२/२७
[292]तत्रैव, –४/९
[293]तत्रैव, –९/८३

# The Vedic Dialogue Hymn of Sarama and the Panis

Dr. Yogini H Vyas

The Veda signifies the epiphany of the present cycle of the humanity known as the Aryan Race. The Vedic heritage preserves the best of a previous cycle and marks the beginning of another which owes its fundamental inspiration to the revelation enshrined in the Hymnal. Vedic mythology occupies a very important position in the study of the history of religions. Its mythology deals with a number of coordinate nature gods of varying importance. The dialogue or conversation hymns of the Rigveda appear to be the origin of the Buddhist dialogue poem. The Sanskrit term for this genre akhyana. According to Max muller, dialogue was repeated at sacrifices in honour of the Marutas or that possibly it was acted by two parties, one representing Indra, the other the Marutas, and their followers[294]. The opinion of Winternitz is something different. According to him, 'Most of these hymns are simply ballads of the half epic, half dramatic type, though not real dramas, as some scholars have thought them to be." [295]

The myth of Sarama and the Panis is found in the Rigveda 10.108. The hymn, as Griffith notes, 'is a colloquy between Sarama, the messenger of the gods or of Indra and the Panis or envious demons who have

[294] Max Muller, 'Sacred Books of the East, Vol.32, P.182
[295] Winternitz, "A History of Indian Literature, Vol. I, P103

carried off the cows or rays of light which Indra wishes to recover.[296]"

But according to Macdonell, the hymn is about "the capture by Indra of the cows of the Panis... (who) possess herds of cows which they keep hidden in a cave far beyond the Rasă, a mythical river. Sarama, Indra's messenger, tracks the cows and asks for them in Indra's name, but is mocked by the Panis.[297]"

Clearly, there is a basic difference in the above descriptions of the myth. Girffith's description suggests that the cows were stolen by the Panis and are sought to be recovered by Indra; Macdonell's description suggests that the cows belong to the Panis and are coveted by Indra.

The Panis address Sarama who has found her way to the rocky stronghold in which the stolen cows are imprisoned. The Panis inquire Sarama: 'With what intension has Sarama come to this place? Verily the way is long and difficult to be traversed by the persevering. What is the motive of thy coming to us? What sort of wandering was thine? How has thou crossed the Rasa's[298] water?"

In response to this query, Sarama tells them that she is the messenger of Indra and has moved out to recover from them the precious things they had kept concealed with them. As regards the crossing of the river Rasă, that could be accomplished on account of

---

[296]Griffith T.H. Hymns of the Rigveda (complete translation). P.550

[297] Macdonell A.A. The Vedic Mythology P.92

[298] Rash is in the this place a mythical stream that flows round the atmosphere and the earth. It appears to be a river of the Panjab, probably an affluent of the Indus. Griffith T.H. Hymns of the Rigveda, P.550.

किमिच्छन्ती सरमा प्रेदमानङ् दूरे ह्यध्वा जगुरिः पराचैः।
कास्मेहितिः का परितकाम्यासीत्कथं रसाया अतरः पयांसि। ऋग्वेदः- 10-108-1

the river's fear of transgression from Indra. Having heard of Indra, they inquired of her as to what Indra was the sort as whose messenger she had come from such a long distance. They also proposed in the same breath that if Indra were to come to them they would make him their friend and would also make him owner of their cows. Saramã however, replied that 'Indra, as the messenger of whom she had come from such a distance, was indomitable and that therefore he could not be subdued to accept their proposal of compromise going against his determination to recover all the cows they had kept concealed. Even deep streams of water were not capable of drawing him. If they went against his wish, they would lie dead forever.[299]"

But, undeterred, the Panis told her that the cows in search of whom she had come from such long distance at the heaven, could not be rescued without fighting and that their own weapons were too sharp to succeed against.[300]"

Sarama replied them with the rebuke that their words betrayed their un soldierliness while their bodies were not capable of with standing the attack of arrows[301] as they were full of sins. The path leading to them was anyway difficult to follow, that would not present any difficulty to Brhaspatiin reaching there.[302]"

---

299 तं वेद दभ्यं दभ्रत्स यस्येदे दूतीरसरं पराकात्।
न तं गूहन्ति स्रवतो गभीरा हता इन्द्रेण पणयः शयध्ये। ऋग्वेदः, 10-108-4

300 ऋग्वेदः- 10-108-5

301 Sayana explain असेन्या as सेनार्हाणि न भवन्ति your words are not equal to armies, i.e. your words are not to be feared', अनिषच्याः, he explains इष्वर्हाणि न सन्तु पराक्रमराहित्येन let them not be equal to arrows through your absence of prowers. सायणभाष्यम् on Rigveda, 10.108.

302 असेन्या वेः पणयोः वचांस्यनिषव्यास्तन्वेः सन्तु पापीः।
अधृष्टो व एतवा अस्तु पन्था बृहस्पतिर्व उभया न मृळात्।। ऋग्वेदः- 10-108-6

To this, the Panis replied that the wealth secured in the mountain is composed of cows, horses and precious gems: the Panis protect it who are good watchers; thou hast come to this lonely[303] spot in vain.

Sarama's reply to that challenge was that she was fully confident that seers like Ayasya, Angirasas and Navagvas[304] had already reached the place, however secret, at least under the effect of Soma and had taken a share of the cows from that place of hiding and the Panis would have to accept the veracity of the statement. At this stage, trying to tempt her, the Panis told her that she had understandably approached them under the strict order of the divine power and by no means on her own accord. As such, they offered to own her as their sister, promising to give her a share of the cows and suggested that she, therefore, should not go back Indra[305]. Sarama replied that she herself knew neither of brotherhood nor of sisterhood and that all this was known toIndra and the Angirasas. She told them and suggested them to better move away from the spot. Stressing the same point further, she asked them to go away so that cows might move lowing as per the law of creation as they has already been discovered by Brhaspati, Soma, pressing stones and enlightened seers.[306]"

It is apparent from the dialogue that the story underlying it cannot be treated as realistic. Indra cannot

---

[303] Sayana explains शङ्कितं गोभिः शब्दायमानम् (पदम्) resounding with the lowing of the oxen. सायणभाष्यम् on the word रेकु Rigveda, 10-108-7

[304] Navagvas: members of a mythological family, forming a division of the Angirases or closely connected with them.

Griffith T.H, Hymns of the Rigveda, p. 551

[305] एवा च त्वं सरम आजगन्थ प्रबोधिता सहसा दैव्यैन।
स्वसारं त्वा कृणवै मा पुनर्गा अप ते गवां सुभगेभजाम।। ऋग्.10.108.9

[306] Rigveda 10 108.11

be taken as a person having cows liable to theft etc. Panis also cannot be taken as a clan of humanbeings being in the need of cows. Sarama, as a bitch, coming from the heaven down to the earth with themessage of Indra is also not probable in any genuine sense. In view of these awkwardness involved in the realistic explanation of the story, some other way out has to be detected for its understanding.

The story cannot be treated as a concoction of the mind of the seer, whosoever, no matter she be Sarama herself, who traditionally is regarded as the seer of it. Had it, been so, the story should not have been referred to anywhere else in the Samhita at least in those portions of it which have been supposed to be earlier than one in which the hymn is located. It is relevant to point out here that the first and the tenth mandala of the Samhita have been regarded as latest additions to it while the mandalas second to seventh have been treated as the earliest ones. In the tenth mandala also, the latter half of it, in which the hymn in question is located, has by all means been considered as the latest additions. As against this textual position, the story of Sarama and Panis has been referred to in such early mandalas as the second and the third. These references obviously certify the deep-rootedness of the motif in the mind of the Vedic seer.

The mantra seen by Grtsamada in the second mandala, states that seers moved around constantly in search of some wealth of highest value and found it in the course of time as hided in the cave of Panis what they found out, however, was not cows but truth as discerned out of falsehood. Interestingly enough, in this mantra there is no reference at all to Indra and his cows, much less to Sarama, notwithstanding clear

mention of Panis and their cave.[307] Most celebrated seers of the Vedic age, Visvamitra (and his family) starts his account with the great difficulty involved in breaking the blocks of stone in the mountain which, according to him, were pierced through by wise seers, seven in number. In this difficult task the means they applied in breaking the blocks of stone was not anything else not their mind. In this way, the seer observes, they found out the whole path leading to Rta, the principle of universal order, since they had set out in the discovery of path, as also of the cows with full prior knowledge of them.[308] We find a large number of mantras[309] of spiritual illumination and manifestation of the sacred world. In view of the above details, we are now in a beter position to understand the symbolism involved in the Sarami pani dialogue. In this dialogue, cow stands for the Vedic wisdom embodied in mantras. She has been chosen to symbolise this wisdom particularly on account of the latter's nourishing quality. Just as cow's milk is the best nourishment for the human body, even so Vedic wisdom is capable of providing the best nourishing food to the human mind.

The Rigveda (10.14.10-12) goes on to identify Sarama's children, the Sarameyas with Yama, the god of death, an association reflected in the later Mahabharat story of Yudhishthira's ascent to heaven. The Sarameyas were ferocious, with four eyes each, who looked on men and guarded the path to Yamaloka. The Atharva veda (VIII.1.9) calls the Sarameyas

[307] Rigveda II.24.6.

[308] Rigveda, III. 31.5

[309] Rigveda: 3.31.6, 1.164.41, 3.55.1, 10.71.1, 10.71.3. 10.71.5, 5.45.1, 5.45.6, 5.45.7, 1.164.39

Shyama (the dark one) and shabala (spotted), the later term also used in the Rigveda.

Sarama also symbolized Ushas, the dawn, while the cows were the rays of the Sun that had been carried away by the night.

## Bibliography


- Griffith Ralph T.H. Hymns of the Rigveda, Pubished by Munshiram Manoharlal Publishers, New Delhi, 1987.
- Macdonell A.A., The Vedic Mythology, Som Nath Dhall, Sanjay Prakashan. New Delhi, First edition, 2004.
- Max Muller F. Sacred Books of the East, Motilal Banarsidas, Delhi-Varanasi, 1969.
- Kaegi A., The Rigveda, Eng. Trans by R. Arroswamith, Boston, 1886.
- Winternitz M, A History of India Literature, Calcutta, 1927.


❖❖❖

# The concept of *pratibhā* in Sanskrit Poetics: A brief study

Dr. Pratim Bhattacharya

From the very beginning of literary works poetry has been treated as the essence of human emotions. Almost all works of early literature are found in the form of poetry. Poetry is the sole subject-matter of Sanskrit Poetics. Any *kavikṛti* or *kavikarma*, even be it a drama or a prose, has been ascribed with the title '*kāvya*' in Sanskrit Poetics. The proficient critics of Sanskrit Literature have devoted their spirits in recognizing and establishing the causal factors that are responsible for a poetic composition. Sanskrit rhetoricians by and large have suggested three cardinal causes for any poetic creation – *pratibhā*, *vyutpatti* and *abhyāsa*.

*Pratibhā* or poetic genius has been regarded as the supreme causal factor of poetic creation from the very advent of Sanskrit Poetics. The word *pratibhā* derivatively stands for lustre (*dīpti*), knowledge (*jñāna*), intellect (*buddhi*) etc.

Bharata, the father-figure of Sanskrit Poetics, has admitted *pratibhā* as an integrated mental state of a poet. This mental state is transferred into the connoisseur when he watches a play being staged. Abhinavagupta, in his commentary on *Nātyaśāstra, Abhinavabhāratī*, has described the salient features of *pratibhā*. He opines that *pratibhā* is an extra-ordinary intellect which prevails in human mind as an impression from previous births.

Bhāmaha also emphasizes the supreme necessity of genius in poetry and he describes it as a poetic gift (*satkavitva*). He distinguishes scriptures from poetic works and maintains that a poetic creation can only originate from poetic genius[1].

Daṇḍin has accepted *pratibhā* as one of the essential causes of poetic creation. This wonderful *pratibhā*, he opines, is the continuous flow of latent impressions (*vāsanās*) borne from previous births[2].

Vāmana includes *pratibhā* in miscellaneous or '*prakīrṇa' kāvyāṅgas*'. He describes it as a seed (*vīja*) of poetic excellence and defines it as an innate impression acquired from previous births. Without the presence of *pratibhā* poetry becomes absurd[3].

Rudrạta defines *śakti* or *pratibhā* as a power by means of which various novel ideas and appropriate words with authentic meanings spontaneously appear in the concentrated mind of the poet[4]. The presence of this poetic faculty helps a poet to present his thoughts through suitable expressions without feeling any hindrance. Rudrạta opines that *pratibhā* can be divided into two categories – *sahajā* or natural and *utpādyā* or acquired. *Sahajā pratibhā* is inborn and considered to be better than *utpādyā* which is subsequently attained through *vyutpatti* and *abhyāsa*.

Ānandavardhana has given cardinal emphasis on *śakti* or *pratibhā* in the process of poetic creation. A flaw occurring from the lack of *śakti* in a *kāvya*, he asserts, can be noticed immediately by the critics. Abhinavagupta, in his commentary on *Dhvanyāloka* titled *Locana*, has defined *śakti* or *pratibhā* as a power which assists the poet in expressing his desired idea in a unique manner[5]. Elsewhere, Abhinavagupta defines *pratibhā* as '*apūvavastunirmāṇakṣamā prajñā*' or an intellect capable of producing novel ideas and

expressions. The distinguishing characteristic feature of *pratibhā*, he further adds, is the capacity to produce poetry comprising of passion, clarity and beauty[6]. The mention of '*apūrvavastunirmāṇakṣamatva*' as a salient feature of *pratibhā* is also in acquaintance with a very popular definition of *pratibhā* attributed to Bhaṭṭatauta, Abhinavagupta's preceptor and the author of *Kāvya-kautuka*— "*prajñā navanavanmeṣaśālinī pratibhā matā*". In the doctrines of Ānandavardhana, we find another characteristic feature associated with *pratibhā*—'*ayatnasiddhatva*'. It stands for the capacity to generate effortless and spontaneous poetic expressions in the mind of a poet. Ānandavardhana has described this aspect of *pratibhā* as blessing of Goddess Sarasvatī.

Rājaśekhara has accepted *pratibhā* as a constituent part of *śakti*. He defines *pratibhā* as a faculty by means of which sound, sense, figures of speech, poetic expressions like *vakrokti* etc and other similar poetical elements reveal themselves in the poet's mind[7]. This poetic faculty, he continues, is of two categories – *kārayitrī* or creative and *bhāvayitrī* or appreciative. The *kārayitrī pratibhā* is attributed to the poet as it helps him to impart suitable poetic elements in his work. This *kārayitrī pratibhā*, Rājaśekhara continues, is divided into three types, viz, *sahajā* (inborn poetic intuition), *āharyā* (impressions gathered from the present birth) and *aupadeśikī* (intellect acquired by advices from the preceptor or by spiritual rituals). The *bhāvayitrī pratibhā* is beneficent to the critic and connoisseur of poetic art. It helps him to comprehend the efforts and intentions of the poet and thereby renders the poetic creation fruitful. The poetic faculty or *pratibhā*, according to Rājaśekhra, is a divine insight characteristic to great poets. A general poet,

even at a state of awakening, is like a blind man, while the Goddess of speech reveals wonderful sound and sense to the great poet even when he is asleep. Poets, who are devoid of their worldly eyesight, have been heard to compose great poetic creations with the assistance of this divine insight[8].

Kuntaka maintains that all *mārgas* or styles of composition depend on the poetic intuition or *pratibhā* for their proper development. Even an ordinary poetic expression can flourish into an extra –ordinary one with the touch of poetic faculty[9]. Kuntaka defines Pratibhā as a power which arises from impressions acquired from previous and present births[10].

Mahimabhaṭṭa opines that worldly objects generate amazing beauty through the observation with poetic genius which is not possible if beheld with normal eyesight. He describes *pratibhā* as an intellectual insight of a poet who is contemplative of the various poetic elements such as *rasa*, *guṇa*, *śabda*, *artha* etc. This supernatural poetic intuition helps the poet to visualize the matters of the three times (*trikāla*) and thus is comparable to the third eye of Lord Śiva[11].

Mammaṭa, following the foot-steps of his predecessor Vāmana, has regarded *pratibhā* as co-joint causal factor of poetry and has also described it as the seed of poetry. Hemcandra has defined *pratibhā* in accordance to his predecessor Abhinavagupta. Paṇḍitarāja Jagannātha has mentioned poetic genius as the sole causal factor of poetic creation and defines it as the faculty of presenting any specimen of poetic art in quite suitable words and sense[12]. He describes *pratibhātva* or imaginativeness as a determinant of the cause of poetry (*kāvyakāraṇatāvacchedaka*) and it can be regarded as an accomplished species (*siddha jāti*).

*Pratibhātva* can be otherwise defined as a non-analysable ultimate concept (*akhaṇḍa upādhi*).

The Sanskrit rhetoricians, by and large, have described *pratibhā* as an impression borne from previous births or as an intellect acquired in the present birth through the favour of gods or similar supernatural help. It is a mystic power whereby a poet visualizes both the inner and the outer beauty of worldly objects and draws a vivid picture of this beauty in apt words and expressions. Genius or *pratibhā* is super-natural, spontaneous, rare and at the root of all famous poetic creations.

**References:**


1. *kāvyam tu jāyate jātu kasyacit pratibhāvataḥ/ Kāvyalaṃkāra* 1.5.
2. *na vidyate yadyapi pūrvavāsanāguṇānubandhi pratibhānamdbhutam/- Kāvyādarśa.* 1.104.
3. *janmāntarāgatasaṃaskāraviśeṣaḥ kaścit, yasmāt vinā kāvyaṃ na niṣpadyate, niṣpannaṃ vā hāsyāyatanaṃ syāt/- Kāvyālaṃkārasūtravṛtti.* 1.3.16.
4. *manasi sadā susamādhini visphuraṇamanekadhā'bhidheyasya/ akliṣṭāni padāni ca vibhānti yasyāmasau śaktiḥ/Kāvyalaṃkāra.* 1.15.
5. *śaktiḥ pratibhānaṃ varṇanīyavastuviṣayanūtanollekhaśālitvam Dhvanyāloka Locana.* 3.5.
6. *tasya viśeṣo rasāveśavaiśadyasaundaryyaṃ kāvyanirmāṇakṣamatvam/- Dhvanyāloka Locana.* 1.16.
7. *sā śabdagrāmamarthasārthamalaṃkāratantramuktimārga-manyadapi tathāvidhamadhihṛdayaṃ pratibhāsayati sā pratibhā/- Kāvya-mīmāṃsā.* Chapter- IV, p- 43.
8. *pratibhāvataḥ punarapaśyato'pi pratyakṣa iva/ yato medhāvirudrakumāradāsādayo jātyandhāḥ kavayaḥ śrūyante/- Kāvya-mīmāṃsā.* Chapter- IV, p- 43.
9. *yat kiñcanāpi vaicitryaṃ tat sarvaṃ pratibhodbhavam/- Vakrokti-jīvita.* 1.28.
10. *prāktanādyatanasaṃaskāraparipākaprauḍhā pratibhā kācideva kaviśaktiḥ/ Vakrokti-jīvita.* 1.28. (*vṛtti*)
11. *sā hi cakṣurbhagavatastṛtīyamiti gīyate/- Vyakti-viveka.* 2.118.
12. *tasya ca kāraṇam kavigatā kevalā pratibhā/ sā ca kāvyaghaṭanānukūlaśabdārthopasthitiḥ/- Rasa-gaṅgādhara.* Chapter- I, p- 8.

## Works Cited:


- Ānandavardhana. *Dhvanyāloka* with *Locana*. Ed. Durgāprasād and K. P. Parab. Bombay (now Mumbai) : Nirnay Sagar Press, 1935, 1983 (Reprinted). (Kāvyamāla Series No. 25).
- Bharata. *Nāṭyaśastra* with commentary of Abhinavagupta. Ed. M. R. Kavi. Baroda 1934. (Gaekwad's Oriental Series).
- Bhāmaha. *Kāvyalaṃkāra.* Ed. P. V. Naganath Sastry. Delhi-7 : M.L.B.D., 1970 (Second Edition), 1991 (Re-print) (ISBN- 81-208-0863-O).
- Daṇḍin. *Kāvyadarśa* with commentary of Jīvānanda Vidyāsāgara Bhaṭṭācārya. Madras (now Chennai) : Vavilla Venkateswara Sastrulu & Sons., 1952.
- De, Sushil Kumar. *History of Sanskrit Poetics* (In Two Volumes). Calcutta (now Kolkata) : Firma K.L.M. Pvt. Ltd, 1988 (Second Revised Edition).
- Hemcandra. *Kāvyānuśāsana* (In Two Parts). Ed. R. C. Parikh. Bombay (now Mumbai) : Sri Mahavira Jaina Vidyalaya, 1938 (First Edition).
- Kane, P.V. *History of Sanskrit Poetics.* Delhi-7 : M.L.B.D., 1971.
- Kuntaka. *Vakrokti-jīvita.* Ed. S.K. De. Calcutta (now Kolkata) 1928 (Second Revised Edition). (Calcutta Oriental Series).
- Mahimabhaṭṭa. *Vyaktiviveka*. Ed. T. Ganapati Sastri. Trivandrum (now Thiruvananthapuram) 1909. (Trivandrum Sanskrit Series).
- Mammaṭa. *Kāvyaprakāśa* with Sanskrit commentary '*Bālabodhinī*' by Vamanacharya Bin Ramabhatta Jhalakikar. Ed. Ragunath Damodar Karmarkar. Poona (now Pune) : Bhandarkar Oriental Research Institute, 1933 (Fifth Edition, Reprinted from the Fourth Edition).
- Paṇḍitarāja Jagannātha. *Rasagaṅgādhara* with commentary of Nāgeśa Bhaṭṭa. Ed. Durgāprasād and K. P. Parab. Bombay (now Mumbai) : Nirnay Sagar Press, 1888. (Kāvyamāla Series No. 12).
- Rājaśekhara. *Kāvyamīmāṃsā*. Ed. K. S. Ramaswami Sastri. Baroda, 1935. (Gaekwad's Oriental Series).
- Rudraṭa. *Kāvyālaṃkāra* with Namisādhu's commentary. Delhi-7 : M.L.B.D., 1983.
- Vāmana. *Kāvyālaṃkārasūtravṛtti*. Ed. Durgāprasād and K. P. Parab. Bombay (now Mumbai) : Nirnay Sagar Press, 1926 (Third Revised Edition). (Kāvyamāla Series No. 15). ❖❖❖

# पाणिनेः अष्टाध्याय्यामुक्ताः आचार्याः

साहिदुरसेखः

**संक्षिप्तसारः**

व्याकरणं नाम अर्थविशेषमाश्रित्य स्वरप्रकृतिप्रत्ययादीन् विशेषेण संस्कारविशेषेण आ समन्ताद् वैदिकान् लौकिकांश्च शब्दान् करोतीति तथाभूतः पाणिन्यादिमहर्षिप्रणीतो ग्रन्थसमूहः। एते व्याकरणग्रन्थाः बहवः सन्ति। तेषु प्रसिद्धः ग्रन्थः भवति 'अष्टाध्यायी' इति। अस्य रचयिता पाणिनिः। पाणिनिः स्वयं तस्य ग्रन्थे केषाञ्चन वैयाकरणानाम् उल्लेखं कृतवान्। अतः वक्तुं शक्यते यत् पाणिनेः पूर्ववर्तिकाले बहवः वैयाकरणाः आसन्। यथा- इन्द्रः, वायुः, भारद्वाजः, भागुरिः, पौष्करसादिः, चारायणः, काशकृत्स्नः, वैयाघ्रपद्यः, माध्यन्दिनिः, रौढिः, शौनकः, गौतमः, व्याडिः, अपिशलिः, काश्यपः, गार्ग्यः, गालवः, चाक्रवर्मणः, शाकटायनः, शाकल्यः, सेवकः, स्फोटायनश्च। उपर्युक्तेषु वैयाकरणेषु केचन पाणिनिना स्वकीयायाम् अष्टाध्याय्याम् उल्लिखिताः केचन परित्यक्ताः। परन्तु तस्य ग्रन्थे एतेषाम् उल्लेखनं किमर्थं कृतम् इति जिज्ञासायाम् उच्यते पूजार्थम् अर्थात् सम्मानप्रदानार्थम्।

**शब्दसङ्केताः**- व्याकरणम्, पाणिनिः, वैयाकरणाः, व्याकरणग्रन्थाः च।

समुद्रवद् व्याकरणं महेश्वरे तदर्धकुम्भोद्धरण स्त...
तद्भागभागाच्च शतं पुरन्दरे कुशाग्रविन्दुत्पतितं हि पाणिनिः ॥

श्लोकमिदं पर्यालोच्य एवं वक्तुं शक्यते यत् पाणिनेः पूर्वकाले बहवः वैयाकरणाः तथा च तेषां विरचिताः व्याकरणग्रन्थाः अपि आसन्। पाणिनेः पूर्वकाले प्राय एतेषां वैयाकरणानां नामानि समुपलभ्यन्ते यथा इन्द्रः, वायुः, भारद्वाजः, भागुरिः, पौष्करसादिः, चारायणः, काशकृत्स्नः, वैयाघ्रपद्यः, माध्यन्दिनिः, रौढिः, शौनकः, गौतमः, व्याडिः, अपिशलिः, काश्यपः, गार्ग्यः, गालवः, चाक्रवर्मणः, शाकटायनः, शाकल्यः, सेवकः, स्फोटायनश्च।

अत्रापि मतभेदो विद्यते। उपर्युक्तेषु वैयाकरणेषु केचन पाणिनिना तस्य अष्टाध्यायाम् उक्ताः केचन च परित्यक्ताः। वैयाकरणः पाणिनिः तेन विरचितायाम् अष्टाध्यायां दश वैयाकरणान् उल्लिखितवान्। इतरवैयाकरणाः परित्यक्ताः तेन। यथा-

**आपिशलिः**

आचार्यः आपिशलिः सुप्रसिद्धः वैयाकरणः। अष्टाध्याय्यां पाणिनिना अयम् एकवारः अनुस्मृतः। यथा 'वा सुप्यापिशले' (६/१/९२) इति काशिकायां (७/३/८६), न्यासे (४/२/४५), महाभाष्यप्रदीपे (५/१/२१) तन्त्रप्रदीपादिग्रन्थेषु (७/६/०६) अस्य अस्तित्वं विलोक्य प्रतीयते यत् सः निश्चयेन महान् वैयाकरणः आसीत् इति। आपिशलिशब्दः तद्धितप्रत्ययान्त इति निश्चित्य काशिकाकारः तमेवं व्याकरोति। अपिशलस्य अपत्यम् आपिशलिः। पिशलः क्षुद्रः, न पिशलः अपिशलः महान्।

आपिशलिशब्दस्य पाठः क्रीड्यादिगणे विहितो वर्तते पाणिनिना 'क्रीड्यादिभ्यश्च' (४/१/८०) इति। अष्टाध्यय्यां सामान्यरूपेण यत्र पाणिनिः अन्येषाम् आचार्याणाम् नामानि उक्त्वा किञ्चन कार्यं वदति, तत्र तत् कार्यं वैकल्पिकं मन्यते। परन्तु अत्र पाणिनिना वा इति उक्त्वा आदौ एवं वैकल्पिकत्वम् उक्तमस्ति। अतः अत्र आपिशलिमुनेः ग्रहणं केवलं पूजार्थं क्रियते, न हि विकल्पविधानार्थम्।

**काश्यपः**

आचार्यकाश्यपस्य नामोल्लेखः पाणिनिना द्विवारं कृतः इति प्रतिभाति। यथा- क) तृषिमृषिकृषेः काश्यपस्य (१/२/२५ ) " इति।

ख) नोदात्तस्वरितोदय काश्यपगालवानाम्(८/४/६७) इति

वाजसनेयप्रातिशाख्ये अपि शाकटायनमुनिना सह काश्यपस्य विवरणं समुपलभ्यते। इतिहासस्य अयं निर्विवादः क्रमः यत् सर्वदा लेखको यस्य विदुषो नामोल्लेखं स्वकीयायां रचनायां करोति स नूनं ततः पूर्वकालिकः किं वा समकालिको भवति। अतः काश्यपः पाणिनेः पूर्ववर्ती। अयं हि काश्यपः वैयाकरणः कल्पप्रवक्ता च। काश्यपस्यापि ग्रहणं पाणिनिः पूजार्थं कृतवान्।

**गार्ग्यः**

अष्टाध्याय्यां पाणिनिः गार्ग्यस्य मतं त्रिषु सूत्रेषु प्रयुक्तवान्-

क) भङ्गान्गालोः (७/३/१५) ख) ओतो गार्ग्यस्य (८/६/२०)

ग) नोदात्तस्वरितयोः काश्यपगालवानाम् (८/४/६७)

एतदतिरिक्तानि गार्ग्यस्य अनेकानि मतानि प्रातिशाख्ये वाजसनेयप्रातिशाख्ये च समुपलभ्यन्ते। अस्य व्याकरणं सुविपुलम् आसीत् उपरि उक्तेषु सूत्रेषु गार्ग्यस्य उल्लेखनं पूजार्थं कृतं विद्यते।

**गालवः**

पाणिनिः चतुःसूत्रेषु गालवस्य नाम स्मृतवान्। यथा-

फ) को ह्रस्थोऽङ्यो गालवस्य (६/३/६२),

ख) तृतीयादिषु भाषितपुंस्कं पुचद्गालवस्य (७/१/७४)

ग) अङ्गालो: (७/३/१९)

घ) वोदात्तस्वरितोदयमा काश्यपगालवानाम् (८/४/६७) तर्हि एवं वक्तुं शक्यते यत् अनेन किमपि व्याकरणशास्त्रं व्यरचि इति।

**चाक्रवर्मणः**

पाणिनेः 'अष्टाध्यायी' इति ग्रन्थे चाक्रवर्मणस्य नाम वैयाकरणरूपेण विराजते। यथा-

क) डे चाक्रवर्मणस्य (६/९/१३०) ख) पश्चाक्रवर्मणस्य पञ्चपादी उणादिसूत्र)

एतस्य मतं शब्दकौस्तुभे भट्टोजिदीक्षितः प्रादर्शयत्।

**भारद्वाजः**

अष्टाध्याय्यां वैयाकरणभारद्वाजस्य उल्लेखः एकत्र दृश्यते -

ऋतो भारद्वाजस्य (७/२/६३)। तैत्तेरीयप्रातिशाख्ये तथा च मैत्रायणीयप्रातिशाख्ये अपि अस्य व्याकरणविषयकमतानि समुपलभ्यन्ते।

**शाकटायनः**

पाणिनिः तस्य 'अष्टाध्यायी' इति ग्रन्थे शाकटायनं वारत्रयं समुद्धृतवान्। यथा-

क) लङः शाकटायनस्यैव (३/४/१११)

ख) थ्योर्लघुप्रयत्नतरः शाकटायनस्य (८/३/१८ (ग) त्रिप्रभृतिषु शाकटायनस्य (८/४/५०))

वाजसनेये ऋक्प्रातिशाख्ये च शाकटायनस्य निर्देशः सुलभः। यास्कः अपि शाकटायनस्य नाम सस्मार।

**शाकल्यः**

महामुनिः पाणिनिः चतुर्षु सूत्रेषु शाकल्यस्य नाम उल्लिखितवान्। तद्यथा-

क) सम्बुद्धी (२/२/१६)

ख) को सवर्णे शाकल्यस्य ह्रस्यश्च (६/१/२७)

ग) लोपः शाकल्यस्य (८/३/१९)

घ) सर्वत्र शाकलयस्य (८/४/५१)

**शौनकः**

शौनकः स्वकीये ऋक्प्रातिशाख्ये अस्य नाम उल्लिखितवान्।

सैनक: आचार्यसेनकस्य नामोल्लेखः पाणिनिना एकत्र एव कृतः गिरेव शौनकस्य (५/४/१९)

**स्फोटायनः**

अस्य नामोल्लेखनं पाणिनिना केवलम् एकस्मिन् स्थाने कृतम् अस्ति। अवङ्स्फोटायनस्य' ६/३/२२३) पदमञ्जरीकारः हरदत्तः काशिकाया: व्याख्यायामेव व्यचक्रे स्फोटोऽयनं पारायणं यस्य सः = स्फोटायनः स्फोटप्रतिपादनपाकरणाचार्यः।

**उपसंहारः**

अन्ते एतदेव वक्तुं शक्यते यत् पाणिनेः पूर्ववर्तिकाले बहवः वैयाकरणाः आसन्। यतो हि पाणिनिः तेन विरचितेषु सूत्रेषु वैयाकरणानां उल्लेखं कृतवान्। तेषु केचन वैयाकरणाः तस्य 'अष्टाध्यायी' इति ग्रन्थे स्थानम् लभन्ते। केचन च परित्यक्ताः तेन।

तर्हि अधुना प्रश्न उदेति किमर्थम् केवलम् दशानां वैयाकरणानां उल्लेखः कृतः पाणिनिना। अस्य प्रश्नस्य समाधानाय उच्यते यत् पाणिनिना अपि स्वयं तैः वैयाकरणैः स्वीकृताः नियमाः स्वीक्रियन्ते स्म। एवञ्च तस्य ग्रन्थे उल्लिखितवन्तः। तदर्थं तान् वैयाकरणान् प्रति सम्मानप्रदानार्थं पाणिनिः तस्य विरचितेषु सूत्रेषु तेषां वैयाकरणानां उल्लेख कृतवान् अस्ति।

**सहायकग्रन्थसूची**

1) वैयाकरणसिद्धान्तकौमुदी, श्रीगोपालदत्तपाण्डेय चौखम्बा सुरभारती प्रकाशन, वाराणसी।
2) अष्टाध्यायी, श्रीगोपालदत्तपाण्डेय: चौखम्बा सुरभारती प्रकाशन, वाराणसी।
3) वैयाकरणसिद्धान्तकौमुदी, गिरिधरशर्माचतुर्वेदः।
4) अष्टाध्यायी, डेश्वरचन्द्रगुप्त, दिल्ली।
5) व्याकरणशास्त्रस्य इतिहासः, उ. ब्रह्मानन्द- त्रिपाठी, वाराणसी।
6) समग्र व्याकरणकौमुदी, पण्डित हेमचन्द्र भट्टाचार्य, प्रथमप्रकाशः, 1370।
7) पाणिनीय शब्द शास्त्र, डा. सत्यनारायण चक्रवर्ती।

❖❖❖

# अधरं मधुरम् इति कथासङ्ग्रहस्य समीक्षात्मकमध्ययनम्

सुवीरमण्डलः

'अधरं मधुरम्' इति डा.प्रमोदकुमारनायकेन लिखितानाम् अष्टादश-संस्कृत-व्यङ्ग्यकथानां सङ्ग्रहः वर्तते। प्रस्तुत-सङ्ग्रहे सङ्गृहीतासु एतासु अष्टादशव्यङ्ग्यकथासु काश्चन पूर्वं संस्कृतप्रतिभा-कथासरित्-पत्रिकयोः प्रकाशिताः सन्ति। एतासु काश्चन अधिकाधिकं चेत् षड्पुटपरिमिताः अन्याश्च चतुर्भिः पुटैः समाप्ताः इति लघुकथाः एव सन्ति। आचार्याणां राधावल्लभत्रिपाठिनाम् अभिनवकाव्यालङ्कारसूत्रे कथायाः लक्षणमित्थं वर्तते- जीवनस्यैकदेशनिरूपणपरमाख्यानं कथा। गद्यबन्ध उपन्यासो महाकाव्यमयी कथा।[310]

अभिराजराजेन्द्रमिश्रमहोदयः चित्रपर्णीतिकथासङ्ग्रहस्य आमुखे उक्तं यत्- खण्डकाव्यं लक्षयता विश्वनाथेन साहित्यदर्पणे लिखितं यत् खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि यत्। अनेन एतदुक्तं भवति यन्महाकाव्यस्यैव एकदेशस्य खण्डविशेषस्य वानुसारिणी कृतिः खण्डकाव्यं भवति। तत्साम्येनैव वक्तुमेवमुचितं प्रतिभाति यत्कथाखण्डस्य कथांशविशेषस्य वा प्रस्तोत्री रचना लघुकथा भवति। .. .. कामं लघुकथायाः कलेवरं (कदाचित्) पृष्ठमितं स्यात्, पृष्ठद्वयमितं वा। परन्तु मूललघुकथा तु एकवाक्यमितैव भवति। तेषां समवेतवृत्तवर्णनमेव कथाया विस्तारं सृजति। परन्तु लघुकथायामेकपात्रता-निर्वहणमनिवार्यमिति मन्मतम्। .. मनोभावस्य चिररूढस्याऽतर्कितं परिवर्तनं कस्यचित्सङ्कल्पस्य झटित्येव सृष्टिः, भावोन्मेषः, भावविवर्त्तः, मनोवैज्ञानिकं विश्लेषणं, चिरसंस्तुतवर्त्मनोऽकस्मादेव परिहारः, अग्राहस्य ग्रहणं, ग्राह्यस्योपेक्षावसरोचिता इत्येवं शतशतोल्कापिण्डसदृक्षाश्चमत्कारसृष्टिक्षमा भावा लघुकथां वितन्वते।[311]

कथायाः वस्तुदृष्ट्या भेदकल्पने कदाचिदानन्त्यमेव स्यात्। कथाकारः चेखवो वदति- One must write about simple things how

[310] 3.1.12-13।

[311] आमुखम्, चित्रपर्णी, राजेन्द्रमिश्रः, वैजयन्तप्रकाशनम्, इलाहावादः।

Peter Seminowitch married Marea in Rome. अतः साधारणेन नित्यजीवनवस्तुना अपि कथाकारः तीक्ष्णव्यङ्ग्यबाणेन सहृदयान् झाङ्कृत्य स्वकथ्यं समुपस्थापयति। एवंविधेषु संस्कृतव्यङ्ग्यकारेषु प्रमोदकुमारनायकस्य नाम कनिष्ठिकाधिष्ठितं प्रतीयते।

हास्य-व्यङ्ग्य-काव्यानि यथा पद्ये भवन्ति तथा गद्येऽपि भवन्ति। हास्यरसात्मकं व्यङ्ग्यमिश्रितञ्च काव्यं हास्य-व्यङ्ग्य-काव्यमुच्यते। आधुनिक-संस्कृतसाहित्ये एतादृशं साहित्यं प्रभूततया उपलभ्यते। आधुनिक-काव्यशास्त्रिभिः हास्य-व्यङ्ग्य-काव्यानां लक्षणानि स्व-स्वरीत्या कृतानि। आचार्याणां बनमालिबिश्वालानां काव्यतत्त्वसमन्वितौ तल्लक्षणं यथा-

**क्वचिद् हास्यं क्वचिद् व्यङ्ग्यं हास्यरससमन्वितम्।**
**क्वचित् संवादरूपञ्च सर्वथा विनोदाश्रितम्॥**
**एवञ्च क्षणिका हास्य-कणिकाश्च विशेषतः।**
**हास्य-व्यङ्ग्यात्मके काव्ये स्थानं भजन्ति सर्वथा॥**
**प्रमोदनायकेनाथ प्रशस्यमित्रशास्त्रिणा।**
**हास्य-व्यङ्ग्याख्य-काव्यानि प्रस्तुतानि च भूरिशः॥**[312]

वस्तुतः यत्र कथासु शुद्धहास्यं भवति सा हास्यकथा तथा यत्र व्यङ्ग्यमिश्रितं हास्यं भवति सा व्यङ्ग्यकथा उच्यते। काव्यतत्त्वसमन्वितौ यथा-

**कथागुणास्समे चात्र न भेदो वस्तुशिल्पयोः।**
**क्वचिद्दीर्घा भवेल्लघ्वी हास्यरससमन्विता॥**
**शुद्धहास्यं भवेद्यत्र सैव हास्यकथा स्मृता।**
**व्यङ्ग्यमिश्रितहास्येन व्यङ्ग्यकथा भवेत् पुनः॥**[313]

**लेखकपरिचयः**

आधुनिकं संस्कृतसाहित्यं प्रतिदिनं नवनवकविकुलैरेधमानं दिगन्तविश्रुतकीर्त्तिमत् सत् स्वविश्वतोमुखस्वरूपं विस्तारयति। तत्र तत्र सुप्रतिष्ठितेषु कविपुङ्गवेषु आचार्येषु राधावल्लभत्रिपाठि-राजेन्द्रमिश्र-दिगम्बरमहापात्र-श्रीनिवासरथ-प्रफुल्लकुमारमिश्र-केशवचन्द्रदाश- - सीतानाथाचार्य-वनमालिविश्वालप्रभृतिषु क्रान्तदर्शि-कवि-साहित्यकारेषु डा.प्रमोदकुमारनायक: अन्यतमः य खलु उत्कलप्रदेशस्य पुरीजिल्लाया:

[312] उद्धृतम्, समकालिक संस्कृत साहित्य की नवीन प्रवृत्तियाँ, पृ. 35।
[313] तत्रैव।

गोपस्थे गणेश्वरपुरग्रामे पञ्चषष्ठ्यधिकैकोनविंश-शततमखीष्टाब्दे अप्रेलमासस्य सप्तविंशतिदिनाङ्के (27/04/1965) जनिमलभत। तस्य पितुः नाम श्रीरघुनाथनायकः, मातुः नाम च अन्नपूर्णादेवी। स ग्रामे प्राथमिकशिक्षां, गोपस्थ-निगमानन्दोच्चविद्यालये उच्चमाध्यमिकशिक्षां प्राप्य संस्कृतभाषाध्ययनार्थं पुर्यां श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठे 1981तमे खीष्टाब्दे प्रविष्टवान्। ततः व्याकरणशास्त्री तथा च व्याकरणविभागे स्वर्णपदकसहितम् आचार्योपाधिं प्राप्तवान्। अध्ययनकाले विद्यापीठे तथा च राज्यस्तरीये जातीयस्तरीये विविधतर्कादिभाषणप्रतियोगितासु अंशग्रहणं कृत्वा पुरस्कारान् लब्ध्वा च स गुरुवराणामतीवश्रद्धाभाजनम् अभूत्। अनन्तरं तस्मात् विद्यापीठादपि पुराणविभागे स्वर्णपदकसहितम् आचार्योपाधिं प्राप्तवान्। तदनु भद्रकस्थिते दामोदरसंस्कृतमहाविद्यालये व्याकरणविभागे अध्यापकभावेन कार्यभारं स्वीचकार। इदानीं 2002खीष्टाब्दतः तस्मिन्नेव महाविद्यालये सः अध्यक्षपदेन संस्कृतमातरं सेवमानो वर्तते।

**लेखकस्य अन्याः कृतयः**

प्रमोदकुमारनायकमहोदयस्य विविधवस्तुविमण्डिताः हास्यरसोत्पादिकाः सरसाः सालङ्कृताः विविधकृतयो विलसन्ति। कथा-काव्य-नाटकभेदेन तासां त्रिधा विभाजनं शक्यम्।

कथासङ्ग्रहाः- उवाच कण्डुकल्याणः, स्वर्गादपि गरीयसी, कथासप्ततिः, अधरं मधुरम्।

उपन्यासः- स्वर्गपुरे।

काव्यानि - गर्त्तः, शबरी, दारिद्र्यशतकम्, रात्रिर्गमिष्यति।

नाटकम् - कोणार्कम्

अथवा निम्नरीत्या विभाजनं कर्तुं शक्नुमः।

**कथासारः**

अधरं मधुरम्। यमुद्दिश्य इदं सुप्रसिद्धं पद्यमुच्चारितमेकदा नाधुना तदेव उद्देश्यम् अवलोक्यते कुत्रापि। अवलोक्यते तु अधरं भिन्नं हृदयमपि भिन्नम्। यदर्थन्तु अधरहृदययोः मध्ये नैव दृश्यते विम्बप्रतिविम्बभावः। मधुराधरतले गोपनेन तिष्ठति अलार्कविषभाण्डम्। यस्मिन् अधरे विश्वस्य सरलप्राणाः अनुक्षणं म्रियन्ते। प्रतिक्षणं दुःखपीडाभिः पीड्यते। मृगतृष्णा इव अभिनयति मधुरम् अधरम्। प्रलुब्धो जीवनमृगो धावं धावं पतति। स्पन्दशून्यो भवति। तदेव उच्चैः श्रावयति सकलान् ग्रन्थोऽयम्।

प्रस्तुते सङ्ग्रहे स्थितासु अष्टादशकथासु तासां कथानां शीर्षकेष्वपि व्यङ्ग्यमभिलक्ष्यते। सङ्ग्रहस्य शीर्षकाणि यथा- स्वार्थत्यागी न पण्डितः, सुखं हि मिलिते तन्त्रे, श्रीगुरुः शरणं तस्याः, वृक्षमूले हरिश्शेते, भिक्षायाञ्चैव चैव च, चातुर्य्यं कीर्त्तिकारणम्, वञ्चना जयदायिनी, अविश्वस्तः सदा पतिः, पवित्रं नेतृभाषणम्, पुरस्कारे सदा मतिः, विपणौ लभते बलम्, पीडा न विद्यते दले, सुलभा ईश्वराः कलौ, इण्डियावासिनो धन्याः, सतीत्वं सारमप्राप्ते, सौन्दर्य्यं प्रतिवेशिन्याम्, न दीनो गणतन्त्रेऽस्ति तथा क्षम्यतां परमेश्वरी इति।

कथानां शीर्षकाणि अत्र व्यङ्ग्यशैल्या अनुष्टुभा एव विलसन्ति। तेन कथाकारस्यास्य व्यङ्ग्यप्रियत्वं कवित्वञ्चापि प्रमाणितं भवति। लेखकेनात्र अस्माकं शासकानां कर्मचारिणाञ्च शतं प्रतिशतमाकलनं कृतमस्ति व्यङ्ग्यविन्यासेन। सामाजिक-विसङ्गतीनां सञ्चयनं कृत्वा डा.प्रमोदकुमारनायकेन हास्यव्यङ्ग्यस्य आलम्बनेन कथाः लिख्यन्ते। डा.नायकस्य व्यंग्य-कथानां सर्वाधिकं वैशिष्ट्यं यत्- एतासु कथासु विभिन्नवर्गाणां सफलं प्रतिनिधित्वं कुर्वन्ति पात्राणि भवन्ति। अत्र क्वचित् प्रशासनिक-भ्रष्टाचारस्योपरि व्यङ्ग्यो वर्तते, कदाचित् सामयिक-राजनीतेरूपरि लेखकस्य शाणिता दृष्टिः दर्शनीया भवति। प्रशासनिकतन्त्रे शिक्षाक्षेत्रे च परिव्याप्त-भ्रष्टाचाराणां तथा सामाजिक-मानवीय-मूल्यानां ह्रासस्य उपरि अपि व्यङ्ग्यो वर्तते। भाव-भाषा-शैलीत्यादिषु परिवर्तनेन, प्राचीनमान्यतानां विरुद्धं विद्रोहः तथा शास्त्रीयसीमोल्लङ्घनं प्रति नवीनसाहित्यकाराणाम् आग्रहस्य अपि आलोचना करोति डा.नायकस्य तीक्ष्णा लेखनी। एवमस्य साहित्यप्रकारेषु वर्तमानजीवनस्य प्रभावः, उच्चावचादिभेदाः, समयस्य चङ्क्रमणानि च द्रष्टुं शक्यानि।

एतत् तु निश्चप्रचं यत् यदि कस्यापि मर्त्यस्य मानवस्य अधरात् मधुरं झरति, निश्चयेन तस्य हृदयं जगतः दुःखेन स्वीयदुःखेन वा पूरितमस्ति। मनस्येकं वचस्येकं कर्मण्येकं विधाय जनाः कथं मुखात् पुण्यपीयूषवर्षां कुर्वन्ति इति प्रमोदनायकस्य एतन्नामके कथासङ्ग्रहे दर्शनीयमस्ति अधस्तात्-

**स्वार्थत्यागी न पण्डितः-** इति कथायां कथाकारः संस्कृतपण्डितानां दुर्गुणान् गणयति। आजीवनं नीतिशास्त्राणि रटित्वा, पाठयित्वा, प्रणीय अपि एते स्वकार्येषु स्वजीवने वा तत् न पालयन्ति इति कथनं सत्यमेव।

**सुखं हि मिलिते तन्त्रे-** इत्यत्र कथाकारः विविधदलानां मिलितशासनस्य कुफलानि विवृणोति। स्वस्वार्थरक्षार्थं ते राजपुरुषाः कथं कार्यमकार्यं न विचारयन्ति इति अत्र सम्यक् दर्शनीयमस्ति। यथा- अनेन अतीव क्षुब्धो

मूषिकनेता अवोचत्, "वयमेव गर्तेषु केवलं स्थापयाम इति भवान् आक्षिपति। किमु न कश्चन राजनेता स्थापयति। यदि वयं गर्तेषु स्थापयामः तर्हि अन्येऽपि गुहासु वृक्षक्रोडेषु जलेऽपि वा धनं स्थापयन्तः आरक्षिणां नयनेषु धूलिं पातयन्ति। यद्वा अस्तु यदि भवतः इच्छा अस्मासु नास्ति, तर्हि इतः आरभ्य वयं समर्थनप्रत्याहारविषये विचारं कुर्मः। इदानीं भवतः इच्छा।"

तस्य एतादृशं क्रोधारक्तनयनं सिंहदलस्य उपरि गभीरं प्रभावं पातयति स्म। येन मूषकदलस्य वचनपरिपालनाय सिंहनेता विवशोऽभवत्। एकदा सायङ्काले विषण्णः राजा वृद्धः सिंहः चिन्तयति, "नैव कुत्रापि कार्यालये काचिद् राजाज्ञा परिपालता भवति अथवा सिंहदलस्य कस्यचिद् नेतुः आदेशः तिष्ठति। अधिकन्तु अन्येन दलीयशासनेन वनपुरं कम्पते। एतस्य प्रतिकारः करणीयः।"

हठात् तस्य कर्णयोः कश्चन शून्यवाणीं करोति स्म, "समर्थनप्रत्याहारः, समर्थनप्रत्याहारः।" [314]

**श्रीगुरुः शरणं तस्याः-** इति कथायां धर्मपीठाधीश्वराः कथम् अन्धविश्वस्तानां भक्तानां भक्तपत्नीनां च शारीरिकमुपभोगं कुर्वन्ति इति शाणितव्यङ्ग्येन प्रतिपादितम्। यथा-

एकदा अहम् अनुमतिं विना प्रथमवारं श्रीगुरुदेवस्य शयनकक्षं प्रविष्टवान्। तत्र यदेव दृष्टवान्, इह संसारे न कश्चन साधारणो मनुष्यः कदापि पश्यति इति मम दृढं वचनम्। अहो महिमा गुरूपरमेश्वरस्य! सुवर्णपल्यङ्के अनन्तशयने निरतो गुरुदेवः। दिव्यालङ्कारविभूषिता सुषमा मे धर्मपत्नी तस्य पादसेवनरता। एतदृष्ट्वा मम भ्रम उदितः, अहं कुत्र अस्मि इति। सहसा सुषमायाः पदयोः निपत्य उक्तवान्- "देवि! धन्या त्वम्। धन्यास्ते पितरः। धन्यं ते जन्म। त्वामेव पत्नीरूपेण प्राप्य मम चतुर्दशपुरुषाः अपि धन्याः। परब्रह्मणः चरणसेवया मम जीवनं नूनमेव सार्थकीकृतं त्वया। न जाने काऽसि त्वम्? कस्य ऋषेः शापात् मादृशस्य नराधमस्य पत्नीत्वं स्वीकरोषि?"

एवं किमपि प्रलपन्तं मां गुरुदेवः सामान्यकोपवचनेन उपदिष्टवान्- मूर्ख! एतस्य रूपस्य दर्शनाय तव यदि च पुण्यबलं नास्ति, तथापि मम कृपया ते जातम्। यतो हि स्वर्गदेवाः, अपि एतस्य रूपस्य दर्शनाय नित्यम् अभिलाषिणः वर्तन्ते। यदि मम कृपा अधुना त्वदुपरि नैव स्यात्, तर्हि तव

---

[314] पृ.26, अधरं मधुरम्, प्रमोदकुमारः नायकः, कथाभारती, कलिकाता-103, 2020।

प्राणाः अवश्यं गच्छेयुः। अस्माद् गच्छ। न कदापि एतद्रहस्यं कमपि प्रवाचयिष्यसि। मन्ये, इमं सुयोगम् अहं केवलं प्राप्तवान्। यतो हि तदारभ्य जनाः तदेव द्वारं जयविजयद्वारमिति वक्तुं प्रारब्धवन्तः।

...तदानीम् एकेनैव पदक्षेपेण अहम् आश्रमं समागत्य पृष्टवान्- "गुरुदेव! अहं तु दीर्घपञ्चवर्षाणि श्रीमतामाज्ञया ब्रह्मचर्य्यव्रतं पालयित्वा पत्नीसङ्गं विवर्जयामि। तर्हि मम पितृत्वलाभः कथं भवति? कथं भवति गुरुदेव?" इति यदा मुहुर्मुहुः पृच्छामि, तदानीम् अतीवशान्तस्वरेण गुरुदेवः अवदत्- "वत्स! यस्य गुरुदेवस्य कृपाकटाक्षमात्रेण सहस्रं सूर्य्याः चन्द्राः भूधराः सागराः सृज्यन्ते, अखिलब्रह्माण्डे विविधाः जीवाः जायन्ते, स गुरुदेवः किमु सामान्यस्वरूपायाः सुषमायाः गर्भदेशे सन्तानमेकं स्थापयितुम् असमर्थः। एतावत् कालपर्यन्तम् आश्रमधर्मं पालयतः अपि एष सामान्यो विश्वासस्तव नैव आगतः। गच्छ, ईश्वरकर्मणि रतः सन् जीवनं यापय। कर्त्तुम् अकर्त्तुं मम इच्छामात्रं समर्थम्।"

गुरुदेवः एवंप्रकारेण किमपि किमपि मां सान्त्वयति। मम कृते तु चतुर्दिशो भ्रमन्ति। अधोभूमिः पातालगामिनी भवति। पुरतो मे कश्चन नवजातकः स्वकीयं परिचयं ज्ञातुम् अधीरो भवति।[315]

**वृक्षमूले हरिश्शेते-** इति कथायां कथम् ईश्वरः कलौ युगे स्वर्गात् विताडितः, भक्तैः निन्दितः, मन्दिरात् निष्कासितः पानभोजनं विना वृक्षमूले निक्षिप्यते इति सव्यङ्ग्यं निरूपितम्। सर्वव्यापकस्य तस्य अधुना भक्तिविश्वासहीने समाजे स्थानं नास्ति, तस्य पत्नीपुत्रादयः अपि तस्य सेवामकृत्वा गृहात् विताडयन्ति, तद्विरुद्धम् आन्दोलनमपि प्रवर्तयन्ति इति सम्यक् निरूपितं कथाकारः।

**भिक्षायाञ्चैव चैव च-** इत्यत्र भिक्षावृत्तिधारिणः अपि अस्मदपेक्षया स्वाभिमानेन जीवन्ति, तेषामपि सद्भावादिकं वर्तते इति निरूपितम्। अत्र कश्चन भिक्षुकः स्वजामात्रे अपि तत् तत् भिक्षास्थलं यौतुकरूपेण प्रयच्छति। किं बहुना भिक्षादर्शनमेव निरूपितं कथाकारेण। यथा- "यतो हि भिक्षादर्शनस्य प्रथमं सूत्रं भवति- "भिक्षामूलं जगत्कृत्स्नम्" इति। अस्य गूढार्थो भवति- अखिलः संसारो भिक्षया एव प्रचलति। पामराचार्यस्य सूत्रमिदं व्याख्यायन् टीकाकारो दुर्मतिभट्टः उदाहरति यद्- भगवती पृथ्वी स्वस्यां जीवकुलं विवर्द्धयितुं तेषाञ्च परिपोषणार्थम् ईश्वराय साहाय्यभिक्षामकरोत्। बलिराजपुरे वामनः

---

[315] तत्रैव, पृ.29-30।

पादत्रयात्मिकां भूमिम् अभिक्षत। लङ्केशो भिक्षामाध्यमेन एव परमां लक्ष्मीमलभत। द्वारकाधीशः श्रीकृष्णः मानगोविन्दाय ग्रामपञ्चकमेव भिक्षात्वेन अयाचत। दाम्पत्यकलहात् लक्ष्मीहीनः श्रीजगन्नाथः अग्रजेन बलभद्रेण सह द्वारं द्वारं भिक्षायाचनम् अकरोत्। इदानीन्तने समयेऽपि गणतन्त्रे मतदानभिक्षा एव देशचालनक्षमतां प्रददाति। भिक्षया एव धार्मिकोत्सवः प्रचलति। मन्दिरनिर्माणं भवति। साधवः ऐश्वर्य्यभोगं कुर्वन्ति इति।"[316]

**चातुर्य्यं कीर्त्तिकारणम्-** इति कथायां कथाकारः स्वर्गपुरे कथं पुरस्कारप्रत्यावर्तनं कृत्वा देवाः शीर्षस्थानं प्राप्तुमिच्छन्ति इति निपुणं निरूपयति। अनेन छलेन कथाकारेण विविधराजनीतिकदलानां प्रभावेन प्रभाविताः साहित्यिकाः अपि कथं स्वगौरवभूतान् पुरस्कारान् प्रत्यावर्त्य पुरस्कारस्य गुरुगौरवं नाशयन्ति इति वर्णितम्।

**वञ्चना जयदायिनी-** इति कथायां निर्वाचनसमये प्रतिश्रुतिपरायणाः राजनेतारः छलेन बलेन कौशलेन वा कथं भोटप्राप्त्यर्थं प्रयत्नपरायणाः भवन्ति इति कथयति कथाकारः।

**अविश्वस्तः सदाः पतिः-** इति कथायां पतिः कथमपि विश्वस्तो न स्यादिति निरूपयति कथाकारः।

**पवित्रं नेतृभाषणम्-** इत्यत्र कथाकारः यक्षप्रश्नानां शैलीमाधृत्य समसामयिकसामाजिकसमस्याधारितानां गृध्रप्रश्नानां समुचितानि उत्तराणि नेतृमुखाद् वाचयति। अन्ते गृध्रवरेण मित्राणि अपि स्वानुचरान् कारयति। यथा-

परिशेषे राजनीतिज्ञः कश्चन बन्धुः यदा आगत्य तस्याः पुष्करिण्याः निकटे उपस्थितः सन् जलग्रहणाय गच्छति, तदानीं स गृध्रः पूर्ववत् तमेव पृष्टवान्। तस्य वचनं निःशम्य प्रश्नश्रवणाय यदा स राजनेता आग्रहप्रकाशं करोति, तदानीं विमुग्धः असौ गृध्रः पृष्टवान्-

**नेता कीदृग्वचो ब्रूते आस्तिकः कः सुखी सदा।**
**कस्य तृष्णा न शान्ता भो मनुज वद सत्वरम्॥**

प्रश्नमिमं श्रुत्वा असौ राजनेता अवदत्- गृध्रराज, इह पृथिव्यां नेतृपदेन राजनेतुरेव ग्रहणं भवति। गणतन्त्रोपायेन एष देशं शास्ति। सुतरां जनगणस्य मनसि येन केनापि उपायेन सन्तोषभावः आनेतव्यः। एतदर्थं तस्य वचनं सर्वदा

---
[316] तत्रैव, पृ.36-37।

प्रतिश्रुतिपूर्ण्णं भवति। किमपि कार्य्यं नैव करणीयम् इति स नैव कदापि वदति। तथैव आस्तिक इत्युक्ते शास्त्रं वदति- अस्ति परधनाहरणे मतिरिति आस्तिकः। अर्थत् यः कालीपूजा-दुर्गापूजाद्यर्थं समाजात् स्वेच्छया धनं स्वीकृत्य निजकोषं पूरयति प्रथमतः, तदनन्तरम् अवशिष्टेन धनेन तोरणादि निर्माति, युवकान् मद्यपानेन तोषयति यः, स एव आस्तिको भवति। सुखी इत्युक्ते परधनं यो गुडवद् गृह्णाति। विना श्रमेण यः तेनैव धनेन विलासपूर्ण्णं जीवनं यापयति स एव सुखी। यतो हि कष्टार्जितं धनं नैव कदापि सुखाय उद्दिष्टम्। पुनश्च तृष्णाविषये भवता पृष्टम्। वस्तुतः तृष्णा सर्वेषु उपलभ्यते। किन्तु कदाचित् कस्य तृष्णा शाम्यति। अथ च अत्याधुनिकस्य सन्न्यासिजनस्य तृष्णा नितरां बलीयसी भवति। धनधान्यादिषु नितरां रममाणः असौ अहरहः नवीनेन सुखेन वशः सन् तृष्णातुरजीवनं यापयति। एतस्मात् कारणात् तस्यैव तृष्णा कदापि न शाम्यति। एतदीयम् उत्तरं गृध्रस्य कृते अतीव सन्तोषप्रदम् आसीत्।

एवंविधेन उत्तरेण सन्तुष्टः सन् गृध्रः अपृच्छत्-

**का विद्या परमा प्रोक्ता जन्मनः चरमा गतिः।**
**साधुता निहिता कुत्र पवित्रा कस्य सम्पत्तिः॥**

प्रश्नमिमं श्रुत्वा अयम् अवदत्- हे तपस्विन्! अस्मिन् संसारे विद्याः बहुविधाः भवन्ति। विद्यार्जनार्थं सर्वे यतमानाः आकालात्। परन्तु सर्वाः विद्याः श्रेष्ठाः न सन्ति। अल्पायासेन विना आयासेन वा या विद्या अपरिकल्पितं धनं यशश्च नराय प्रददाति, मम मतेन सा विद्या परमा विद्या भवति। तदनन्तरं जीवनस्य चरमगतिविषये भवता पृष्टमस्ति। धनमेव जीवनस्य परमं लक्ष्यम्। सुतरां धनसङ्ग्रहणं जन्मनः चरमा गतिर्भवति। यावत्कालं मनुष्यः संसारे जीवति, तावत्कालं केवलं धनसङ्ग्रहणे स्वकीयां मतिं समर्पयेत्। यतो हि मृते तस्मिन् एतत्कार्य्यं नैव कर्त्तुं शक्यते। अत एव सर्वदा सर्वस्मिन् स्थाने येन केनापि उपायेन मनुष्यो धनस्य सङ्ग्रहणं कुर्य्यात्। एतद्धि जन्मनः परमं लक्ष्यम्। अनेन एव गतिः सार्थकीभूता भवति। अधुना मया धनस्य महिमप्रसङ्गः उक्तः। अत एव यस्य सविधे प्रचुरं धनं विद्यते, तस्मिन् साधुता तिष्ठति। सः साधुपुरुषरूपेण जगति परिगणितो भवति। यत्र कुत्रापि साधुताप्रसङ्गे तमेव उदाहरन्ति जनाः। एतस्मात् उच्यते यस्य धनमस्ति, तस्य साधुता अस्ति। दरिद्रस्तु आसाधुः भवति जन्मनि जन्मनि असाधुता तस्मिन् तिष्ठति। एवञ्चापि सम्पत्तिलाभस्य मूलकारणं भवति राजनेता। पृथिव्यां सर्वासु वृत्तिषु इयं वृत्तिः सर्वश्रेष्ठा वृत्तिः भवति। एतदर्थं राजनेतुः सकला सम्पत्तिः पवित्रा सम्पत्तिः

इति। पवित्रता एतस्यां तिष्ठन्ती पुनः पुनः स्वयं पवित्रा भवति। ये च श्रमेण सम्पत्तिम् अर्ज्जयन्ति, तस्यां सम्पत्तौ तदीयस्वेदविन्दुः पतित्वा तामेव सम्पत्तिम् अपवित्रीकरोति। अपवित्रा सम्पत्तिः नैव कदापि मोक्षदानाय समुद्दिष्टा। तस्मात् राजनेतुः सम्पत्तिः पवित्रतमा सम्पत्तिः इति मे मतिः। ....

एतस्य एवंविधोत्तरदानेन सन्तुष्टो गृध्रः आशीर्वचोभिः तमेव अभिनन्दयन् उक्तवान्- वत्स! तव मतिः अतीव प्रखरा अस्ति। अनेकजन्मार्जिततपोबलेन एतादृश्याः बुद्धेः अधिकारी कश्चन भवितुम् अर्हति। मम जीवनावधौ भवादृशो नान्यः पुरुषः मया दृष्टः। अतएव वरयाचनां कुरु। गृध्रस्य श्रीमुखवचनं निःशम्य अयमवदत्-

स्वामिन्! यदि मयि प्रसन्नस्तर्हि लब्धप्राणाः एते मे बान्धवाः नितरां मम अनुगताः भवन्तु। एतेषां श्रमेण मम उत्तरपुरुषाः अपि सुखेन जीवन्तु। मम राजत्वं सततं प्रचलतु।

इमां वरप्रार्थनां श्रुत्वा गृध्रः तथास्तु इति कथयित्वा अन्तर्हितः। ते च निद्रारहिताः सन्तः आज्ञापालनार्थं प्रसारितकराः अभवन्।[317]

**पुरस्कारे सदा मतिः-** इति कथायां जनाः कथं किमपि अकृत्वा अपि पुरस्कारं लब्धुमिच्छन्ति, कृत्वा अपि किमपि न प्राप्नुवन्ति, राजनीतिं विधाय किमपि प्राप्य अपि कथं राजनीतिनाम्ना तत्सर्वं प्रत्यर्पयन्ति इति सम्यक् कटाक्षितं कथाकारेण।

**विपणौ लभते बलम्-** बुद्धिमान् जनः कस्यापि द्रव्यस्य विपणीं समुद्घाट्य राजनीतिमाश्रित्य मध्ये स्थित्वा रात्रावेव धनिको भवति इति वर्णयति अस्यां कथायाम्। पठने नितरां दुर्बलः लम्बोदरः कथं राजधान्यां राजपुरुषाणां परस्परम् आक्रोशस्य सदुपयोगं विधाय धनं लभते इति अत्र वर्णितम्। यथा-

मम मुखात् एतस्य श्रवणेन असौ उक्तवान्- नहि, ते विना पारिश्रमिकेण आगच्छन्ति नहि। प्रथमतः किमपि दलं कति सङ्ख्यकान् पुरुषान्, नारीः, युवकान्, युवतीः, वृद्धान्, वृद्धाः, कृषकान्, दरिद्रान् वा इच्छति, सः अस्मान् सूचयति। तदनन्तरं कार्य्यं दलञ्च अवलोक्य वयं धनम् इच्छामः। एकसप्ताहात् पूर्वं तदेव प्रददाति दलम्। ततः निर्दिष्टसङ्ख्यकान् जनान् नीत्वा वयं विक्षोभादिकं दलस्य नाम्ना एव कुर्मः। परिसमाप्ते कार्य्यक्रमे ते सर्वे द्विशतरूप्यकाणि अस्मत् स्वीकुर्वन्ति। अवशिष्टं तु अस्मदीयमेव।

[317] तत्रैव, पृ.51-56।

त्वमेव द्विशतं ददाति, तर्हि दलपक्षतः कति स्वीकरोषि? इति यदाऽहं पृष्टवान्, तदानीं स कथितवान् - नहि, कार्य्यं दृष्ट्वैव। अर्थात् विक्षोभस्य कृते अथवा अनशनस्य कृते प्रतिमुण्डं, दलं पञ्चशतरूप्यकाणि ददाति। नियमोलङ्घनस्य कृते सप्तशतरूप्यकाणि। यदि नार्य्यः कमपि प्रतिवादम् उपस्थापयन्ति केवलं तर्हि प्रतिमुण्डं तु सहस्रमेकम्। आत्माहुतिप्रदर्शनार्थं तु दशसहस्रम्। यतो हि अत्र सावधानता अवलम्बनीया। आरक्षिबलस्य साहाय्यम् आवश्यकम्। नोचेत् आत्माहुतेः उद्यमस्य प्रागेव यदि स आरक्षिबलेन वन्दी नैव स्यात्, तर्हि जीवनं गच्छेत्। तदर्थं तस्य सर्वनिम्नं मूल्यं भवति दशसहस्रम्। वयं किन्तु तस्मै सहस्रद्वयं दद्मः। यदि काचित् नारी शासकदलसदस्यस्य नाम्ना असदाचरणप्रसङ्गम् उपस्थापयितुं भवति, तर्हि विरोधिदलम् अस्मभ्यं विंशतिसहस्रं ददाति। तस्यै वयं पञ्चसहस्रं दद्मः।[318]

**पीडा न विद्यते दले-** इति कथायां कथं निर्वाचने समागते राजनेतारः मानसम्मानमात्मसम्मानं वा अविगणय्य स्वस्वार्थसिद्ध्यर्थं पुरातनं दलं परिवर्त्य नूतनदलस्य अनुगतानां प्रतिवादस्य सम्मुखीनाः भवन्ति इति कथाकारः राजनेतुः कुक्कुराणामालापेन तेषामाक्रमणप्रत्याक्रमणेन च निरूपयति।

**सुलभा ईश्वराः कलौ-** कथायां कलौ युगे कथं शतसहस्रसङ्ख्यकाः ईश्वराः अवतीर्णाः इति वर्णितमस्ति। ईश्वरस्य नाम्ना भक्तसङ्ग्रहे, भक्तेभ्यो दक्षिणासङ्ग्रहे कथं ते निर्लज्जाः युयुधानाः सन्ति इति सम्यक् प्रतिपादितम्।

**इण्डियावासिनो धन्याः-** इत्यत्र भारतीयाः कथं पाश्चात्यप्रेम्णा क्रमशः स्वीयां रीतिनीतिपरम्परां त्यक्तुं पश्चात्पदाः न भवन्ति इति, यत्र तत्र आङ्ग्लीकरणेन आत्मनं धन्यं मन्वन्ते इति निरूपितमस्ति।

**सतीत्वं सारमप्राप्ते-** इति कथायां ग्राम्यसभया उदरपूरणाय इतस्ततः कार्यं कुर्वत्याः सुन्दर्याः विधवायाः कदर्थीकरणम्, प्रत्येकं नारीदेहलोभेन कथानायिकायाः सान्त्वनं नितरां मार्मिकं वर्तते। सर्वे तावत् चीत्कुर्वन्ति यावत् स्वीयो लाभो न भवति इति कथाकारस्य वचनम्।

**सौन्दर्य्यं प्रतिवेशिन्याम् –** स्वग्रामकन्यां निन्दन्तः स्वपत्नीं दूषयन्तः जनाः परस्त्रीसौन्दर्येण विमोहिताः कथं गर्ते निपतन्ति इति सरसं निरूपयति कथाकारः। वैयाकरणः अप्येष कथाकारः पण्डितः परमरसिकश्च प्रतीयते।

[318] तत्रैव, पृ..64।

"पत्नीं मनोरमां देहि" इति भगवतीं सम्प्रार्थ्य मनोरमां पत्नीं प्राप्य सन्तुष्टा न भवन्ति एतादृशाः पण्डिताः। अन्ततः सौन्दर्य्यं प्रतिवेशिन्यामेव पश्यन्ति। तत्कथाशीर्षकं दृष्ट्वा जिज्ञासा भवति- कास्ति सा डा.नायकस्य कथानायिका प्रतिवेशिनी। तस्याः वर्णनं यथाग्रन्थम्-मम भाटकगृहस्य अल्पदूरे मित्रवरः अमृतयोषी तिष्ठति। तस्य पत्नी इव पत्नी इह संसारे कस्यचिद्भवेत् इत्यहं वक्तुं नैव पारयामि। एतादृशी कर्मकुशला सुश्रीः मधुरभाषिणी नारी अनन्या एव। मम भाग्यन्तु मन्दम्। सौभाग्यात् अमृतस्य गृहोद्याने प्रस्फुटन्ति बहूनि मनोहराणि पुष्पाणि। एतादृशैः पुष्पैः यदि देवपूजनं क्रियते, तर्हि सुन्दरीसंस्पर्शात् आगतानां तेषां पुष्पाणां धारणेन देवः अवश्यं प्रसन्नः स्यात्- इति शास्त्रीयं वचनम्।...।[319]

**न दीनो गणतन्त्रेऽस्ति-** इति कथायां दीनदरिद्राः कथं सर्वदा प्रचारमाध्यमेन प्रदर्श्यन्ते, तेन राजराजेश्वराणां च सर्वदा सिंहासनं सुरक्षितं तिष्ठति इति श्रीकृष्ण-सुदामा-कथा-संवादमाध्यमेन सुष्ठु प्रतिपादयति कथाकारः। निर्वाचनरणाङ्गने द्वावपि अवतीर्णौ, परन्तु जयस्तु राजाधिराजस्य एव भवति न तु दीनस्य, अधिकन्तु मैत्री एव नष्टा इति कथायाः सारः। सत्यमुक्तं तेन- "विषण्णवचनस्य सुदाम्नः उपरि धर्मपत्नी भर्त्सनाम् अभिवर्षति श्रीकृष्णेन सह बन्धुतानाशकारणात्।"[320]

**क्षम्यतां परमेश्वरी-** इति कथायां भक्ताधीना माता कथं पूजाव्याजेन सकलकृत्याकृत्यं विधाय भक्तम्मन्यस्य क्षमां विधाय "कुपुत्रो जायेत क्वचिदपि कुमाता न भवति" इति लोकोक्तिं प्रमाणीकरोति। सत्यं वदति जया- "देवि! भक्तः भवत्याः अतीव परिचितः। विगते जन्मनि यः एव महिषासुररूपेण भवत्याः स्वर्गीयं राज्यं विनाशयति स्म, स एव अधुना भक्तरूपेण भक्तिराज्यं प्रदूषयति।"[321]

एवमत्र व्यङ्ग्यनायकेन प्रमोददायकेन प्रमोदनायकेन प्रणीतानां कथानाम् अष्टादशी कथावाचकानां मनांसि चिरं रञ्जयिष्यति। ग्रन्थस्य पुरोवाचि प्रमोदकुमारनायकस्य लेखनीं प्रशंस्य सत्यमुक्तमाचार्येण श्रीविश्वालेन-

---

[319]तत्रैव, पृ.90।
[320] तत्रैव, पृ.101।
[321] तत्रैव, पृ.107।

**हास्य-व्यङ्ग्यकथा-क्षेत्रे नायको नायकस्स्मृतः।**
**लिखन्ति ये बलादन्ये ते सर्वे प्रतिनायकाः॥**
**मोदयति कथाभिर्यः प्रकर्षेण च पाठकान्।**
**स च सार्थकनामाऽस्ति प्रमोदो नात्र संशयः॥**
**महदधरे माधुर्यमोष्ठाधर-प्रसङ्गतः।**
**माधुर्यमधरस्यैव तथ्यं लोके प्रसिध्यति॥**
**मधुरं सर्वमेवात्र मधुराधिपतेर्यथा।**
**अधरं मधुरञ्चात्र मधुरमस्ति सर्वथा॥**
**षोडशानां सहस्रञ्च राज्ञ्यः कृष्णस्य वल्लभाः।**
**कथाष्टादशसङ्ख्याकास्सन्तु पाठक-वल्लभाः॥**[322]

**कथाशैली**

प्रमोदनायकस्य कथाशैली अत्यन्तं सरला तरला हृदयावर्जिका का च वर्तते। भाववैभवेन स सहृदयानां हृदयराज्यमधिकरोति। स्वयं पण्डितः सन्नपि पण्डितानां गुणदोषविवेचने पश्चात्पदः न भवति। प्रथमतः स्वार्थत्यागी न पण्डितः इति कथायां मरणोत्तरं यमपुरे पापपुण्यविचाररतं धर्मराजमपि ते स्ववाग्जालेन आवृणन्ति।

साक्षात् समये सभा प्रारब्धा। उपविष्टे धर्मराजे सिंहासनस्योपरि दूतो यं तस्य पुरतः उपस्थापयामास स एको देवपुरोहितः। जीवनावधौ अनेकपूजोत्सवानाम् आचार्योऽयं किमर्थं लोकम् इमम् आगतः अस्ति इति प्रश्नं श्रुत्वा पञ्जिकाकारः चित्रगुप्तः अवदत्, “धर्मराज! अयं देवपूजकत्वेन मर्त्यपुरे बहूनां पूजानुष्ठानानां प्रमुख आचार्य आसीत्। अयमेव तत्र एतस्य परिचयः। श्रीमताम् अवगत्यर्थम् एतदेव सूचयामि यद्, अधुना मर्त्यपुरे अवतारवादः शीर्षस्थानम् अलङ्करोति। बहवः साधारणमानवा आत्मानं परमात्मनः अवतारम् इति वदन्तः भक्तवंशवर्धने यतमानाः भवन्ति। अयं शास्त्री एकस्य तथाकथितस्य परमेश्वरस्य प्रमुखे मन्दिरे नियुक्त आसीत्। सर्वेषु कार्यक्रमेषु अयं पुरुषसूक्तपाठेन तस्य पदयोः तुलसीदलानि संस्थापयति। तमपि पञ्चामृतेन स्नापयति। एवमपि तन्नाम्ना अग्नौ आहुतिं समर्पयति। सुतराम् अविधिपूर्वकं पूजयन् अयं महत् पातकम् अर्जयति। एतस्य विचारः करणीयः।” ...

---

[322] पुरोवाक्, तत्रैव, पृ.10।

ततः स पुरोहितः अवदत्, "धर्मदेव! कदाचित् चक्षुर्हीन एको वृद्धो नदीसिकतासु पतितां सूचीम् एकां प्राप्नुयात्, परन्तु इदानीं मर्त्यपुरे प्रकृतम् ईश्वरं नैव जानीयात्। यतो हि न किमपि स्थानं विद्यते यत्र एक स्वघोषितः अवतारपुरुषो नैव यथा निवसति, तथैवाऽपि नैकं गृहं कुत्रापि विद्यते यत्र एको भक्तो न निवसेत्। मध्ये मध्ये एतेषु ईश्वरेषु यथा महान् कलहो जायते भक्तसङ्ख्याविवृद्धौ तथैवाऽपि कस्य ईश्वरः प्रकृत ईश्वर इति विषयम् आधारीकृत्य भक्तजनेषु अपि परिदृश्यते महान् विवादः। वयं खलु पूजाव्यवसायिनः। विद्यालये पठनकाले येषां मन्त्राणाम् अध्ययनं कृतं, तेषाम् उपयोगेन अर्थोपार्जनम् अस्मदीयं कर्म। यतो हि अर्थं विना तत्र न किमपि कार्यं साधयितुं शक्यते। यो यथा अधिकम् अर्थं प्रददाति, तत्रैव उपस्थितिरस्माकं काम्या भवति। तदानीं यो यस्य कस्यापि अधिकारिणः अपेक्षया अधिकार्थोपार्जनाय क्षमा भवामः। एतदर्थं निवेद्यते भवान्, मामेव विष्णुलोकं प्रेरयतु। यत्र प्रकृतं विष्णोः पदयोः तुलसीदलं समर्प्य अहं जीवनं यापयिष्यामि। दक्षिणात्वेन तत्र यथा आयो भवतु नाम, तस्मिन् विषये नैव चिन्तयिष्यामि।" [323]

तथैव पुरस्कारे सदा मतिः इति कथायां पुरस्कारार्जनस्य तत् प्रत्यर्पणस्य व्याख्यां सुमधुरशैल्या विदधाति। यथा- मम पुत्रः मां पृष्टवान्- पितः! बहुवर्षेभ्यः प्राक् कवयः, क्रीडाविदः, चित्रतारका अन्ये चापि यानेव पुरस्कारान् प्राप्तवन्तः इदानीं ते किमर्थं सर्वकाराय प्रत्यर्पयन्ति? वस्तुतः अहं कस्मिंश्चिद् विषये चिन्तातुर आसम्। तथापि पुत्रप्रश्नस्य उत्तरदानाय अकथयम्- अरे, कस्यचित् पुरातनस्य पदार्थस्य प्रमाणपत्रस्य वा पुनर्नवीकरणाय यथा वयं प्रत्यर्पयामः, तथैव एते अधुना तथा कुर्वन्ति। समाप्ते पुनर्नवीकरणे सर्वकारमहोदयः पुनरपि प्रदास्यति एतेभ्यः। ......... तर्हि प्रथमतः पुरस्कारप्राप्तिमार्गः अन्वेषणीयः- इति चिन्तयन् मित्रस्य वक्राधरस्य सविधं गतवान्। ग्रामस्य अन्तिमभागे एतस्य ताम्बूलविक्रयकेन्द्रम्। ग्रामविद्यां समाप्य अत्र विक्रीणीते। अथच अस्य सीमाहीनं साधारणज्ञानम्। बहुविचारेषु एतस्य प्रवेशः।

मम प्रश्नं श्रुत्वा मन्दं विहसन् असौ अवदत्- अरे, पुरस्कारप्राप्तिमार्गो नैव सुकरः। विशेषतः अस्मादृशा ग्रामजनाः तस्य दर्शनं कर्त्तुं नैव समर्थाः।

[323] तत्रैव, पृ.17-18।

एते ये पुरस्कारं लभन्ते, ते खलु दिल्ली-मुम्बाई-कोलकातादिस्थानवासिनः सन्ति। यदि तव मनसि एतदर्थम् आग्रहो वर्द्धते, तर्हि सर्वादौ तेषां समीपं गच्छ। ते एव तव कृते मार्गदर्शनं करिष्यन्ति। .........

इयं कलिकातानगरी। स्वस्याः वस्त्राञ्चलं बहूनां दूरागतानामुपरि आच्छादयति। अतः अहमत्र नूनमेव कृतकार्य्यः स्याम्- इति चिन्तनेन अग्रेसरो भवामि, यत्र निवसति पल्लीग्रामे कविः प्रकाशको वितरकः सम्पादकः पारायणदाशः। यदि च अनेन सह न कश्चन प्रत्यक्षसम्बन्धो विद्यते मम, तथापि अस्येच्छया अहम् अवश्यं पुरस्कृतो भविष्यामि। परन्तु एष सर्वदा देशम् अटति। कदाचित् पुरस्कारान् वण्टयति सङ्गृह्णाति च। अतः एतस्य सहृदया धर्मपत्नी यदि अनुमोदयिष्यति, तर्हि दाशः अवश्यं साहाय्यं करिष्यति इति कश्चन उक्तवान् ग्रामे मदीये। तदर्थम् अहम् एतस्य द्वारदेशे दण्डायमानः सन् यदा कपाटे कराघातं करोमि, तदा काचित् कन्या आगत्य द्वारोन्मोचनं कृतवती। तामेव अवलोक्य अहं मधुरया गिरा पृष्टवान्- जाते! गृहे तव मातरः सन्ति?

अहो दुर्दशा! सा कन्या यदा किमपि वक्तुम् इच्छति, तदानीं कश्चन लगुडहस्तः पुरुषो मम पुरतः धावन् आगतवान्। शिरसि मे तदेव लगुडं संस्थाप्य अवदत्- निर्लज! किं वदति, अहं बहुपत्नीग्रहणं करोमि। त्वादृशा दुर्ज्जना एव पुरुषजातेः पतनस्य कारणरूपा भवन्ति। सर्वदा निजपत्नीं विस्मृत्य अन्याश्चिन्तयन्ति। अरे, अहं तु जीवनावधौ कस्या मुखमपि नैव पश्यामि। मम कन्ययोः अधिका माता कथं भविष्यति? एवं किमपि कथयन्नसौ तथैव शिरसि लगुडं स्थापयति। अहं तु केवलं भयेन कम्पमानो भवामि। यदा स्वकीयं प्रकृतम् अभिलाषं प्रवक्तुम् इच्छामि- स कविः पारायणो गलहस्तेन तस्माद् द्वारदेशान् मां निःसारयति स्म।[324]

तथैव सुलभा ईश्वराः कलौ इति कथायां तथाकथितानां मर्त्येश्वराणां विवादं सरसशैल्या प्रतिपादयति कथाकारः-

एतस्य सम्भाषाणस्यापि महान् प्रतिरोधः जातः। केचन परमात्मनः महाविश्वरूपस्य सविधाद् दूरश्रवणयन्त्रम् अपसारितवन्तः। अन्येऽपि केचन स्वकीयासनस्योपरि दण्डयमानाः सन्तः उच्चैः गर्ज्जन्तः अस्य वक्तव्यस्य प्रतिवादम् अकुर्वन्। परिशेषे एष स्थिरीकृतो जातो यत्- एतेषु परमेश्वरेषु ये

[324] तत्रैव, पृ. 57-59।

शूद्राः परमेश्वराः सन्ति, तेषां मुखेभ्यः ब्राह्माणाः, वैश्यपरमात्मनां बाहुभ्यः क्षत्रियाः, क्षत्रियपरमात्मनाम् ऊरुभ्यः वैश्याः, ब्राह्मणानां परमेश्वराणां पादेभ्यः एव शूद्राः वर्णाः सृष्टाः सन्ति।

अस्मिन् समये उत्तरदानकाले मन्दं विहस्य चार्वाकः उक्तवान्- नहि, भारतीयजनगणनापुस्तिकासु यथा एतेषां चतुर्णां वर्णानां परिचयः सम्यक्तया लिपिबद्धः भवति, न तथा अन्येषां प्राणिनाम्। सुतराम् अहम् अत्र वक्तुं पारयामि यत्- एते सर्वे परमात्मनः मिलित्वा स्वेच्छया यत्र कुत्रापि यदा कदा वा सर्वेषां मनुष्येतरप्राणिनां सृष्टौ निमग्नाः भवन्ति। एते सर्वे एव एतेषां मूलजनकाः भवन्ति। एतन्निशम्य सर्वे करतालिकाभिः एतस्य उत्तरस्य समर्थनं कृतवन्तः।

तदनन्तरं कश्चन यदा आगत्य वक्तुं किमपि इहते, तदानीं बलपूर्वकं तमेव अन्यः कश्चन तस्माद् बहिष्कृत्य अवदत्- भवन्तः वृद्धाः सर्वे केवलं कथयिष्यन्ति। कथं युवकाः केवलं श्रोतारः भूत्वा अस्माद् गमिष्यामः। अधुना अहं वदामि, समयः चेत् भवान् वदिष्यति- इत्युक्त्वा असौ परमात्मा सर्वान् कथितवान्-

अहं प्रलयात्मा। इच्छामात्रेण यस्य कस्यापि सृष्टस्य विनाशः मया यथा क्रियते, तथैव प्राकृतिको विपर्य्ययः अपि संसाध्यते। इतः पूर्वं विभिन्नेषु अवतारेषु मया हिरणाक्षः, रावणः, शाल्वः, कंसः, पूतना, अघः, शकटः, महिषः इत्यादयः राक्षसाः हताः। धर्मसंस्थापनमेव मम अवतारस्य अन्तारहस्यम्। अपशक्तेः विनाशार्थम् अहम् अवश्यं धरावतरणं करोमि- इति मदीयः सङ्कल्पः।

परमेश्वरस्य प्रलयात्मनः स्वरूपं कथनशैलीञ्च अवलोक्य यद्यपि सर्वे उपस्थिताः परमेश्वराः निरुत्तराः जाताः, तथापि कश्चन सांवादिकः अतीवधीरमनसा अपृच्छत्- भगवन्, अधर्मस्य ग्लानिदूरीकरणं भवतः लक्ष्यमस्ति। इतः पूर्वं भवतः अवतारग्रहणस्य विषये मया पुराणादिषु बहु किमपि पठितमस्ति। परन्तु एतदेव बोद्धुं न पारयामि, स्थितेऽपि भवति धरायां किमपि सन्त्रासवादिकार्य्यम् अनुदिनं वर्द्धते। अपराधिभिः एभिः निरपराधाः प्राणिनः अनुक्षणं म्रियन्ते। किमर्थम् एतत् सर्वं दृष्ट्वापि नीरवाः भवन्ति भवन्तः। किमर्थं स्वकीयेन दिव्यास्त्रेण एतान् नैव नाशयन्ति। येन प्रत्यक्षोपस्थितिप्रमाणं यथा भवतः स्यात्, तथैवाऽपि समग्रधरणी अपराधशून्या अवश्यं भवेत्।

एतादृशं सांवादिकवचनं निःशम्य असौ प्रलयात्मा परमेश्वरः निकटस्थस्य आसनस्योपरि संस्थापितात् चषकात् जलं पीत्वा अवोचत्- वत्स, त्वया यदेव उक्तं तदेव अवश्यं सत्यम् इति प्रतिभाति। किन्तु एतत् नैव सम्पूर्णं सत्यम्। यतो हि भवन्तः प्राणिनः भवन्ति। प्राणिनः कस्यचित् विषयस्य वर्तमानं स्वरूपं केवलं जानन्ति। परमात्मा तु अतीतम् अनागतञ्च ज्ञातुं पारयति। तथापि इदातीन्तनाः सन्त्रासवादिनः न कथं मया निपातिताः इति प्रश्नस्य उत्तरं ददामि। तत्र कारणं भवति- ये खलु रावणादयः राक्षसाः तेषां तु मूलं स्वरूपं देवयोनिविशिष्टम्। कस्मादपि अपराधात् ते राक्षसरूपेण अजायन्त। तस्मिन्नेव अभिशापसमये एते अतीव कातरस्वरेण स्वकीयम् असुररूपग्रहणा-वधिविषयं यदा पृच्छन्ति, तदानीम् अभिशापदाता कतिवर्षेभ्यः अनन्तरं केन रूपेण मया एते हताः सन्तः पुनश्च स्वकीयं प्रकृतं रूपं प्राप्स्यन्ति इति विषये सूचनां ददाति। अथच अधुना स्वर्गपुरे नासौ नियमः प्रचलति। स्वर्गसंविधानसंशोधनात् न कश्चन देवः अभिशापावधिं सूचयति। येन तेऽपि अभिशप्ताः यक्षगन्धर्वादयः नैव म्रियन्ते। नाऽपि संविधानस्य उल्लङ्घनेन एतान् विनाशयामि। येऽपि मृताः इति श्रूयन्ते, वस्तुतः तन्न। पुनरपि ते जायन्ते। अधिकभयङ्कररूपेण प्राणिवधं कुर्वन्ति।[325]

भारतीयानां मौग्ध्यं, तेषां कृते अन्येषां प्रवञ्चनं च कथमिव समुपस्थापयति- मान्याः, कस्यचिद् भारतीयस्य निकटे जन्मथानं मातृभूमिः भवति। मूढाः ते भारतीयाः भूमिं पूजयन्ति। जन्मभूमिः स्वर्गादपि गरीयसी इति वदन्तस्ते नैव कदापि वनवृक्षराजिं कर्त्तयन्ति। केवलस्य फलस्य सङ्ग्रहेण जीवन्ति। एवमपि भूखननं पापाय एव चिन्तयन्ति। अथच सुसभ्याः इण्डिआजनाः अतीव विज्ञानिनः भवन्ति। इदानीं तैः एव समग्रे भूखण्डे विनाशकार्य्यक्रमः आयोज्यते। वृक्षाणां स्थाने एतैरेव निमन्त्रिताः विदेशिशिल्पपतयः शिल्पसंस्थाः स्थापयन्ति। तद्दिनस्य अन्धकारच्छन्नः वनप्रदेशः अधुना अत्युज्ज्वलालोकमालाभिः आलोकितो भवति। नगरसभ्यतायाः तत्र प्रवेशाद् वनजीवाः अपि एतेषामिव सुसभ्याः भवितुं स्वर्गपुरं प्रयान्ति स्वरूपपरिवर्तनाय। तथैव खनिसम्पदः उत्तोल्यन्ते एतैः इण्डिआजनैः। यत्र समतला भूमिः कियद्वर्षेभ्यः पूर्वम् आसीत्, अधुना तत्र महान् गर्त्तः। रत्नशून्या वसुमती कदाचिद् रात्रौ स्खलिता सती बहूनां

---

[325] तत्रैव, पृ.75-78।

भारतीयानाम् अप्रयोजनीयं जीवनं तत्रैव गर्त्तेषु धारयित्वा वात्सल्यस्नेहम् अनुभवति।

शीततापनियन्त्रते गृहे इण्डिआजनः तिष्ठन् जीवनं यापयति। अथच एते भारतीयाः नैव कदापि तथा कुर्वन्ति। एतेषु कश्चन क्षेत्रं कर्षति, अन्यो वा सागरगर्भात् मत्स्यादिकं मारयति। मूर्खाः हि एते अनेन कर्मणा एव सुखं लभन्ते। किन्तु तेषामिव विना श्रमेण जीवनयापनशिक्षा एतेषां सविधे विद्यते एव नहि।

अहो शिक्षाव्यवस्थाप्रसङ्गः नैव खलु वर्णनीयः। इण्डिआशिशुगणाः यत्र पठन्ति, अस्माकं देशस्य विश्वविद्यालयशिक्षाऽपि तत्समाना न भविष्यति। लक्षशः कोटिशः वा रूप्यकाणि अकातरमनसा कश्चन इण्डिआवासी ददाति स्वशिशोः शिक्षाग्रहणाय। शिक्षां प्रति तदीयानाम् आग्रहो दिगन्तप्रसारी। अथच तत्रत्येषु विद्यालयेषु महाविद्यालयेषु वा एते भारतीयाः स्वकीयान् सन्तानान् नैव पाठयन्ति। यदि च नैव पाठनाय नैव काचिद् राजाज्ञा विद्यते, तथापि एते बालकाः तत्र नैव गच्छन्ति। ते तत्रैव पठन्ति यत्र विद्यालयगृहस्य छदिः नास्ति, शिक्षकाः न सन्ति अथवा विद्याग्रहणोपकरणानि नैव विद्यन्ते। परमसुहृदः गुरवः विद्यदातारः अपि एतेषु बहु स्निह्यन्ति। स्वपारिवारिकजीवनस्य अशान्तिं क्रोधं विरक्तिं वा एतेषु शामयन्ति। येन वेत्राघातः चपेटाप्रहारः अथवा एतादृशः अन्यः कश्चन कठोरदण्डः प्रमाणं भवति। तथापि गुरुवराणाम् एतादृशं शिष्यवात्सल्यस्य विरोद्धुम् अक्षमाः ते विद्याग्रहणं तस्मादेव समाप्य कुत्र पित्रा मात्रा वा सह कर्मरताः भवन्ति। एतस्मात् कारणात् शिष्यशून्यं विद्यालयं प्रतिदिनं द्रष्टुम् अनिच्छुकाः ते गुरवः महता दुःखेन विद्यालयं न गच्छन्ति। केवलं वेतनं प्राप्तुं साक्षाद्दिने गच्छन्ति।

गणभोजनव्यवस्था उत्सवादिषु इण्डिआजनानाम् आभिजात्यस्य प्रतीकरूपा भवति। तत्र देशे एकस्मिन् गणभोजनकार्य्यक्रमे यथा विपुलधनराशिः व्ययितः भवति, मम मतेन अस्माकः कस्यचित् परिवारस्य वर्षद्वयस्य कृते भोजनं भवेत्। एकदा कस्यचित् जनस्य नवजातकस्य शिशोः नामकरणोत्सवे अहं योगं दत्तवान्, यत्र प्रायशः द्विशताधिकप्रकाराः खाद्यपदार्थाः आसन्। कस्य खाद्यस्य ग्रहणं करिष्यामि इति चिन्तया आतुरः सन् अहं खादितवान्। परमहर्षेण स जनः अस्मान् भोजयति स्म। यदा तस्मात् अन्तःप्रदेशात् सौप्रस्थानिकीम् उक्त्वा अहं बहिरागतवान्, तदानीं हसन् हसन् अहं प्रायः भूपतितः अभवम्। न जाने, असौ जनः अस्माकं मनोरञ्जनाय

एतादृशम् आयोजनं कृतवान् स्याद् वा न। प्राचीरसंलग्ने एकस्मिन् स्थाने यत्र उच्छिष्टपत्राणि निक्षिप्तानि आसन्, तत्र उच्छिष्टभक्षणरतैः कुक्कुरैः सह केचन भारतीयाः शिशवः पुरुषाः स्त्रियः अपि तस्यैव भक्षणाय रणरताः आसन्। कुत्रचिद् वा एकस्मिन् पत्रे कश्चित् कुक्कुरः कश्चन जनो वा मिलितौ सन्तौ भोजनरतौ आस्ताम्। इदानीमपि अहं तदेव दृश्यं स्मरामि। मनसि आनन्दम् अनुभवामि। एतादृशं मुक्तमञ्चं नाटकं नैव कुत्रापि विश्वे आयोजितं भवेत् इति उच्चैः वक्तुं पारयामि। .... उपसंहारभाषणे महाराजः आदिष्टवान्- इतः आरभ्य न कश्चन भारतवासी अस्मद्देशम् आगमिष्यति। अथच बहुशः इण्डिआन् कथम् आगमिष्यन्ति, विषये तस्मिन् अधिकाधिकः यत्नः अस्मत्पक्षतः करणीयः।[326]

**नामकरणम्**

अधरं मधुरम् इति सुप्रसिद्धं पद्यम् ईश्वरस्य किं बहुना मानुषस्यापि माधुर्यं मोहनं रूपं च प्रकाशयति। किन्तुनाधुना तदेव उद्देश्यम् अवलोक्यते कुत्रापि। अवलोक्यते तु अधरं भिन्नं हृदयमपि भिन्नम्। मधुराधरतले गोपनेन तिष्ठति हालाहलम्। यतः सरलप्राणाः प्रतिक्षणं दुःखपीडाभिः पीड्यन्ते। मृगतृष्णा इव अभिनयति मधुरम् अधरम्। तदेव उच्चैः श्रावयति सकलान् ग्रन्थस्यास्य नामकरणम्। इदं लघु माधुर्ययुतं पुरातनं व्यङ्ग्याक्षेपकं च वर्तते यल्लेखकस्याभिप्रेतमासीत्।

प्रस्तुते सङ्ग्रहे स्थितासु अष्टादशकथासु तासां कथानां शीर्षकेष्वपि व्यङ्ग्यमभिलक्ष्यते।अयं कथाकारः पण्डितः इत्यतः स्वानुकूलं शास्त्रीयं वचनं स्वयमेव निर्माति पत्नीं भ्रामयितुम्। परमरसिकश्चायं साक्षादमृतं (स्वमित्रं) विहाय अमृतपत्न्याम् (मित्रपत्न्यां प्रतिवेशिन्याम्) आसक्तः। सङ्ग्रहस्य च नामकरणम् 'अधरं मधुरम्' इति सुचिन्तितम्। ओष्ठाधरयोर्मध्ये चुम्बनप्रसङ्गे अधरस्यैव महत्त्वं न तु ओष्ठस्य। अधरं मधुरमिति शीर्षके प्रतिवेशिनी एव अधर-स्थानीया इत्यत्र नास्ति सन्देहः।

यथा कथासंग्रहस्य नामकरणे मधुराक्षिप्तः व्यङ्ग्यः परिस्फुरति तथैव अनुष्टुब्भिः रचितेषु कथाशीर्षकेषु काव्यिकः व्यङ्ग्यः नेत्रातिथ्यं गतः इति जानीमो वयम्। चरित्राणां नामसु अपि सः स्फोरकः व्यङ्ग्यः वरीवर्ति। विशिष्टविशेषणपदानि स संज्ञापदरूपेण प्रयोज्य विशिष्टव्यङ्ग्यार्थप्रदाने सफलः लक्ष्यते। यथा- दुर्मतिभट्टः(पृ.36) रम्भामण्डले(39), अप्सराः

---

[326] तत्रैव, पृ. 79-84।

सुवर्णकान्तिः(39),रमणीसर्वस्वः देवः(40),चलच्चित्राभिनेता शाखामृगवदनः (40), यक्षः अक्षरविहीनः(41), कौशिकपुरनिर्वाचनमण्डल्याः(43), शय्यारङ्कः(43), विजयानन्दः(43), वामाञ्चलप्रियग्रामस्य(45), भाग्यधर-ग्रामस्य(46),सर्वानन्दभट्टनागरः,वामाज्ञाकरः(47),परच्छिद्रप्रियमिश्रस्य(49), मित्रं कलहरङ्कः(50), वक्राधरः, स्वर्णमाली विशालः(59), पारायणदाशः(60), भाग्यरविमहानन्दः(61), लोकबलप्रदानकार्य्यालयः(63), धर्मनिरपेक्षदलधर्मसर्वस्वदलयोः(65), पिपासासरणौ तिष्ठति काञ्चनप्रियः(67), छत्रधारिदलस्य(70), राजनेतुः सहस्राशस्य(72), पूर्वतनमन्त्री आसनप्रियः(73), परमात्मा कोटिब्रह्माण्डनायकः(74), परमात्मा महाविश्वरूपः(75), अहं प्रलयात्मा(76), इण्डिआजनः(80), तृष्णातुरः, चम्पकवर्णा(85), चुम्बप्रियः, कामकला(86), वामासक्तः(87), अक्षतयौवना(88), मधुभाषिणीभट्टाचार्या(92), अम्बाहारकेन्द्रम्, निजजनाहारकेन्द्रम्, कर्मकुण्ठाहारकेन्द्रम्, आलस्यजनाहारकेन्द्रम्(97)। परपक्वे विल्वे को लाभः काकास्य(89), शूकराय सुपक्वं रम्भाफलं कदापि नैव रोचते(98) इत्यादिलोकोक्तयः तस्य सरलां भाषायाम् अपरां मात्रां योजयन्ति।

**चरित्रचित्रणम्**

प्रमोदनायकस्य व्यङ्ग्यसंसारे सर्वविधानि चरित्राणि क्रमशः अवतरन्ति। पूजाव्यवसायिनः पुरोहिताः, शिक्षाव्यवसायिनः अध्यापकाः, स्वार्थमात्रान्वेषिणः पण्डिताः, मिलिततन्त्रे एकत्रीभूताः परस्परं विरोधिनः अपि राजनेतारः, भोगसर्वस्वाः आश्रमवासिनः, पतिं श्रीविष्णुं विताडयन्त्यौ लक्ष्मीसरस्वत्यौ, पुरस्कारान्वेषिणः साधारणनागरिकाः, वञ्चनाप्रदायकाः भाषणसर्वस्वाः नेतारः, परस्परं विवदमानाः आत्मघोषिताः ईश्वराः सर्वे अपि साधारणजनजीवनस्य नितरां वास्तविकं नग्नं सत्यं प्रत्यक्षीकारयन्ति। कथाकारः तैस्तैश्चरित्रैः भण्ड-पाखण्डानां छलच्छद्मं विदारयति। वृद्धगृध्रस्य सर्वेषां प्रश्नानाम् उत्तराणि सरसं वदति राजनेता। प्रभुभक्तः कुक्कुरः अपि यदा स्वदलं त्यक्तुं न इच्छति, तदा स्वाभिमान-मान-सम्मानाभिजात्यं त्यक्त्वा लक्ष्यहीनाः आसनमात्रलक्ष्यकाः नेतारः प्रतिमुहूर्त्तं दलपरिवर्तनं कुर्वन्ति इति लक्षणीयमस्ति। पीडा न विद्यते दले इति कथायां यथा-

पिपासासरणौ तिष्ठति काञ्चनप्रियः। तस्य दलस्य मुख्यकार्यालये तिष्ठति इति हेतोः राज्ये एतस्य परिचयः अस्ति। एतदर्थं निजजातिप्राणिनाम् उपरि अस्य अतीव वितृष्णाभावः। राजनीतिं करोति इति गर्वेण गर्वितः अयं

सर्वान् विस्मरति। अस्तु, नायं विषयः अधुना आलोचनीयः। कथम् आयाति इति ज्ञातव्यम्। ...

प्रभुभक्त एतद्बोद्धुं नैव पारयति स किं वदति इति। धर्महीनदलेन सह धर्मप्रियदलस्य कथं वा मेलनम्, कथं वा भ्रातृभाव इति यदा आश्चर्यान्वितः सन् चिन्तयति, तदानीम् अधिकः उल्लसितः सन् काञ्चनप्रियः अवदत्- अरे, तव विश्वासो नैव भवति, कथमावयोः मेलनं स्यादिति चिन्तयति। नहि, चिन्तनेन अलम्। अरे भ्रातः! राजनीतौ सर्वं किमपि सम्भवति। गतदिनस्य परमशत्रुः अद्य परमं मित्रं यथा भवति, तथैव मित्रमपि शत्रुः भवति। आवयोर्मध्ये न तथा दूरता अस्ति। यतो हि उभयोः दलयोः आरम्भस्तु धर्मशब्दादेव भवति। त्यजतु चिन्तनम्। प्रकृतं संवादं शृणु। गतरात्रौ आवयोः उभयोः दलयोः मध्ये मित्रभावः स्थापितः। आगामिनिर्वाचने द्वे दले एकत्र निर्वाचनयुद्धे अवतीर्णे भविष्यतः- इति संवादं मुख्यकार्यलयात् प्राप्य झटित्येव त्वदर्थम् आगच्छामि। दलीयकर्मणि आवयोः भूमिका अतीव गुरुत्वपूर्णा अस्ति। सुतराम् आवां यदि मिलित्वा कार्यं करिष्यावः, तर्हि विजयः अवश्यमेव। एवं किमपि किमपि उक्त्वा पुनः हस्तमेलनम् अकरोत् असौ। प्रभुभक्तः अधुना प्रसन्नो भवति। दलीयविरोधात् पूर्वपरिचितः सन्नपि न तथा अनेन सह आलपति।[327]

तथैव न दीनो गणतन्त्रेऽस्ति इति कथायां सर्वहृतदरिद्रस्य प्रतिनिधिः सुदामा प्रतिवदति द्वारकाधीशं श्रीकृष्णम्- अस्मिन् समये श्रीकृष्णः पृष्टवान्- "तर्हि तेषां शिक्षाव्यवस्था? समग्रे देशे मया नूतनशिक्षाव्यवस्थायाः प्रसारः कृतोऽस्ति। तस्मिन् विषये किमु मम सेवामनोभावो नैव निहितः?" एतस्य श्रवणेन विक्षुब्धः सुदामा अवदत्- "मैव वद, शिक्षाप्रसङ्गम्। अरे, आधुनिकतानाम्ना किं वा त्वया नैव पापम् आचरितम्। यदा तव शिशवः अधुना विदेशेषु पठनरताः, तदानीम् अस्मदीयाः शिशवः मध्याह्नभोजनलोभेन भग्नगृहेषु पठन्ति। को वा पाठयिष्यति तान्? विना धनेन शिक्षकास्तु प्रतिमासं राजधान्याम् आन्दोलनरताः भवन्ति। यदा गुरूणाम् अवस्था एतादृशी, तदानीं शिक्षार्थिनां शिक्षानुष्ठानस्य वा दुर्गतिः सहजेन आकलनीया त्वया। कथं त्वया प्रदत्तानि भग्नद्विचक्रयानानि आरुह्य छात्राः विद्यालयं गच्छन्ति। मध्याह्नभोजनभक्षणव्याजेन झिल्लीतैलपादीनां देहावशेषं खादित्वा रोगाक्रान्ताः भवन्ति इति संवादं किमु नैव पठसि त्वम्?" ...

---
[327] तत्रैव, पृ.69।

"तर्हि एकेनैव रूप्यकेण मूल्येन दरिद्रजनेभ्यः यथा त्रिंशत्किलोग्रामपरिमिताः तण्डुलाः मया प्रदीयन्ते, तत्र किमु मम साधुभावना नैव निहिता?" सामान्योच्चस्वरेण पृष्टवान् श्रीकृष्णः। सुदामा अपि एतन्निमित्तं पूर्वप्रस्तुतः आसीत्। अतएव यथाशीघ्रम् अवदत्- "मास्तु स प्रसङ्गः। एकेनैव रूप्यकेण यथा किलोग्रामपरिमितं तण्डुलं गोधूमं वा सुलभमूल्येन विक्रीणीते इति वदति तत्तु सत्यम्। परन्तु अनेन मम पुत्राणां महती हानिः भवति। अनन्तकालाय एवं निर्वाचितः भविष्यति- इति भावनया कर्मकुण्ठमानवनिर्माणं करोषि। विना श्रमेण ते मन्दभाग्यशालिनः मे पुत्राः मुखसन्निधाने भोजनपदार्थं लब्ध्वा इदानीं श्रमाय वीतस्पृहाः सन्ति। तत्र मार्गस्य एतस्मिन् पार्श्वे यदा सुलभतण्डुलकेन्द्रं वर्तते, अन्यत्र कस्मिंश्चिद् उपमार्गे कादम्बरीकेन्द्रम् अपि दृश्यते। इदानीं ग्रामेषु श्रमशक्त्योः प्रयोजनं नास्ति। यदर्थं कादम्बरीप्रमत्ता युवशक्तिः सर्वत्र द्यूतक्रीडासक्ता भवति। ते कथम् उन्मत्ताः सन्तः अकार्य्यं कुर्वन्ति इति विषये त्वं सम्यग् जानासि। अथ च तव दलीया प्रीतिः तान् एतादृशं कर्म कर्त्तुम् अग्रे सारयति। यदि कश्चन आरक्षिणा निगृहीतः, त्वं झटित्येव तस्य मुक्तेः कारणं भवसि। येन अद्य पापभीतिः संसाराद् अपगताऽस्ति। मन्दकार्यम् अधुना गुणाय भवति। तदर्थं हि मन्दकर्मा कश्चन ग्रामतः आरभ्य नगरं यावत् नेतृत्वपदव्यां शोभमानो भवति। यतो हि गोधूमतण्डुलादिनिमित्तं कस्य गृहे अपेक्षा न भवति। तदर्थम् असत्कार्याय व्यग्राः भवन्ति सर्वे। कृषिसभ्यतायाः विकाशः यदि स्यात्, तहि भिक्षार्थिन इव जनाः सर्वकारस्य अन्नदानस्य कृते अपेक्षमाणाः न भवेयुः इति मदीयो विचारः। अथ च ज्ञात्वाऽपि त्वम् एतादृशं कर्म करोषि। जनाः भिक्षोपजीविनः सन्तु इति त्वदीयो मौलिकः सिद्धान्तो भवति। येन तव पुत्रपौत्रप्रपौत्रादयः अपि निष्कण्टमिमां मेदिनीम् उपभोक्ष्यन्ति।"[328]

एवमत्र प्रमोदकुमारनायकस्य मधुवर्षिणी लेखनी सहृदयेभ्यः कथावाचकेभ्यः तस्य अधरं मधुरम् इति कथासङ्ग्रह-माध्यमेन अवश्यं मधु वर्षिष्यति इति आशास्महे।

---

[328] तत्रैव, पृ.96-101।

## सन्दर्भग्रन्थाः


### संस्कृतग्रन्थाः

- त्रिपाठी राधावल्लभः, षोडशी, साहित्येकादेमी, नवदेहली, 1998।
- ..................., आधुनिकसंस्कृतसाहित्यसन्दर्भसूची, प्रकाशकःगिरिः.सी.डा-, कुलसचिवः, राष्ट्रियसंस्कृतसंस्थानम्, 5657-, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली 58, 2010।
- दाशः नारायणः, गङ्गे च यमुने चैव, लोकभाषाप्रचारसमितिः, वरपदा, भद्रक, ओडिशा, पुरी2001 ,।
- ..................., संस्कृतेऽनूदितं रवीन्द्रसाहित्यम्, मान्यताप्रकाशन, दिल्ली, 2012।
- नायकः प्रमोदकुमारः, अधरं मधुरम्, कथाभारती, कलिकाता-103, 2020।
- ............................., दारिद्र्यशतकम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली-५८, प्रथमसंस्करणम्-२०१४।
- ........................., उवाच कण्डुकल्याणः, लोकभाषाप्रचारसमितिः, बरपदा, भद्रकः, 2001।
- ........................., गर्तः, लोकभाषाप्रचारसमितिः, बरपदा, भद्रकः, 2001।
- ........................., शबरी, लोकभाषाप्रचारसमितिः, बरपदा, भद्रकः, 2009।
- ........................., स्वर्गादपि गरीयसी, लोकभाषाप्रचारसमितिः, बरपदा, भद्रकः, 2005।
- मिश्रः राजेन्द्रः, कल्पवल्ली,, साहित्येकादेमी, नवदेहली, 2013।
- रामजी उपाध्यायः, भारतस्य सांस्कृतिकनिधिः, इलाहावाद्।

**हिन्दीग्रन्थाः**

- तिवारी, अर्चना, आधुनिक संस्कृत कथाएं : स्थिति और प्रवृत्ति, पद्मजाप्रकाशन, ५७, वसन्तविहार, झूंसी, इलाहावाद- १९।
- त्रिपाठी राधावल्लभ,संस्कृत साहित्य का अभिनव इतिहास, विश्वविद्यालयप्रकाशन, वाराणसी, प्रथम संस्करण चतुर्थ ,2001, 2013.
- .................... , संस्कृतसाहित्य सवीँ शताब्दीविः, दिल्ली, राष्ट्रियसंस्कृतसंस्थान, 1999

**आङ्ग्लग्रन्थाः**

- Panda Rabindra Kumar, Significant Facets of Modern Sanskrit Literature, Bharatiya Kala Prakashan, Delhi, 2011.
- Chattopadhyay Rita, 20th century Sanskrit Literature(A Glimpse into Tradition and Innovation), Kolkata, Sanskrit Pustak Bhandar, 2009.
- Mishra Arun Ranjan, Contemporary Sanskrit Writings in Orissa, Pratibha Prakashan, 2006.

**सन्दर्भपत्रिकाः**

- “कथासरित्”(1-32), कथाभारती, ५७, वसन्तविहार, झूंसी, इलाहावाद, २११०१९।
- “संस्कृतप्रतिभा”, साहित्य-अकादमी, रवीन्द्रभवनम्, ३५, फिरोजशाहरोड, नईदिल्ली-१।
- “संस्कृतसाहित्यपरिषत्पत्रिका” (85-95), संस्कृतसाहित्यपरिषत्, राजादीनेन्द्रष्ट्रीट्, श्यामवजार, कोलकाता, पश्चिमवङ्गः।


❖❖❖

# श्रीविदग्धमाधवनाटकस्य नाट्यशास्त्रीयमध्ययनम्

**वावनपालः**

## 1.उपक्रमः

द्वितीयसहस्राब्दस्य प्रारम्भिकशतकेषु अनन्यभक्तिभावनां पुरस्कृत्य हिन्दुधर्मस्य कापि प्रबला धारा प्रवाहिता। 1375 तः 1700 पर्यन्तं परिव्याप्ते अस्मिन् कालखण्डे श्रेष्ठसाहित्यस्य सृजनमपि अभवत्। अयं कालः श्यामसुन्दरदासेन स्वर्णयुगमिति, आचार्येण रामचन्द्रशुक्लेन भक्तिकालः इति, हजारीप्रसादद्विवेदिना लोकजागरणकालः इति वर्णितः। अस्मिन् समये भक्त्यान्दोलनमिति प्रसिद्धमिदमान्दोलनं मध्यकालीनभारतस्य सांस्कृतिकेतिहासे महत्त्वपूर्णं स्थानमधिकरोति। अस्मिन् काले सामाजिकसंस्कारकैः धार्मिकसंस्कारकैश्च समाजस्य विभिन्नस्तरेषु संस्कारं विधाय जनमानसे भगवन्तं प्रति भक्तिभावस्य प्रचारं कृतवन्तः। आचार्यशङ्करात् आरभ्य चैतन्यदेवं यावत् सर्वे तच्छिष्याश्च नवधाभक्तेः प्रसारं कृतवन्तः। तेन क्रमेण श्रीरूपगोस्वामिनः आविर्भावः जातः।

## 2. नाटककारस्य जीवनवृत्तम्

1486-1533 खीष्टाब्देषु वङ्गप्रदेशे चैतन्यमहाप्रभुः प्रेम्णः रहस्यवादस्य च यां भक्तिधारां प्रवाहयामास तत्र वैष्णवाचार्याः भक्तिं रसरूपेण विवेचनमनेके महापुरुषाः कृतवन्तः सन्ति।[329] अत्र विविधग्रन्थकारेषु रूपगोस्वामिनः स्थानं सर्वोत्कृष्टमस्ति। अयं हि रूपगोस्वामी मुकुन्दस्य पौत्रः कुमारस्य च पुत्रः, श्रीचैतन्यमहाप्रभोः साक्षात् शिष्यः आसीत्। भक्तिरत्नाकरग्रन्थानुसारेण अस्य जन्म पूर्ववङ्गे जैसोर-समीपे फतेयाबादे अभवत्। अस्मिन् स्थाने प्रायः चतुर्दशशताब्द्याः अन्तिमभागे रूपगोस्वामिनः पूर्वजाः आगत्य वासं कृतवन्तः। अस्य पूर्वजाः कर्णाटकप्रदेशीयाः भारद्वाजगोत्रीयाश्च आसन्।[330] मालाधरवसोः साहाय्येन रूपः सनातनश्च हुसेनशाहेन परिचितौ दरबारे नियुक्तौ।[331] हुसेनशाहेन तयोः स्वागतं विधाय

[329] The Early History of the Vaishnava Faith and Movement in Bengal- S. K. Dey।
[330] चैतन्यचरितावली, प्रभुदत्तब्रह्मचारी, खण्ड-4, पृ. 38।
[331] एडवान्स्ट हिस्टरी आफ इण्डिया, डा.कालीकिंकरदत्त, भाग-2, पृ. 346-347।

मन्त्रिपदं प्रदाय धर्मपरिवर्तनं कारयित्वा नामपरिवर्तनमपि अकरोत्। सनातनः साकिरमलिक इति, रूपश्च दबिरखास इति प्रसिद्धौ।[332] 1514 ईशवीयवर्षे तस्य वासस्थानं रामकेलिं प्रति श्रीचैतन्यदेवस्य आगमनसमये तस्य दर्शनं प्राप्य नितरां प्रभावितः रूपः अन्ततः 1516 समये दरवारं त्यक्तवान्।

अयं हि वैष्णवभक्तिधारया प्रभावितः भूत्वा भक्तिरसामृतसिन्धोः तथा उज्ज्वलनीलमणेश्च रचनां कृतवान्। तथा च अनेन रससिद्धान्तस्य शब्दावल्यां तथाऽऽवरणे च कृष्णोपरि आधारितस्य भक्तिसिद्धान्तस्य स्थापना कृता। स्वकीयधर्मानुरागं तथा स्वचिन्त्याध्यात्मिकरहस्यवादञ्च लौकिकप्रेम्णः तथा सांसारिकस्पृहास्वरूपे व्यक्तं कृतवानयं हि विद्वान्। रूपगोस्वामिनः भ्रातृजः बल्लभस्य पुत्रः जीवगोस्वामिना कृता टीका काव्यमालासीरीजसंस्थातः प्रकाशितोऽभवत्। अस्य संस्करणस्यान्तिमः श्लोकः अनेन प्रकारेण वर्तते-

अयमुज्ज्वलनीलमणिगहनमहाघोषसागरप्रभवः।
भजतु नैव मकरकुण्डल परिसर सेवोचितीं देव॥

**3.श्रीरूपगोस्वामिनः साहित्यिककृतीनां परिचयः**

षोडशशताब्द्यां संस्कृतसाहित्यस्य श्रीवृद्धौ रूपगोस्वामिनः कवित्वम् आचार्यत्वं च अप्रितिमे। स्वप्रतिभायाः पाण्डित्यस्य च निकषभूतानां लक्ष्यलक्षणग्रन्थानां प्रणयनेन सह काव्यसर्जनस्य मणिकाञ्चनसंयोगः तस्मिन् उपस्थितः। तदेव हि रूपगोस्वामिनः कृतित्वस्य स्पष्टप्रमाणिकं निदर्शनम् अस्ति।

रूपगोस्वामिनः काव्यकृतीनां सन्दर्भे श्रीजीवगोस्वामी स्वपितृव्येन श्रीसनातनगोस्वामिना प्रणीतस्य लघुभागवतामृतस्य "लघुतोषणी"- इति व्याख्यायां सनातनस्य तथा रूपगोस्वामिनः कृतीनमुल्लेखं कृतवान्। तस्य अधारेण रूपगोस्वामिनः त्रयोदशकृतीनां परिचयः लभ्यते। एतद्विहाय रूपगोस्वामिनः अन्यकृतीनामप्युल्लेखो वर्तते, ते यत् अनन्तरं स्तोत्रावली, पद्यावली, विरुदावली, वर्णनमाहात्म्यरूपेण वा संगृहीतम्।[333] श्रीजीवगोस्वामिकृतलघुतोषिणी-व्याख्यानुसारेण रूपगोस्वामिनः कृतयः निम्नलिखिताः लसन्ति- हंसदूतम्, उद्धवसन्देशः, अष्टादशच्छन्दः,

[332] हिस्ट्री आफ इण्डियन फिलोसफी, डा.एस्.एन्. दासगुप्ता।
[333] The Early History of the Vaishnava Faith and Movement in Bengal, S. K. De, p. 154.

उत्कलिकावल्लरी, विदग्धमाधवम्, ललितमाधवम्, दानकेलिकौमुदी, भक्तिरसामृतसिन्धुः, उज्ज्वलनीलमणिः, मथुरामाहात्म्यम्, पद्यावली, नाटकचन्द्रिका, संक्षेपभागवतामृतम्, गोविन्दविरुदावली, प्रेमेन्दुमागरः, आनन्दमहोदधिः, मुकुन्दमुक्तावली।

स महम्मदीयानां राजसभायां स्थित्वापि स संस्कृतविदुषां विष्णुभक्तानाञ्च सम्माननं करोति स्म। रामकेलेः सामान्यदूरे रूपगोस्वामिना निर्मिता 'कन्हाई नाट्यशाला' नामा मूर्तिशाला आसीत्, या कृष्णभक्तेः तस्य ज्वलन्तं प्रमाणमस्ति। राजकार्येण सह निरन्तरं साधुसङ्गे शास्त्रचिन्तने च दत्तचित्तः सन् स राजपदात् असीमवैभवात् च शनैः-शनैः विरक्तः भवति। तस्मिन् समये स महाप्रभोः प्रशंसां श्रुत्वा गौडेश्वरात् निलीय तस्य दर्शनमकरोत्। महाप्रभोः निश्छलभगवद्भक्त्या नितरां प्रभावितः स तस्य शिष्यत्वं स्वीकरोति। तद्दिने एव प्रभुः भ्रातृद्वयस्य नाम परिवर्त्य तं रूपमिति अपरं सनातनमिति नाम्ना व्यभूषयत्। म्लेच्छजनसम्पर्ककारणात् यद्यपि तदा धर्मपरिवर्तनस्य आरोपः भवतु, परन्तु तस्य सम्पर्कस्तु नवद्वीपस्य वैष्णवधर्मेण सह आसीदेव, तथा प्रारम्भात् विष्णुभक्तिं प्रति स अवनतः आसीत्। अतः स्पष्टं भवति यत्- रूपगोस्वामी वैष्णवधर्मस्य अनुयायी, मुस्लिम-धर्मात् दीक्षितः नास्ति।

सुशीलकुमारदे-महोदयः रूपगोस्वामिनः जीवनयात्रायाः उल्लेखं कृत्वा वदति- श्रीरूपगोस्वामी तस्य दानकेलिकौमुदीग्रन्थं महाप्रभोः साक्षात्कारात् पूर्वं रचितवान्। एवं द्वयोः प्रारम्भिक-दूतकाव्यौ हंसदूत-उद्धवसंदेशौ च श्रीचैतन्यदेवस्य साक्षात्कारात् पूर्वं लिखितवान्। उपर्युक्तैः त्रिभिः ग्रन्थैः न केवलं एतत् प्रमाणयति यत् श्रीरूपः स्ववंशानुगतपरम्परामेव पोषयति, अपितु म्लेच्छसेवाकुलिता आन्तरिकी वैष्णवप्रवृत्तिः तं मोचयितुं प्रेरयति, यस्य फलस्वरूपं स रामकेलि-स्थाने गुरोः चैतन्यदेवात् दीक्षां स्व्यकरोत्।

**4.नाट्यकारस्य कालः**

रूपगोस्वामिनः कालनिर्धारणे न किमपि काठिन्यं वर्त्तते। रूपगोस्वामी दानकेलिकौमुद्याः रचनां 1495 खीष्टाब्देऽकरोत्। विदग्धनाटकस्यान्ते लिखितेनैकेन श्लोकेन ज्ञातो- भवति यदस्य नाटकस्य रचनाकालः सम्वत् 1589 अर्थात् 1532-33 खीष्टाब्देऽभवत्। यथा-

नन्दसिन्धुरबाणेन्दु संख्येसंवत्सरे गते।

विदग्धमाधवं नाम नाटकं गोकुले कृतम्॥[334]

अनेनैव प्रकारेण उत्कलिकामञ्जर्याः रचना 1550 खीष्टाब्दे 1471 शकाब्देऽभवत्।[335] भक्तिरसामृतासन्धोः रचनाकालः 1541- 42 खीष्टाब्दो वर्त्तते। अतः रूपगोस्वामिनः जीवनकालः प्रायः 1470- 1554 स्वीकर्त्तव्यः।

रूपगोस्वामिनः निश्चितजन्मतिथेः ज्ञानाभावात् तस्य कालनिर्णयः सहजः नास्ति। ऐतिहासिकप्रमाणैः जानीमो वयं यत् रूपगोस्वामी गोडाधिपतेः जलालुद्दीनहुसेनशाहस्य दरवारे मन्त्री आसीत्। अयं खलु वङ्गदेशे 1493 तः 1518 पर्यन्तं नवावः आसीत्। परन्तु कदा रूपगोस्वामिनः दरवारे आगमनं जातमिति न ज्ञायते। द्वितीयतः अयं महाप्रभोः शिष्यत्वं प्राप्तवान् दरवारं परित्यज्य, यत् 1518 ई. पूर्वं स्यात्। प्रायः 1564 ई. तस्य लीला समाप्ता वृन्दावनधाम्नि।

आचार्यस्य बलदेवस्य मतेन रूपगोस्वामिनः स्थितिकालः- 1491 तः 1591।[336] प्रभुदत्तब्रह्मचारिणः मतेन तस्य जन्मसमयः 1488संवत्(1545 ई.)। इतः पञ्चदशशतकस्य अन्तिमभागे रूपगोस्वामिनः जन्म अभवत् तथा षोडशशतकस्य मध्यभागं यावत् तस्य स्थितिः आसीत् इति वक्तुं शक्यते।

मूर्धन्यकवेः तथा आचार्यस्य श्रीरूपगोस्वामिनः स्थितिकालविषये विदुषां मतैक्यं नास्ति। श्रीरूपस्य समयसम्बन्धे निश्चयात्मकं किञ्चित् नास्ति। उपलब्धसामग्र्याधारानुसारेण किञ्चित् सामान्यं निष्कर्षं प्रतिपादयितुं शक्यते। श्रीरूपस्य जीवनवृत्ताध्ययनेन तस्य व्यक्तित्वस्य प्रमुखौ द्वौ पक्षौ स्पष्टौ भवतः। श्रीरूपः गौडाधिपतेः हुसेनशाहस्य मंत्री आसीत्। ततः श्रीचैतन्यमहाप्रभोः शिष्यः भवति।[337]

ऐतिहासिकसाक्ष्यस्य आधारानुसारेण हुसेनशाहस्य राज्यरोहणम् 1493 ईशवीयाब्दे अभवत्। अतः हुसेनशाहस्य शासनकालः पञ्चदशशताब्द्याः अन्तिमे भागे तथा षोडशशताब्द्याः पूर्वार्धे च भवति। एवं चैतन्यमहाप्रभोः आविर्भावः कालः 1485 ई. मन्यते। अनेन ऐतिहासिकतथ्येन हुसेनशाहस्य चैतन्यदेवस्य च स्थितिः षोडशशताब्द्याः पूर्वार्धे संकेतितः वर्तते। तथा च

---

[334] द्र. का मा. संस्करणे।

[335] मित्रा नोटिसेज, भा. 1, सं. 3159।

[336] भागवत सम्प्रदाय, बलदेव उपध्यायः, पृ.500।

[337] The Cambridge History of India Vol. III, p. 210 edited by L.T. Colonel wolseley Haig

श्रीरूपं ऐतिहासिकपुरुषस्य चैतन्यमहाप्रभोः तथा हुसेनशाहस्य समकालीनं सिद्धं करोति। अतः ऐतिहासिकसाक्ष्याधारेण चैतन्यस्य हुसेनशाहस्य समसामयिकः इति श्रीरूपस्य स्थितिकालः मुख्यरूपेण षोडशशताब्द्यां सिद्धः भवति। एवमत्र श्रीरूपगोस्वामिनः स्थितिकालः यदि भागत्रयेण विभज्यते तर्हि स्पष्टं भवति - 1. आरम्भकालः 2. ग्रन्थरचनाकालः 3. अन्तकालः।

परमपूज्यः आचार्यः बलदेव उपाध्यायः श्रीरूपस्य स्थितिकालं 1492 ई.-1591 ई. मनुते।[338] तस्य निर्देशानुसारेण श्रीरूपस्य जन्मः 1491 ई. भवति। श्रीप्रभुदत्तब्रह्मचारी श्रीरूपस्य जन्म संवत् 1488 इति अनुमानं स्वीकरोति। मतद्वये चतुर्णां वत्सराणां भेदः भवति। तद्भवतु नाम मनीषिद्वयानुसारेण श्रीरूपस्य जन्मकालः 15वीं शताब्द्यामिति स्वीकारे विशेषापत्तिर्नास्ति।

## 5.विदग्धमाधवस्य उपजीव्यत्वम्

सहृदयहृदयाह्लादकारित्वात् रूपकेषु नाटकस्य सर्वादौ प्रथमं स्थानं वर्तते। नाट्याचार्यैः निर्दिष्टैः सर्वैः नाटकीयगुणैः युक्तं नाटकं विलक्षणतया दर्शकानां समक्षं प्रस्तूयते। अतः प्राचीनकालादारभ्य आधुनिककालं यावत् संस्कृतसाहित्ये उत्युच्चकोट्याः नाटकानि प्रणीतानि प्रदर्शिकतानि च सन्ति। अनेन क्रमेण रूपगोस्वामिनः विदग्धमाधवं नाटकम् अतिमहत्वपूर्णं स्थानमधिकरोति।

'विदग्धमाधवस्य' कथावस्तु श्रीकृष्णस्य श्रीराधायाश्च लीलामयचरित्रमाधारीकृत्य प्रवर्तते। अस्य पूर्वं श्रीराधाकृष्णयोः चरित्रं श्रीमद्भागवते, महाभारते, विष्णुपुराणे, ब्रह्मवैवर्ते पद्मपुराणे च लभ्यते, यत् उपजीव्य श्रीरूपगोस्वामी स्वनाट्यकृतौ 'विदग्धमाधवे' श्रीकृष्णं श्रीराधां च नायकनायिकारूपेण प्रस्तौति। अस्य आधारेण श्रीराधा श्रीकृष्णस्य स्वीयानायिकारूपेण काव्यशास्त्रीयसिद्धान्तानां सर्वथा अनुकूलास्ति। अनेन प्रकारेण पौराणिकग्रन्थेषु तथा साहित्यसंसारे राधा-कृष्णयोः विविधलीलामय-चरित्रचित्रणेन सामाजिकेषु आध्यात्मिकचेतनायाः, नैतिकोत्थानस्य, भारतीयसंस्कृतेश्च संवर्धनं भवति।

---

[338] 1. The cultural hreritage of India, Vol. IV, P.186 edited by H.D. Bhattacharya
2. आचार्य बलदे व उपाध्याय-भागवत् सम्प्रदाय पृ. 500
3. विदग्धमाधव, पं. रमाकान्त झा, व्याख्याकार (चौ. प्र.).भूमिका से उद्धृत, पृ.18।

विदग्धमाधवे राधा-कृष्ण-केलि-कथा अतिचमत्काररूपेण प्रस्तुता। श्रीकृष्णः भारतीयसंस्कृतौ सर्वाधिकः प्रभावशाली ऐतिहासिकः महापुरुषः वर्तते, यस्य चरितमुपजीव्य प्रस्तुतं नाटकं विरचितम्। अतः इतिहासप्रसिद्धकथानकम् उपजीव्य इयं रचना इति वक्तुं शक्यते। एतत्तु ध्यातव्यं यत् नवीनोद्देश्यसिद्ध्यर्थं नाटककारः रूपगोस्वामी इतिवृत्तयोजनं स्वदृष्ट्या अकरोत्, सामान्यप्रकरणवक्रतामाश्रित्य, तेन प्रसिद्धघटनाचक्रस्य पात्राणां च समुचितविनियोगः अभवत्।

'विदग्धमाधवस्य' आख्यानवस्तुनः आधाररूपेण विराजते पराम्पराप्राप्तं श्रीकृष्णस्य श्रीराधायाश्च चरित्रम्। ततः नितरां प्रेरितः श्रीरूपगोस्वामी तस्य नाटकीयरूपं प्रस्तुतवान्या। ग्रन्थानामवलोकनेन ज्ञायते यत् श्रीकृष्णचरित्रस्य विस्तृतवर्णनं श्रीमद्भागवते, महाभारते, विष्णुपुराणे, ब्रह्मवैवर्तपुराणे, पद्मपुराणे च लभ्यते। तासां पौराणिककथानां वर्णनं मत्स्य-वायु-अग्नि-लिङ्ग-देवीभागवतादिषु संक्षिप्तरूपेण लभ्यते। इतिहासपुराणेषु वर्णितम् अतिविलक्षणं कृष्णचरितं मुख्यतः त्रिविधं स्वरूपं संकेतयति- गोपीवल्लभः कृष्णः, गीतायाः प्रवक्ता कृष्णः, पाण्डवपथप्रदर्शकः कृष्णश्चेति।

श्रीकृष्णस्य गोपीभिः सह लीला तु अतिमहत्वपूर्णास्ति। सा श्रीकृष्णं प्रति भक्तानां माधुर्यमय्याः भक्तेः मनोरमप्रतीकभूतास्ति। अतः वैष्णवसाहित्यो व्रजेश्वरी राधा किमपि विशिष्टं स्थानमधिकरोति। 'विदग्धमाधवे' विशेषतया श्रीराधिकया सह श्रीकृष्णस्य व्रजलीलायाः (वृन्दावनलीलायीः) वर्णनं दृश्यते। अतः भारतीयसाहित्ये विकसितस्य राधातत्त्वस्य उपरि दृष्टिपातः करणीयः वर्तते।

गौडीयवैष्णवग्रंथेषु या रासेश्वरी राधा श्रीकृष्णस्य प्रियतमारूपेण गोपीश्रेष्ठा कीर्त्तिता, तस्याः नामोल्लेखः अपि परमवैष्णवग्रन्थे श्रीमद्भागवते नास्ति। तत्र केवलं गोपीभिः सह कृष्णलीलावर्णनं दृश्यते। विष्णुपुराणे अपि तथैव स्थितिः वर्तते। तत्र श्रीमद्भागवते इव एकस्याः गोपिकायाः सौभाग्यं वर्णितमस्ति, या अन्यगोपीभ्यः श्रीकृष्णं सविशेषमाकृष्टवती। तया सह श्रीकृष्णः अन्यगोपीभ्यः दूरं गतः एकांतसंगतिं प्रदत्तवान्।

अनयाराधितो नूनं भगवान् हरिरीश्वरः।
यन्नो विहाय प्रीतो यामनयद्रहः॥ [339]

---

[339] श्रीमद्भागवते, 10/30/24।

अत्रोपविश्य वै तेन काचित् पुष्पैरलङ्कृता।
अन्यजन्मिमि सर्वात्मा विष्णुरभ्यर्चितस्तया॥[340]

यद्यपि भागवते विष्णुपुराणे च उद्धृतश्लोकद्वयस्य टीकासु गौडीयवैष्णवैः स्पष्टरूपेण राधायाः गूढसंकेतं व्याख्यान्ति, तथापि पुराणद्वये 'राधा'नाम्नः स्पष्टोल्लेखो नास्तीति निश्चप्रचम्। गोपीनां चर्चां कुर्वता वेदव्यासेन राधा-नाम-गोपनं कृतं किमर्थमिति रहस्यं चिन्त्यमेव यत् वैष्णवाचार्यैरपि संकेतितम्।

ब्रह्मवैवर्तपुराणे श्रीराधायाः जन्म तथा श्रीकृष्णेन सह तस्याः विहारलीलायाः भव्यं वर्णनं दृश्यते। अस्य पुराणस्य अनुसारेण श्रीराधायाः दैवी उत्पत्तिः स्वीकृता। सा परमात्मास्वरूपस्य श्रीकृष्णस्य वामार्धात् प्रकटिता। प्राचीनकाले गोलोकस्थिते परमसुंदरवृंदावनस्य रासमंडले एकस्मिन् शोभनरत्नमयसिंहासने विराजमानस्य श्रीकृष्णस्य रमणेच्छा जागरिता। तस्य रिरंसा एव रासेश्वर्याः श्रीराधायाः मूर्तं रूपम् अधारयत्। जगदीश्वरः रूपद्वयेन विभक्तः। तस्य दक्षिणागः श्रीकृष्णरूपेण तथा वामांगः राधारूपेण परिवर्तितौ।

एतस्मिन्नन्तरे दुर्गे द्विधारूपो बभूव सः।
दक्षिणाहणं च श्रीकृष्णो वामार्थङ्गं च राधिका॥[341]

पद्मपुराणे राधायाः स्पष्टमुल्लेखः वर्तते, वैष्णवपुराणत्वात्। अत्र राधाष्टमीव्रतविधानं वर्णितमस्ति। भाद्रमासे शुक्लपक्षे अष्टमीतिथौ वृषभानोः यज्ञभूमौ राधायाः आविर्भावः इत्यत्र वर्णितम्।[342]

नाटककारः भट्टनारायणः वेणीसंहारनाटकस्य नान्दीश्लोके राधाकृष्णयोः रासलीलायाः उल्लेखं करोति।

कालिन्याः पुलिनेषु केलिकुपितामुत्सृज्य रासे रसं
गच्छन्तीमनुगच्छतोऽश्रुकलुषां कंसद्विषो राधिकाम्।
तत्पादप्रतिमनिवेशितपदस्योद्भूतरोमोद्गते
रक्षुण्णोऽनुनयः प्रसन्न दयितादृष्टस्य पुष्णातु वः॥[343]

---

[340] विष्णुपुराणे, 5/13/35।
[341] ब्रह्मवैवर्तपुराणे, 48/26/28।
[342] पद्मपुराण, ब्रह्मखण्ड, 6/39-40।
[343] वेणीसंहार, 1.2।

काव्यजगति राधाचरितस्य पूर्णविकसितं रूपं श्रीजयदेवस्य 'गीतगोविन्दे', लीलांशुकस्य श्रीकृष्णकर्णामृते राधाकृष्णप्रेमलीलायाः सुंदरं वर्णनं लभ्यते। श्रीरूपगोस्वामी सर्वमपि संस्कृत्य नाटकीयरूपप्रदानाय प्रयासमकरोत्।

भगवान् पापपुण्यानां विचारकः तथा अनन्तैश्वर्यमयः वर्तते। तदनुसारेण श्रीचैतन्येन भगवान् श्रीकृष्णः प्राणारामः हृदयसखा कथितः। 'भगवान् प्रेमास्पदं वर्तते'- इत्युक्तेः ऊर्ध्वस्तरे समारोप्य भगवन्तम् उपपतिरूपेण ग्रहीतुम् आदिष्टवान्। परकीयाभावेन उपासनायाः इदं महद्वैशिष्ट्यं वर्तते। व्रजवधूनां भावः निस्सीमः वर्तते। श्रीराधायाः अयं भावः पराकाष्ठां गतः। परिपूर्णकृष्णप्राप्तिः – अनेन प्रेम्णा एव भवति। श्रीकृष्णः प्रेमवशीभूतः अस्ति।

व्रजवधूनाम् औपपत्यम् असाधारणभावः वर्तते। स्वीया परकीया चेति पारिभाषिकशब्दौ। जगति परकीयायां रसाभासः भवति। परन्तु परकीयां रमणीं प्रति अनुरागेण धर्मोल्लंघनं कृत्वापि परकीयायाः प्रेम-सर्वस्वीभवनमेव उपपतिः इति उज्वलनीलमणिकारः।

अस्मिन् विषये प्राचीनकालात् श्रीचैतन्यमते विचारधाराद्वयं विद्यते। श्रीजीवगोस्वामिना कृतं लक्षणं श्रीकृष्णाय न प्रयुक्तम्। नित्यलीलायां परकीयाभावः न भवति। श्रीकृष्णः स्वयम् औपपत्यस्य दोषोल्लेखं करोति-

अस्वर्ग्यमयशस्यं च फल्गुकृच्छ्र भयावहम्।
जुगुप्सितं च सर्वत्र औपपत्यं कुलस्त्रियाम्॥

श्रीकृष्णस्य सम्बन्धे एते दोषाः न आशंकनीयाः, यतोहि मधुररसास्वादनाय एव तस्य अवतारः वर्तते। गोपिकाभिः सह श्रीकृष्णस्य नित्यदाम्पत्यसम्बन्धः वर्तते। ब्रह्मसंहितायामुक्तमेल- "आनन्दचिन्मयरसप्रतिभाविताभिः।" गौतमीयतन्त्रे यथा-

अनेक जन्मसिद्धानां गोपीनां पतिरेव वा।
नन्दनन्दन इत्युक्तस्त्रैलोक्यानन्दवर्धनम्॥

भागवते-

गोपीनां तत्पतीनां च सर्वेषाञ्चैव देहिनाम्।
योऽन्तश्चरति सोऽध्यक्ष एष क्रीडनदेहभाक्॥

श्रीमद्भागवतीयव्रजलीलाव्याख्याने स्वकीयापक्षे श्रीजीवगोस्वामिनः व्याख्यानं कथमपि न संगच्छते। औपपत्यस्य अधर्मस्पर्शः प्राकृतनायकाय

अस्त्येव, किन्तु धमाधर्मनियामकस्य भगवतः श्रीकृष्णस्य कृते तस्य नावसरः।अतः नाटकचन्द्रिकायां श्रीरूपगोस्वामिना लिखितं यत्- परोढायाः औपपत्यं गोणमेव इति पण्डितानां कथनं श्रीकृष्णं गोपीगणं विहाय एव स्वीकरणीयम्। अलङ्कारकौस्तुभकारस्यापि इदं सम्मतम्। रासपञ्चाध्याये प्रत्यध्यायं परकीयात्वम्-उपपतित्वं प्रतिपादकानि वचनानि सन्ति। यथा-

"ता वार्यमाणाः पतिभिः 26 8, भ्रातरः पतयश्च वः 26। 207, यत् पत्यपत्य सुहृदामनुवृत्तिरङ्ग 26। 32, तद् गुणानेव गायन्त्यो नात्मागाराणि ससारुः 30। 40, पतिसुतान्वयभ्रातृबान्धवान् 31। 16, माययोज्झित लोक वेद् स्वानां 32। 21, ....... कृत्वा तावन्तो मात्मानं यावतीगोपयोषितः 33। 16, मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजोकसः 36।37, इत्यादिषु श्रीशुकदेवः श्रीकृष्ण-गोपिकानां मुखनिःसृतवाक्यैः परोढात्वम् उपपतित्वं वा भावं स्पष्टतः प्रतिपादयति। दशाक्षरमन्त्रः अष्टादशाक्षरमत्रः वा परोढात्व-उपपतित्वभावमयः अस्ति।

श्रीबलदेवविद्याभूषणमतेन- श्रीराधाकृष्णयोः उपपतिभावमयी लीला-परमेश्वरतत्त्वनिबन्धनमेव। यतोहि तस्य कोपि नियामकः नास्ति, यस्य मायया दाम्पत्ये अवस्थानं करणीयमिति। मनुष्यस्य इव भगवतः लीला कर्मपरतन्त्रः नास्ति।

**6. विदग्धमाधवस्य प्रयोगकालः**

श्रीविदग्धमाधवनामकनाटकस्य रचयिता नाट्यकारः भक्तिरसस्य प्रस्थानाचार्यः सुप्रसिद्धनामा श्रीरूपगोस्वामी वर्तते। सः श्रीचैतन्यदेवस्य न केवलं परिकरः आसीत्, अपितु श्रीचैतन्यदेवस्य अभीष्टसंस्थापकः, प्रियस्वरूपः, दयितस्वरूपः, प्रेमस्वरूपः, सहजातिरूपः, निजानुरूपः, अभिन्नरूपः, तथा स्वविलासरूपः वा आसीत्। श्रीचैतन्यदेवस्य उपदेशेन कालकवलितां श्रीवृन्दावनरसकेलिवार्तां पुनः प्रकाशितवान्। तस्य चरित्रं श्रीचैतन्यचन्द्रोदयनाटके, श्रीचैतन्यचरितामृतदिग्रन्थेषु च सुविस्तृतं वर्णितमस्ति।

एवं नाटकस्य नामकरणं विदग्धमाधवम् भवति। विदग्धशब्दस्य अर्थः रसिकः, निपुणः, पारङ्गतः, सर्वमनोहरः, सुप्रसिद्धश्च भवति। किन्तु अत्र विदग्धशब्दस्य अर्थः ग्रन्यकारस्य मतेन चतुषष्टिकलान्वितः भवति। सुरम्यः मधुरः सर्वसल्लक्षणान्वितः, बलीयान्, नवतारुण्ययुक्तः, वावदूकः, प्रियंवदः, सुधी, सुप्रतिभः, धीरः, विदग्धः, चतुरः, सुखी, कृतज्ञः, दक्षिणः, प्रेमवश्यः,

गम्भीरताम्बुधिवरीयान्, कीर्तिमान्, नारीमोहनः, नित्यनूतनः, अतुल्यकेलिसौन्दर्यः, प्रेष्ठः, वशीस्वनान्वितः, गुणयुक्तः, विशिष्टप्रेमानन्दरसस्य उत्तालतरङ्गमयः महावारिधिरूपः श्रीराधाविलासविच्छेदचिह्नितः माधवः भवति श्रीमान् गोकुल-युवराजः।

रूपगोस्वामिनः उपर्युक्तग्रन्थेषु विदग्धमाधवं ललिलमाधवं च रूपककोट्यां, दानकेलिकौमुदी च भाणिकोपरूपककोट्याम् आगच्छन्ति। विदग्धमाधवनाटकस्य रचना गोकुले वि.सं. 1589 अर्थात् 1532-3 ई. जाता इति ग्रन्थस्य पुष्पिकातः प्रमाणिता।

नन्द-सिन्धुरबाणेन्दु-संख्ये संवत्सरे गते।
विदग्धमाधवं नाम नाटकं गोकुले कृतम्॥[344]

अस्य प्रयोगः प्रायशः केशितीर्थे मुक्ताकाशरङ्गमञ्चे प्रदर्शितः वृन्दावन-दर्शनार्थिनां मनोरञ्जनाय, प्रशान्तये, प्रज्ञानाय च। अत्र विदग्धा वर्तते राधा, माधवेन सह तस्याः प्रणयक्रीडा वर्ण्यविषयः अस्ति। वृन्दा राधाविषये वदति यथा- विदग्धवधूनां मूर्धन्यासि। अस्य प्रथमप्रयोगे सूत्रधाररूपेण स्वयं नाट्यकारः एव अवतीर्णः इति प्रस्तावनायाः ज्ञायते। अस्मिन् नाटके सप्तेषु अङ्केषु प्रमुखतः राधायाः विलासस्य चर्चा वर्तते।

**7. विदग्धमाधवस्य कथासारः**

सप्ताङ्कसंयुते अस्मिन् नाटके प्रथमाङ्के वेणुनाद-विलासः, द्वितीयाङ्के मन्मथ-लेखः, तृतीयाङ्के श्रीराधा-संगमः, चतुर्थाङ्के वेणुहरणम्, पञ्चमाङ्के श्रीराधाप्रसादनम्, षष्ठाङ्के शरद्विहारः, सप्तमाङ्के गौरीतीर्थविलासश्च सुष्ठु वर्णिताः सन्ति।

पौर्णमास्याः अन्तिमप्रार्थना नाटकमवसितम्। यथा-
प्रथयन्गुणवृन्दमाधुरीमधिवृन्दावनकुञ्जकन्दरम्।
सह राधिकया भवान्सदा शुभमभ्यस्यतु केलिविभ्रमम्॥ 7.62॥

किञ्च

अन्तःकन्दलितादरः श्रुतिपुटीमुद्घाटयन्सेवते
यस्ते गोकुलकेलिनिर्मलसुधासिन्धूत्थबिन्दूनपि।
राधामाधविकामयोर्मधुरिमस्वाराज्ययस्याजर्न्
साधीयान्भवदीयपादकमले प्रेमोर्मिरुन्मीलतु॥ 7.63॥

---

[344] पृ.350।

श्रीकृष्णः– (स्मित्वा) भगवति ! तथास्तु। तदेहि, गोदोहावसाने मामप्रेक्ष्य चिन्तयिष्यन्तौ पितरावविलम्बं गोकुलं प्रविश्य नन्दयामः!

(इति निष्क्रान्ताः)

इति श्री श्रीविदग्धमाधवनाटके गौरीतीर्थविहारो नाम सप्तमोऽङ्कः॥[345]

## 8. विदग्धमाधवस्य नाट्यशिल्पम्

विदग्धमाधवस्य प्रस्तावनायाः परं विष्कम्भकः केषाञ्चित् पात्राणां दर्शकैः परिचयार्थं तथा नाटकीयकार्यकलापे तेषां विशेषाताज्ञानार्थं प्रयुक्तः। संवादेषु नाटकीयताम् अभिनेयत्वं च जनयितुं वाक्क्रीडाद्वारा पूर्णप्रयासः कृतः। माता यशोदा यदा कृष्णं पृच्छति- प्रतिदिनम् अपराह्ने निर्मितानि मिष्टान्नानि शीतलानि भवन्ति कथमिति तदा उत्तरं कृष्णसहचरः मधुमङ्गलः ददाति। तदा स्वगोपनप्रणयप्रकाशनभयेन तं निवारयति श्रीकृष्णः। पूर्णतया नाटकीयता अनुभूयते अत्र संवादेषु। यथा-

यशोदा- जात, किमित्यपाह्नेऽपि गोष्ठं न स्मरसि? यत्परमादरेण मया रन्धितानि प्रत्यहं शीतलीभवन्ति मिष्टान्नानि।

मधुमङ्गलः- गोकुलेश्वरि, शृणु-

गोभ्यः शपे किमपि दूषणमस्य नास्ति

(इति वागुपक्रमे कृष्णः सस्नेहमेनं पश्यति)

ताभिर्यदेष रभसादभिकृष्यमाणः

कुञ्जं विशत्यधिककेलिकलोत्सुकाभिः

(इति वागसमाप्तौ)

श्रीकृष्णः- (सापत्रपमात्मगतम्) व्यक्तमेष बालिशो वल्लवीभिरिति वक्ष्यति। तदेनं संज्ञया निवारयामि। (इति शिरस्तिरो धूनयति।)

मधुमङ्गलः- भो वयस्य, किमिति मां निवारयसि, यन्निश्चितमद्य आर्याया अग्रत इदं विज्ञापयिष्यामि।

श्रीकृष्णः- (स्वगतम्) हन्त, लज्जाजाले जाल्मधियाहं पातितोऽस्मि।

मधुमङ्गलः- पीताम्बरस्त्वरितमम्ब सुहृद्धटाभिः॥[346]

श्रीकृष्णः- (सानन्दमात्मगतम्) कथमन्यदेवास्य हृद्गतम्।

---

[345] पृ.-347-349, तत्रैव।

[346] 1.20, पृ. 21-22, तत्रैव।

श्रीकृष्णेन चिन्तितमासीत् – एष वदिष्यति गोपीभिः केलिनिमित्तं कुञ्जे नीत्वा विलम्बः कार्यते, परं गोपीनां स्थाने तेनोक्तं सुहृद्घटाभिः। अत्र नाट्यकारेण ज्ञातसारेण स्त्रीलिंगान्तघटाशब्दस्य प्रयोगं करोति, उत्सुकतां वर्धयितुम्। अत्र नाट्यतत्त्वानुसारेण अवस्यन्दितं नाम वीथ्यङ्गम्।

तथैव यदा पौर्णमासी कृष्णं वदति- पुष्पावचयाय एकत्रिताः गोपिकाः तव महोत्सवाय स्युः। श्रीकृष्णस्तु अत्र शृंगारितचित्तवृत्तिः जातः। द्वितीयक्षणे पौर्णमासी स्वाभिप्रायस्य दिक्परिवर्तनं करोति। यथा-

पौर्णमासी- राधाभिधाना काचिदानन्दकौमुदी।

श्रीकृष्णः- (सरोमाञ्चं स्वगतम्) श्रुतं नूनमम्बयोः संवादे शश्वदस्या सौष्ठवम्(इति कम्पमानो व्रीडां नाटयति)।

पौर्णमासी- (स्वगतम्) कृष्णं विलक्षणमवेक्ष्य नूनं रामः सव्याजमसौ सव्यत प्रयाति।

श्रीकृष्णः- (पुनरात्मगतम्) विक्रियां संगोपयितुं प्रसङ्गान्तरमङ्गीकुर्याम्। (प्रकाशम्) आर्ये, अद्य खलु मधुवासरे त्वयापि काचिन्महोत्सवलक्ष्मीरलंक्रियताम्। पश्य जरद्वल्लीश्रेणीरियं फुल्ला पल्लविता च।

पौर्णमासी- (सस्मितम्) नागर, तवैव महोत्सवानामवसरोऽयं संवृत्तः। यदत्र पुष्पाणां पल्लवानाञ्च तृष्णया वल्लवानां विलासिन्यः समेष्यन्ति।

श्रीकृष्णः- (सम्मितं तिर्यगवेक्ष्य) आर्ये, तत् किम्?

पौर्णमासी- (विहस्य) विलासिन्, स्ववासनानुसारतोऽयथा मा शङ्किष्ठाः। परमेवमभिप्रायास्मि। ततस्तासां शून्येषु सद्मसु सखिभिस्ते सुखमपहर्तव्यानि गव्यानि।

श्रीकृष्णः- धूर्ते, किं परिहस्यते। पश्य, कोमलमञ्जरीमवचिन्वतीनावल्लवीनां मण्डलेन खण्डितानि मे वन्दाटवीशाखिविटपानि। तदेतास्ते निवारणीया।

पौर्णमासी- मोहन, तव्यस्तबकोत्तंसिना भवतैव समुल्लासितोऽयं कुसुमेषुरागो बल्लवीनाम्। ताः कथमितो निवार्यन्ताम्।

श्रीकृष्णः-(स्मित्वा) अयि बलाकावलक्षकेशि।कथोपक्रमाद्वक्रमेव पन्थानमधिरूढासि। यदपराधिकास्वपि बल्लवीषु पक्षपातं न मुञ्चसि।

पौर्णमासी-सुन्दर, संप्रति सराधिकाः खलु बल्लव्य कथमपराधिका सन्तु। तेन ते प्रियस्य पुन्नागस्यापि सुमनःस्तेयं हठेन करिष्यन्ति।

श्रीकृष्णः-(स्वगतम्) हन्त, कथं मनोहारिणी सैव दैवात्पुनरावर्त्तते राधिकावार्त्ता।[347]

अत्र नाट्यकारेण ज्ञातसारेण श्लिष्टशब्दस्य प्रयोगं करोति, उत्सुकतां वर्धयितुम्। अत्र नाट्यतत्त्वानुसारेण अवस्यन्दितं नाम वीथ्यङ्गम्।

अत्र रंगमञ्चे स्त्रीजनानां प्रगल्भव्यापाराः लभ्यन्ते। कराला, मुखरा, जटिला च कलहनिपुणाः दण्डनिष्णाताः च दृश्यन्ते। नाटकेऽस्मिन् स्त्रीजनानां विदूषकाणां च संवादे पद्यभागः संस्कृते वर्तते। नियमानुसारं तत् प्राकृते भवितव्यमासीत्। स्त्रीणां संवादे गद्यभागः प्राकृते एवास्ति। गानयोग्यपद्यानि क्वचित् प्राकृते गायन्ति।

संवादेषु शाब्दिककौशलं, चमत्कारश्लिष्टपदानां प्रयोगः, प्रसङ्गानुकूलं शब्दविन्यासः चेतः प्रसादयन्ति। मधुमङ्गलस्य प्रश्नस्योत्तरे यदा कृष्णः मालां विना शून्यहृदयः इति वदति तदा साक्षात् मधुमङ्गलः कथयति- 'बालामिति भण' [348] अर्थात् मालास्थाने बालां (राधां) कथय।

नाटकीयपरिस्थिषु वैपरीत्यसन्दर्शनं कविना कौशलपूर्वकं विहितम्। यथा- रसोक्तस्यान्यथा व्याख्या यत्रावस्यन्दितं हि तत्। तत् उदाहरणं इति नामके भूषणे अपि स्थापयितुं पारयामः।

वाक्यं यद् गूढतुल्यार्थं तदुदाहरणं मतम्।
शशी वृत्तो वह्निः परमहह वह्निर्मम शशी॥[349]

अर्थात् चन्द्रः वह्निरिव कार्यं करोति तथा वह्निः चन्द्रः इव शीतलः अस्ति। इयं वियोगसन्तप्तायाः राधायाः दशा वर्तते।

**छायानाट्यम्**

द्वितीयाङ्के नाट्यकारः चित्रं छायानाट्यस्य माध्यमं स्वीकृतवान्। राधा कृष्णचित्रं दृष्ट्वा वदति- हृतहृदयं यस्य प्रतिच्छन्ददर्शनमात्रत ईदृशी दुरूहसंगमा उपस्थिता तेऽवस्था तत्रापि पुना रागं वहसि।

इदं चित्रं विशाखया चित्रितं तथा राधा तत् कर्णिकारकुञ्जे उपविश्य दृष्टवती। तत् दृष्ट्वा सा उन्मत्तेव जाता। पञ्चमे अङ्के सुबलः राधारूपं धारयति,

---

[347] पृ.32-35, तत्रैव।
[348] पृ.65, तत्रैव।
[349] 2.3, तत्रैव।

वृन्दा च ललितारूपम्। द्वावपि न केवलं जटिलाम् अपितु श्रीकृष्णमपि छलयतः।

**परिहासः**

कविना स्वकलानैपुण्येन समीचीनस्तरे एव नाट्यपात्राणां तदनुरूपं नर्मं प्रस्तौति। पौर्णमासी कृष्णं नर्मवचनैः विध्यन्ती वदति-

गोपेश्वरस्य तनयोऽसि नयोपपन्नः
ख्यातस्तथा व्रजकुले भुजयोर्बलेन।
लीलाशतैस्तदपि किं कुलयोषितस्त्व-
मुन्मादमुद्वहसि माधव राधिकायाः॥[350]

अयः परिहासः कूटघटनाप्रधानः एव। रूपगोस्वामी कूटघटनाविन्यासे नदीष्णः आचार्यः प्रतीयते। स वारं वारं कूटरचनां विधाय नाटकीयोत्सुक्यं वर्धयति।

**एकोक्तिः**

विदग्धमाधवे बहुत्र विशुद्धाः एकोक्तयः सन्ति। चतुर्थाङ्के पञ्चदश-षोडश-पद्ये एकोक्तिरूपे एव। यथा-

श्रीकृष्णः- ( राधां स्मरन् सोत्कण्ठम्)
प्रसरति मञ्जूचापे श्लथज्यमकरोत् स्मरो धनुः पौष्पम्।
मधुरिममणिमञ्जूषा भूषायै मे प्रिया सास्तु॥
(पुनः सौत्मुक्यम्)
सा मुखसुषमा निर्जितराकाचन्द्रा वलीलसन्मध्या।
मुहुराधास्यति राधा मदुरसि रसिका किमात्मानम्॥

क्वचित् एकोक्तिभिः प्रेक्षकेभ्यः आवश्यकसूचना, अन्यत्र मनोरंजनसामग्री च दीयते। यथा-

भ्रमरेऽपि गुञ्जति निकुञ्जकोटरे
मनुते मनस्तु मणिनूपुरध्वनिम्।
अनिलेन चञ्चति तृणाञ्चलेऽपि तां
पुरतः प्रियामुपगतां विशङ्कते॥[351]

---

[350] 3.5,, तत्रैव।
[351]श्लो.15-17, चतुर्थेङ्के, तत्रैव।

अस्मिन्नङ्के अभिसारभूमौ श्रीकृष्णः एकलः स्थितः। राधामेलनं न जातम्, तथापि तदर्थं चिन्तयति सः-

यथा कपटी स लता कुटीमिमां सखि नागादधुनापि माधवः।
इति जल्पपरीतया तया क्लमदीर्घा गमिता कथं तमी॥[352]

लक्षणैरेव तेन ज्ञातं राधा आगतासीतदिति। अन्ततः सः राधायाः सूर्याराधनवेदिकायामुपविष्टः।

विदग्धमाधवस्य पञ्चमाङ्के मानवतीराधायाः एकोक्तयः उल्लेखार्हाः विशिष्टाश्च सन्ति। श्रीकृष्णस्यानुनयं तिरस्कुर्वती सा अनुतापदग्धा जाताहै। रसालतरुमूल कथमिव सा गुनगुनकरोति-

कर्णान्ते न कृता प्रियोक्तिरचना क्षिप्तं मया दूरतो
मल्लीदामनिकामपथ्यवचसे सख्यै रुषः कल्पिताः।
क्षोणीलग्नशिखण्डशेखरमसो नाभ्यर्थयन्नीक्षितः
स्वान्तं हन्त ममाद्य तेन खदिरांगरेण दंदह्यते॥
धन्यास्ता हरिणीदृशः स रमते याभिर्नवीनो युवा
स्वैरं चापलमाकलय्य ललिता मां हन्त निन्दिष्यति।
गोविन्दं परिरब्धुमिन्दुवदनं हा चित्तमुत्कण्ठते
धिग्वामं विधिमस्तु येन गरलं मानाभिधं निर्ममे॥
(भृङ्गीमवेक्ष्य)
यमुनातीरकदम्बाः सम्प्रति मम हन्त साक्षिणो यूयम्।
एष बलान्मामबलां गोकुलधूर्तः कदर्थयति॥[353]

एवंविधायाः प्रेमपराकाष्ठायाः, उत्कण्ठाकुलिततायाः वर्णनाय नाट्यकारेण एकोक्तिविधां स्व्यकरोत्। अन्यथा अस्याः प्रकाशनम् असम्भवमासीत्। अत्रैव गोस्वामिनः एकोक्तीनां सार्थकता जाता।

**पात्रप्रवेशः**

नाटके पात्राणां प्रवेशस्य सोद्देश्यं पूर्वसूचना भवेत्, कस्य चरित्रस्य प्रवेशस्य सम्भावनास्तीति। रूपगोस्वामिना तदर्थं श्लेषालङ्कारस्य आश्रयः नीतः। भिन्नार्थे प्रयुक्तानाम् अनेकार्थकपदानां श्लिष्टपदानां वा पात्रनामसंकीर्त्तनेन

---

[352]श्लो.27, तत्रैव।

[353] श्लो.5-9, पञ्चमेङ्के, तत्रैव।

पात्रप्रवेशकौशलं प्रादर्शयत्। यथा सप्तमाङ्के वृन्दवनवनस्य शोभां प्रशंसन्ती वदति- अम्महे ललिता वृन्दावनलक्ष्मीः। (ततः प्रविशति ललिता वृन्दा च।) इदम् अदृष्टाहतेः उदाहरणमस्ति। चन्द्रावली यदा वृन्दावनस्य शोभासंदर्शने मुग्धा तदा राधागमनसूचिकयोः सख्योः ललितावृन्दयोः प्रवेशेन चन्द्रावली रुष्टा भवति। तथैव

चन्द्रावलीं मामनुरुध्यमाना रुणद्धि पद्मे भवती बलेन।
मल्लीं तमालाभिमुखं मिलन्ती हिंस्रेव वल्ली पुरतः कराला॥[354]

इति श्रीकृष्णस्य कथनमात्रेण तत्र कराला समुपस्थिता भवति।

**विदग्धमाधवस्य चरित्राणि**

अतिविचित्रभावेन नाट्यचरित्राणि चित्रितानि श्रीरूपगोस्वामिना। तृतीयाङ्के आरम्भे पौर्णमासी श्रीकृष्णम् आशीर्वदति- 'गोपस्तनतटीष्वलम्पटी भव।' एषा पौर्णमासी उज्जयिनीवास्तव्यस्य आचार्यस्य सान्दीपनेः माता, काषायाम्बरधारिणी, श्वेतकेशा तथा नारदशिष्या वर्तते।

श्रीकृष्णः अपि पौर्णमासीं द्वितीयाङ्के धूर्ते विशेषणेन सम्बोधयति।

मधुमगंलपात्रस्य सर्जनं नवीनमत्र। सः सान्दीपनिपुत्रः सन् अपि अर्धविदूषकः इव जातः। एषः श्रीकृष्णस्य गूढतत्त्वानि प्रकाश्य मनोरञ्जनं विदधाति। राधाप्रेमनिमज्जितं श्रीकृष्णं सः ब्रह्मचारी-शिखामणिमिति वदति। गोपीभिः अस्माकं किमिति यदा श्रीकृष्णः वदति, तदा मधुमङ्गलस्य समीक्षा समीक्षणीया- अस्मप्रियवयस्यस्य हृदयस्याद्यापि रागो युष्मद्गोपिकानामंगेषु न मया दृष्टोऽस्ति। प्रत्युत तासामङ्गराग एवास्य हृदये दृश्यते।

कदाचित् नाट्यकारकविना एकेन मूर्तविशेषणेन सम्पूर्णचरित्रं चित्रितम्। मुखरायाः विशेषणं ददाति – गड्डुरविषाणकठोरे।

एकत्र श्रीकृष्णः माध्वीकपानं करोति इति नाट्यकारेण यत् वर्णितं, कदाचित् तत् क्वचित् पुराणवचनमनुसरति तथापि भक्तिरसात्मके नाटके तत् ग्रहणीयं न प्रतिभाति। कृष्णमिलनप्रतीक्षारता राधिका ललितां वदति- उपनय शयनान्तं साधु माध्वीकपात्रीम्॥[355]

**रसः**

नाट्यशास्त्रे उक्तम्- विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः। अनेन प्रकारेण स्थायी रसत्वं याति। उत्तरोत्तरैराचार्यैः रससङ्ख्या परिवर्धिता

---

[354] 7.28, तत्रैव।
[355] 4.24, तत्रैव।

दृश्यते। अनेन नाट्यकारेण भक्तिरसः मानितः, पोषितश्च वर्तते। अस्य रसस्य साक्षात्कारः निम्नक्रमेण भवति-

प्रथमतः श्रवणकीर्तनादिभजनस्य पुनः पुनः अभ्यासेन आनन्दरूपा रतिः आविर्भवति। तदनु विभावादिभिः चित्तसंयोगात् कृष्णरतिः रसरूपेण विपरिणमते। पश्चात् विभावादिसाहचर्येण रसास्वादनं भवति।

भक्तिरसास्वादनसौभाग्यं सर्वेषां न भवति, रसः ब्रह्मवत् वाङ्मनसोरगोचरत्वात्, प्राक्तनी-आधुनिकी-सद्भक्ति-वासनावासितः भाग्यवान् द्रष्टा, श्रोता, अभिनेता वा हृदये अस्य भक्तिरसस्य आस्वादनं करोति।

प्रस्तुतग्रन्थे नायकचूडामणिः श्रीकृष्णः एव विषयालम्बनभूतः वर्तते। श्रीकृष्णं विहाय अन्यः कोपि सर्वोत्तमस्य उज्ज्वलरसस्य पूर्णनायकः भवितुं न शक्नोति।

अयं नायकः प्रथमतः चतुर्धा वर्तते- धीरोदात्तः, धीरललितः, धीरोद्धतः, धीरशान्तः इति। ततः पूर्णतम-पूर्णतर-पूर्ण-भेदेन द्वादशप्रकारकः। ते सर्वे पति-उपपति-भेदेन पुनः द्विधा विभक्ताः 24 प्रकारकाः भवन्ति। अनुकूल-दक्षिण- शठ-धृष्ट-भेदैः आहत्य 96 भेदाः भवन्ति। 96प्रकाराणां नायकानां गुणः श्रीकृष्णचन्द्रे वर्तते इति तस्य लीलाभ्यः ज्ञायते।

अस्य रसस्य आलम्बनविभावभूताः नायिकाः श्रीहरिवल्लभाः सन्ति। उज्ज्वलनीलमणौ रूपगोस्वामिनः कृष्णभक्तौ कान्ताभावः स्वीकृतः अस्ति। अतः मधुरा-प्रेमारतेः चेति हि राधा-कृष्णयोः परस्परप्रेमानुरागः (संयोगः) स्वायिभावः अस्ति। प्रणय-परिपाके अपेक्षित-प्रेमारतेः षड्त्वस्य अपि प्रतिपादनं कृतवान् गोस्वामी महोदयः। ते यथा- स्नेहः, मानः, प्रणयः, रागानुरागः, भावेति। स्नेहस्य भावे परिणतिः हि माधुर्यरससहकारी अस्ति। अयं दिव्यरसः अस्ति। अयं भक्तिरसस्य चरमस्थितः अस्ति।

उज्ज्वलनीलमणौ तृतीयाध्याये हरिप्रियाप्रकरणे हरिवल्लभाः प्रतिपादिताः सन्ति। यथा-

अथ हरिवल्लभाः
हरेः साधारणगुणैरूपेतास्तस्य वल्लभाः।
पृथुप्रेम्णां सुमाधुर्यसम्पदां चाग्रिमाश्रयाः ॥ [356]

चतुर्थाध्याये राधाप्रकरणं निरूपितम्। पञ्चमे अध्याये 320 नायिकाभेदाः सोदाहरणं कथिताः। षष्ठे अध्याये यूथेश्वरीभेदाः सन्ति। सप्तमे

[356] ३.१, उज्ज्वलनीलमणौ तृतीयाध्याये।

दूतीभेदाः सन्ति। अष्टमाध्याये सखीप्रकरणं वर्तते। नवमे अध्याये श्रीहरिवल्लभाः निरूपिताः। यथा अथ हरिवल्लभाप्रकरणम्

आसां चतुर्विधो भेदः सर्वासां व्रजसुभ्रुवाम्।
स्यात्स्वपक्षः सुहृत्पक्षस्तटस्थः प्रतिपक्षकः ॥
सुहृत्पक्षतटस्थौ तु प्रासङ्गिकत्योदितौ।
द्वौ स्वपक्षविपक्षाख्यौ भेदावेव रसप्रदौ ॥
प्रोक्तस्तत्र स्वपक्षस्य विशेषः पूर्वमेव हि।
सुहृत्पक्षादिभेदानां दिगेव किल दर्श्यते ॥[357]

अत्र हरिवल्लभाः प्रथमताः द्विधा निरूपिताः। स्वकीया परकीया इति। स्वकीयाः परकीयाश्च द्विधा ताः परिकीर्तिताः॥[358] रूपगोस्वामी नायिकायाः उदाहरणमपि प्रददाति। यतोहि राधाकृष्णौ हि श्रीरूपगोस्वामिनः मुख्योपजीव्यौ नायिका-नायकौ, विविधरासलीला एव तस्य उपजीव्य-कथावस्तु। अत एव तस्य सम्बन्धोपेक्षया अनुरूपसहायकस्य संयोजनं कृतमस्ति। कृष्णस्य अष्टौ राज्ञ्यः नायिकारूपेण स्वीकृताः। यथा- चन्द्रावली (रुक्मिणी), सत्यभामा (राधिका), जाम्भवती, अर्कनन्दिनी, शैव्या, भद्रा, कौशल्या, माद्री चेति। तत्र स्वकीयायाः लक्षणम् उदाहरणं च-

करग्रहविधिं प्राप्ताः पत्युरादेशतत्पराः।
पातिव्रत्यादविचलाः स्वकीयाः कथिता इह ॥

यथा-

सुनिर्माणे धर्माध्वनि पतिपराभिः परिचिते
मुदा बद्धश्रद्धा गिरि च गुरुवर्गस्य परितः।
गृहे याः सेवन्ते प्रियमपरतन्त्राः प्रतिदिनं
महिष्यस्ताः शौरेस्तव मुदमुदग्रां विदधतु ॥

पुनः परकीया-नायिकायाः भेदद्वयं कृतमस्ति- 1. परोढ़ा, 2. कन्यका च। ब्रजस्य समस्तगोप्यः परोढ़ानायिकानाम् उदाहरणीभूताः सन्ति। परोढ़ा-नायिकायाः पुनः प्रभेदाः सन्ति, यथा- साधनपरा, देवी तथा नित्यप्रिया। साधनपरायाः भेदद्वयं, यथा- यौथिक्यम्, अयौथिक्यं चेति। यौथिक्यस्य अपि भेदद्वयम् अस्ति यथा- मुनिः, उपनिषद् च। यः ब्रजे जन्म ग्रहणं कृतवान् पुनः गोपीभावयुक्तः ऋषियः मुनयः रूपेण अभिहिताः अभवन्। एवं प्रकारेण ब्रजे जन्मग्रहणं कृत्वा स्वतपस्याप्रभावेण देव्यः गोपीभावं प्राप्तवत्यः, उपनिषत्संज्ञया

357 तत्रैव, ९. १-३।
358 तत्रैव, ३.३।

विभूषिताः सन्ति। सा हि यौथिक्यनायिकायाः उदाहरणम्। अयौथिक्यनायिकायाः द्वौ भेदौ स्तः। यथा- प्राचीनः, नवीनः। चन्द्रावली राधा च श्रीकृष्णस्य "नित्यप्रिया"- अस्ति। ते श्रीकृष्णस्य प्रकटलीलायाम् अवतरिते बभुवतुः। अथ परकीयायाः लक्षणम्

रागेणैवार्पितात्मानो लोकयुग्मानपेक्षिणा।
धर्मेणास्वीकृता यास्तु परकीया भवन्ति ताः ॥[359]
अथ परकीयायाः उदाहरणं यथा
रागोल्लासविलङ्घितार्यपदवीविश्रान्तयोऽप्युद्धुर
श्रद्धारज्यदरुन्धतीमुखसतीवृन्देन वन्द्येहिताः।
आरण्या अपि माधुरीपरिमलव्याक्षिप्तलक्ष्मीश्रियस्
तास्त्रैलोक्यविलक्षणा ददतु वः कृष्णस्य सख्यः सुखम् ॥[360]

अतः समासतः हरिवल्लभाः एवं वर्गीकर्तुं शक्नुमः। यथा-




---

[359] तत्रैव, ३.१७।
[360] तत्रैव, ३.१८।

प्रायिकीलीलायाः अर्थात् कादाचित्कीलीलायाः समावेशेन एकं नाटकं लेखितुं श्रीरूपगोस्वामिनः इच्छा आसीत्। परन्तु महाप्रभोः श्रीचैतन्यदेवस्य आदेशेन सः नाटकद्वयमरचयत्। कादाचित्कीलीलायां ब्रजपरिकराः पुरपरिकराश्च अभिन्नाः सन्ति। अतः श्रीकृष्णस्य व्रजात् पुरं प्रति गमने अपि तेषां विरहः नास्ति। परन्तु महाप्रभुः व्रजलीलां व्रजे तथा पुरलीलां पुरे एव परिसमापयितुम् आदिष्टवान्। तदनुसारेण प्रायिकीलीलानुसारं व्रजलीलामयं 'विदग्धमाधवनाटकं" कादाचित्कीलीलानुसारं पुरलीलामयं ललितमाधवनाटकम्" अरचयत्। पुनश्च प्रेमातिशय्यनिबन्धनरूपे व्रजधाम्नि श्रीकृष्णः पूर्णतमः वर्तते, मथुरायां वासुदेवस्तु पूर्णतरः तथा द्वारकायां पूर्णः इति सम्प्रदायः। अतः स्वरूपानुसारमपि नाटकस्य रचनमभवत्।

ग्रन्थस्थश्लोकसमूहः अपूर्वभावमाधुर्यविमण्डितः अस्ति, येषु "तुण्डे ताण्डविनी"आदिश्लोकानामास्वादनेन सपरिकरस्य श्रीमन्महाप्रभोः यः आनन्दोच्छ्वासः जातः, परिकरवर्गेण कथम् अस्य ग्रन्थस्य आस्वादनः करणीयः इति तीव्रवासना कथं फलवती जाता इत्यस्य सविशदं विवरणं "श्रीचैतन्यचरितामृतस्य" अन्त्यखण्डे प्रथमपरिच्छेदे वर्णितमस्ति।

**9. वनलतानां मानवीकरणम्**

श्रीरूपगोस्वामिना वनलतानां मानवीकरणं बहुधा कृतम्। यथा-

स्मितं वितनु माधवि प्रथय मल्लि हासोद्गमं
मुदा विकस पाटले पुरटयूथि निद्रां त्यज।
प्रसीद शतपत्रिके भज लवंगवल्लिश्रियं
दधार सह राधया हरिरयं विहारस्पृहाम्॥

अन्यत्र वनदेवी स्वयं पात्ररूपेण रंगमंचम् आरोहति।

नाट्यकारः कौशलेन शुकं सारिकां चापि पात्रीकरोति। नेपथ्यात् तयोः कथनं वाचयति। सारिका कथयति-चञ्चल सन्ध्याघन इव मुहूर्तरागं तनोति ते स्वामी।

वहति स्नेहं राधा केवलं नवनीतपुत्रीव॥

एकविंशशतकीयानाम् आधुनिकानां नारीणां स्वरूपं वयं षोडशशतकीये अस्मिन् नाटके पश्यामः। राधा श्वश्रूविषये वदति- एषा कालरात्रिरिव दारुणा वृद्धा मां दृष्टवती। सर्वथा अभव्या इयं कटूक्तिः। एवं कटूक्तिः चन्द्रावली अपि करोति- अकाण्डकर्कशाया भवितव्यं चाण्डित्या ... चण्डिम्ना। नायिकानां सखीसैन्यस्य स्पर्धालुता, व्यङ्ग्योक्तीनां चटुलता,

आक्रामकता च स्पृहणीयास्ति। राधायाः सखी ललिता चन्द्रावलीसखीं पद्मां वदति-

रोलम्बीनिकुरम्बं चुम्बति गण्डं पिपासया तस्य।
सरति तृषार्तः सरसी स करीन्द्रस्तं पुनर्नहि सा॥

पद्मायाः प्रत्युत्तरमस्तीत्थम्-

विद्योतमाना राधा प्रेक्ष्यते तावत्तारकालीभिः।
गगने तमालश्यामे न यावच्चन्द्रावलिः स्फुरति॥

## 10. विदग्धमाधवस्य रचनाशैली

श्रीरूपगोस्वामिनः नाट्यशैली नितरां श्लिष्टा, शृङ्गाररसोद्दीपिका, संवादप्रवणा, कूटरचनाप्रवीणा, वाग्धारानिरूपिता वर्तते। तस्य शैलीं समीक्षमाणैराचार्यैः उपाध्यायोपाह्वयैः रामजीमहोदयैः सत्यमुक्तं तेषां आधुनिकसंस्कृतनाटकग्रन्थे- "रूपगोस्वामी श्लेषात्मकशब्दप्रयोगकुशलः आसीत्। यदा कृष्णः 'अपराधिकासु वल्लवीषु' कथयति तदा पौर्णमासी प्रतिवदति- अपराधिका कथम्? गोपीभिः सह राधा अस्ति एव खलु। क्वचित् श्लिष्टपदावली अक्षरसंघातनामकं भूषणं सृजति। वाक्यमक्षरसङ्घातो भिन्नार्थं श्लिष्टशब्दकम्। यथा- भवतैव समुल्लासितो कुसुमेषुरागो वल्लवीनाम्' इत्यत्र कुसुमेषु इत्यस्यार्थः कामः पुष्पं च।

रूपगोस्वामिनः रूपकपरम्परा श्रेणीबद्धा वर्तते। उदाहरणाय एकम्-

हित्वा दूरे पथि धवतरोरन्तिकं धर्मसेतो-
भगोदग्रा गुरुशिखरिणं रंहसा लंघयन्ती।
लेभे कृष्णार्णवनवरसा राधिकावाहिनी त्वां
वाग्वीचिभिः किमिव विमुखीभावमस्याः करोषि॥[361]

उपमानानां चयनं दर्शनीयमेव। यथा, कृष्णमुखस्य उपमेयम्-

वदनदीप्तिविधूतविधूदया कुमुदधामधुरामधुरस्मिता।
नखजितोडुरियं हरिणेक्षणा तृणयति क्षणदामुखमाधुरीम्॥[362]

यमकालङ्कारस्य ग्रथनात्मकः वागाडम्बरः दर्शकान् पीडयति। नायकः स्वयं नायिकां यमकेन बोधयति। यथा-

चन्द्रावलीवदनपुष्करसंगिगण्ड-
चन्दावलीकतरतर्ककलंकितांगी।
शंकाकुलोऽत्र कलयन् कमलायताक्षि

---

[361] 3.9, तत्रैव।
[362] 3.25, तत्रैव।

शं काकुलोलहृदयः प्रविशामि नाहम्॥[363]

क्वचिच्च समानपदविन्यासेन संवादं सरसयति। यथा सप्तमे अङ्के- एषः पलाशी न खलु तव विलासी।[364]

## 11. समीक्षणम्

काव्यशास्त्रानुसारेण काव्यं द्विविधम्- श्रव्यं दृश्यं चेति। प्रस्तुतः ग्रन्थः दृश्यकाव्यान्तर्गतः। प्रस्तुतग्रन्थकारः साहित्यदर्पणस्य नाट्यलक्षणवर्जनपूर्वकं श्रीभरतमुनेः मतेन नाटकं लक्षयितुं नाटकचन्द्रिका इति नाट्यशास्त्रीयं ग्रन्थं रचयति। अस्य लक्षणग्रन्थस्य दृष्टान्तरूपेण स विदग्धमाधवम्, ललितमाधवम् इति नाटकद्वयं प्रणयति। अस्मिन् नाटके नाटकस्य लक्षणं पूर्णरूपेण रक्षितं भवति। दिव्यः, दिव्यादिव्यः, अदिव्यः इत्यादिनायकभेदैः सह मिश्रः, क्लृप्तः, प्रस्तावना, आशीर्वादः, नमस्क्रिया, वस्तुनिर्देशः, नान्दी, प्ररोचना, आमुखः, कथोद्घातः, प्रवर्तकः, प्रयोगातिशयः, उद्घात्यकः, अवलम्बितः, प्रकृतिः- सन्धिः, बीजः, विन्दुः, पताका, प्रकरी, प्रधानकार्याणि, अङ्गकार्याणि, अवस्था- आरम्भः, यत्नः, प्रत्याशा, नियताप्तिः, फलागमः, सन्ध्यङ्गानि- मुखः, प्रतिमुखः, गर्भः, विमर्शः, उपसंहृतिः, द्वादश बीजभेदाः, त्रयोदश प्रतिमुख- सन्धिभेदाः, चतुर्दश निर्वहणसन्धिभेदाः, 36 भूषणभेदाः, 4 पताकास्थानानि, विष्कम्भकः, चुलिका, अङ्कास्यम्, अङ्कावतारः, प्रवेशकादि, अर्थोपक्षेपसमूहः, स्वगतं, प्रकाशः, जनान्तिकम् इत्यादिनाट्योक्तिसमूहः, अङ्कस्वरूपं, गर्भाङ्कस्वरूपम्, अङ्कसङ्ख्या, नाटकीय-रसः, संस्कृत-प्राकृत-भाषा-विधानं, भारतीप्रभृतिवृत्तिचतुष्टयी, नर्म तस्य भेदाः इत्येतेषां सर्वेषां नाटिकाचन्द्रिकोक्तलक्षणानुरूपं विषयनिर्वाहः अस्मिन् नाटके सुन्दररूपेण दृश्यते।

प्रस्तुतग्रन्थे धीरोदात्तः लालित्यगुणयुक्तः श्रीकृष्णः एव दिव्यः नायकः, मुख्यरसः रसराजः शृङ्गारः भवति। सप्ताङ्कयुयस्यास्य ग्रन्थस्य प्रत्येङ्कं हि ग्रन्थकारः विविधकलाकुशलतया दर्शकानां तथा श्रोतृवर्गस्य आनन्दवर्धकसामग्रीं सम्पूर्णरूपेण सन्निवेशयति।

भक्तिव्याजेन मर्यादापूर्णशृङ्गारस्य चरमप्रकर्षः अत्र नाटके प्रदर्शितः। यथा-

सर्वस्वं प्रथमरसस्य यः प्रथीयान् कंसारेन्द्रयति राधया विलासः।
वक्तुं को विरमतु तं जनः समन्तादानन्दस्तिरयति चेद्गिरां न वृत्तिम्॥

[363] 4.12, तत्रैव।
[364] पृ. 18-19, आधुनिकसंस्कृतनाटक, रामजीउपाध्यायस्य हिन्दीमूलात् मया संस्कृतीकृतम्।

हरिरेष न चेदवातरिष्यन्मथुराया मधुराक्षि राधिका च।
अभविष्यदियं विसष्टिर्मकराङ्कस्तु विशेषतस्तदात्र॥[365]

सम्भवतः कृतिरेषा चैतन्यप्रवर्तितभक्तिधारां सर्वजनग्राह्यां लोकप्रियां कर्तुं विरचिता। परन्तु भक्तकवेः एवं रचनम् आवश्यकमासीत् न वेति प्रश्नः? एवमनुमीयते श्रीमद्भागवत-गीतगोविन्दादिपरम्परायां शृङ्गारितं भक्तिकाव्यं तद्युगस्य आवश्यकता आसीत्।

नाट्यकारस्य सूक्ति-सौरभं रसिकान् सज्जनान् सुवासितान् कारयति। यथा-

अप्रेक्ष्य क्रममात्मनो विदधति प्रीत्या परेषां प्रियं
लज्जन्ते दुरितोद्यमादिव निजस्तोत्रानुबन्धादपि।
विद्यावित्तकुलादिभिश्च यदमी यान्ति क्रमान्नम्रतां
रम्या कापि सतामियं विजयते नैसर्गिकी प्रक्रिया॥[366]

एवं शृङ्गारितभक्तिरसपूरितमिदं नाटकरत्नं चिरं विजयं प्राप्स्यति।

## सन्दर्भग्रन्थाः


- आधुनिक संस्कृत नाटक, रामजी उपाध्याय, पृ. 1-45. प्रकाशिका संस्कृतसाहित्यपरिषत्, संस्कृतविभागः, सागरम्, म.प्र., 1977, नूतनसंस्करणम् चौखम्बासुरभारतीप्रकाशनम्, 2014।
- विदग्धमाधवम्, नाटककारः श्रीरूपगोस्वामी, व्याख्याकार पं.रमाकान्त झा, चौखम्बासंस्कृतसीरीजआफिस, वाराणसी-1, 1970।
- विदग्धमाधवम्, नाटककारः श्रीरूपगोस्वामी, समीक्षा डा.स्वर्गकुमारमिश्रः, शिवालिकप्रकाशन, दिल्ली, 2017।
- विदग्धमाधवम्, नाटककारः श्रीरूपगोस्वामी, निर्णयसागरप्रेस, मुम्बाई, द्वितीयसंस्करणम्, 1937।
- चैतन्यचरितावली, प्रभुदत्तब्रह्मचारी, खण्ड-4, पृ. 38, गीताप्रेस, गोरखपुर, तृतीयसंस्करणम्, 2009।
- Advance History of India, Dr. Kalikinkar Dutta, Vol-2, पृ. 346-347, Macmillon & Co, Second, 1950.
- History of Philosophy, Dr. Surendranatha Dasgupta, in 5 Vol., first 1921, Kalpaz Publications, 2017
- The Cambridge History of India Vol. III, p. 210 edited by L.T. Colonel wolseley Haig


[365] 7.2-3, तत्रैव।
[366] 1.5, तत्रैव।

- The cultural hreritage of India, Vol. IV, P.186 edited by Haridas Bhattacharya, Ramakrishna Mission Institute of Clature, Golpark, 1957.
- The Early History of the Vaishnava Faith and Movement in Bengal- S. K. De, first edition, 1942, Pub. Firma K.L. Mukhopadhyay, 6/1A, Bancharam Akrur Lane, Calcutta-12, second edition December 1961.


## सन्दर्भपत्रिकाः


- विदग्धमाधव का उपजीव्य, डॉ. कुमारी निशा सीमा मिश्रा, Journal of Interdisciplinary Cycle Research(ISSN NO: 0022-194) Page No.86-94, Volume XII, Issue VIII, August/2020.


❖❖❖

# विश्वायनमहाकाव्ये वैश्विकी चेतना

सूर्यकान्तवेहेरा

साम्प्रतिकं विश्वं सम्प्रति विभिन्नाभिः समस्याभिर्जर्जरितं दृश्यते। कुत्रचित् युद्धस्य विभीषिका तु कुत्रचित् अनाहारस्य चीत्कारः। कुत्रचित् प्राकृतिकदुर्विपाकस्य मर्मन्तुदप्रवाहश्च कुत्र तापत्रयस्य प्रभावेण विदीर्णं मानवस्य चित्तम्। कुत्रचित् अनावृष्टेः कारणात् निर्वीर्य्या वसुन्धरा च कुत्रचित् विश्वतापायानयोगाद् दुर्विषहं जीवनम्। पुनश्च कुत्रचित् धर्ममाधारीकृत्य असद्भावनायाः अन्धकारश्च कुत्रचित् जातिमाश्रित्य नरहत्यायाः वीभत्सगाथा। असंशयमेतत् सर्वं व्यथयति विश्ववासिनां हृदयम्।

अस्मिन् विषादग्रस्ते प्रेक्षापटे क्रमशः मानवजीवनस्य शान्तिः दूरमपसरति, तेन जीवनसुखस्य क्रमशः अवक्षयः अनुभूयते। शान्तिं विना सुखं नास्ति, सुखं विना शान्तिरपि नास्ति। एतद् व्यासकृतश्रीमद्भगवद्गीतायां प्रतिपादितम् यथा-

नास्ति वुद्धिरयुक्तस्य न चायुक्तस्य भावना।
न चाभावयतः शान्तिः अशान्तस्य कुतः सुखम्॥[367]

समग्रविश्वे सुखशान्त्योः दिव्यमिलनमहर्निशं विराजतां, विश्ववासिनः सानन्दं कालातिपातं कुर्वन्तु इति विश्वमङ्गलमुद्दिश्य एकविंशशताब्द्यामेकं महत्त्वपूर्णं महाकाव्यं विरचितं यस्य शीर्षकं भवति विश्वायनम्। विश्वकवि-रवीन्द्रनाथठाकुरमहोदयानां परमपावनचरणकमलतले काव्यमिदं समर्प्य कविना महामहोपाध्यायेन ब्रह्मर्षिणा हरेकृष्णशतपथिमहोदयेन काव्येऽस्मिन् या वैश्विकी चेतना प्रतिपादिता, तत् प्रसङ्गे अत्र द्वादशसर्गेषु अतीवरमणीयरीत्या वर्णितमिति कथनं निष्प्रयोजनम्।

सम्प्रति भूमण्डलीकरण-(globalisation)-प्रक्रियायां समग्रं विश्वमेकं ग्रामसदृशं प्रतिभाति। अत्र विश्ववक्षसि सुखेन शान्त्या च जीवनधारणार्थं पारस्परिकसहयोगस्य सुमहती आवश्यकता विद्यते। अतः गीतायामुच्यते-

[367] 2.66।

देवान्भावयतानेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परममाप्स्यथ॥[368]

एतदर्थं विश्वायनमहाकाव्ये कविना स्वकल्पनाविलासप्रतिभया यत् कथावस्तु वर्णितं तदतीव मनोहारि भवति। प्रथमतः शान्तिमयस्य आनन्दमयस्य च विश्वस्य सृष्टिः आनन्दमयात् प्रणवात् एव सञ्जाता इति कविना ऋग्वेदस्य नासदीयसूक्ते वर्णितस्य सृष्टितत्त्वस्य आधारेण प्रतिपादितम्।

यदा किञ्चिदपि नासीत्, तदाकेवलमेकं महाशून्यं यदेव प्रकारान्तरेण पूर्णतायाः प्रतीकं पुनश्च यदेव "ओम्" अथवा "प्रणवः" इति वेदः दिशादर्शनं करोति तस्मात् ओङ्कारतत्त्वात् महाशून्यात् एव इयं सृष्टिः सम्भूता। महाशून्ये महाकालेन सह महाकाल्याः मेलनेन यः अद्भुतः, अलौकिकस्तथा अवर्णनीयः शब्दः समुत्थितः सः सत्यसनातनः, नित्यचिरन्तनः स्वरः एव सृष्टेः कारणमिति यत् वेदे वर्णितं तदपि परवर्तिनि काले वैज्ञानिकैः (The Big Bang Theory) सिद्धान्तमाध्यमेन अङ्गीकृतम्। तदेव स्वप्रतिभया अतीव मनोहरिण्या शैल्या कविना "विश्वायनम्" महाकाव्यस्य प्रथमे सर्गे प्रतिपादितं यथा-

महाशून्याधारे नियमितनिराधारवलये
यदा सौदामिन्या विलसति महाकालपुरुषः।
तदाऽऽसीद्रोमाञ्चः जनितरतितापेनफलित-
स्तयोस्तस्माद्धेतोर्महति बलये मेलनमभूत्॥[369]

अपरिकल्पनीये सुविस्तृते सीमातीते महाशून्ये महाकाशे महाकाल-महाकाल्योर्मिलनेन क्रमशः शृङ्गारलीलासम्पादनमाध्यमेन विश्ववासिनां कल्याणार्थं द्वयोरुभयोर्यद् जन्म अभूत् तयोर्नाम सञ्जातं महाकालस्य इच्छानुसारं सत्यः शान्तिश्च। अनयोराविर्भावमाध्यमेन विश्वायनस्य कविरिमं सन्देशं प्रददाति यत्- "समग्रं विश्वं भवति अमृतमयम्। महाकालस्य अथवा महाकाल्याः कदापि मृत्युः न भवति। तयोः पुत्राः वा कन्याः सदा अमराः अमृतत्वस्य ध्वजाधरिणः।" परवर्तिनि काले कविः कथयति यत्- काव्यनायक-सत्य- काव्यनायिका- शान्त्योरुभयोर्महामिलनेन यः सम्भूतः भवति सः भवति कविः, क्रान्तदर्शी, अलौकिककाव्यसंसारनिर्माणनिपुणः प्रतिभावान् मनीषिः।

---

[368] 3. 11।
[369] विश्वा 1.14।

अयं कविः स्वयं सृष्टिकर्ता ब्रह्मा। यद्यपि सः सृष्टिकर्ता तथापि तादृशस्य सृष्टिकर्तुरपि स्रष्टा अस्ति, यस्य नाम सत्यः। यस्याः रोमाञ्चकरं सान्निध्यं प्राप्य अयं सत्यः एकं रमणीयं विश्वब्रह्माण्डं सृजति सा भवति शान्तिः। अतः ब्रह्माण्डस्य वीजभूतं सत्यं पुनश्च सत्यस्य अविच्छेद्या शक्तिरस्ति शान्तिः। अतः विश्वं कथं विखण्डितं वा विषादग्रस्तं वा भवितुं शक्यते? अतः आशावादी कविः कथयति-

सत्यं विश्वविधेश्च कर्मकरणे राराजतां भूतले
शान्तिः क्लान्तिविनाशपाटववती सर्वत्र सा शोभताम्।
शान्त्या तन्मिलितं भविष्यति यदा सत्यं तदा भास्वरं
तेजोवीर्यविमण्डितं भवति तत्सत्यं परं धीमहि॥[370]

सत्यं विहाय विश्वभावनमसम्भवम्। सत्येन चलति सूर्यः सत्येन राजते चन्द्रः। सत्येन वहति वायुः, सत्येन जीवति जीवः। समग्रविश्वस्य कल्याणं साधयितुं सत्यं समर्थः, यदा तस्य अन्तर्निहिता शक्तिः शान्तिः प्रकाशतामेति। अतः कविः विश्वायने अतीव चारुतया सत्यशान्त्योः विवाहप्रसङ्गे वा महामिलनविषये वर्णयित्वा तयोरेकमात्रस्य अपत्यस्य कविनाम्नः मनीषिणः सारस्वतसंसारस्य समुत्पत्तिविषये प्रतिपादयति। कविः विश्वमङ्गलकारी। ध्वन्यालोके उक्तम्-

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥[371]

कविः यथा वाञ्छति तथा कर्तुं शक्नोति। किन्तु सारस्वतसृष्टिकर्ता कविः यथा जानाति, यत् तस्य जनकः भवति सत्यः, जननी च भवति शान्तिः। तदा स केवलं सत्यशान्तिप्रतिष्ठासंरक्षणार्थं स्वीयां सृष्टिं वितनोति इति विश्वायने कविना प्रतिपदं प्रतिपादितम्।

यत्र भवति विश्वमेकनीडम् इति चेतना भवति वैश्विकी चेतना। कविः शतपथी स्वयं काव्यस्य आत्मनिवेदनाख्ये आलेखे प्रतिपादयति-

विश्वयुद्धानन्तरं विश्वस्य प्रभावशालिनोऽपि देशाः यथा भारतम्, आमेरिका, रुसिआ, फ्रान्स, जापान, जर्मानी, चाइना-इंलण्डप्रभृतयः विभिन्नैरुपायैः शान्तिस्थापनार्थं प्रयत्नं कुर्वन्तः सन्ति। एतदर्थं

---
[370] तत्रैव, 1.74।
[371] धन्या. 3 उद्योते।

मिलितजातिसंघस्य निर्माणमपि जातम्, आन्तर्जातीयस्तरे मानवाधिकारायोगस्य (International Human Rights Commission) अपि आविर्भावः जातः। सर्वे मानवाधिकारसुरक्षापूर्वकं शान्तिस्थापनार्थं तत्पराः।

सत्यमाध्यमेन शान्तिस्थापनस्य सन्देशं द्रढयितुमलौकिकविश्वस्य रचयिता स्वयं क्रान्तदर्शी कविरपि समर्थः इति प्रतिपादयितुं "विश्वायनम्" इति काव्यस्य कल्पना। विश्वाधायनमहाकाव्ये नायकनायिकापरिकल्पनं प्रतीकात्मकम् (Symbolic) अस्ति। सत्यं नायकः शान्तिः नायिका च कविर्भवति तयोः सत्यशान्त्योः सुपुत्रः। सर्वेषामाशीर्वादं गृहीत्वा सः सुपुत्रः सर्वेषां दुःखदूरीकरणार्थं पुनः सर्वेभ्यः सुखं प्रदातुं समर्थः इति महाकाव्येऽस्मिन् प्रतिपादितम्।

वस्तुतः काव्यनायक-सत्य-नायिका-शान्त्योः जनन-पालन-वर्धन-बन्धन-मेलन-मधुचन्द्रिकादिविषये कविना विश्वायने वर्णनं कृतम्। तत्र तत्र सर्वेषु क्षेत्रेषु विश्वभावना परिलक्षिता इति कविः स्वीये आत्मनिवेदने पुनः कथयति सत्यशान्त्योः जननपालनवर्धनक्षमता विश्वस्रष्टुः कृपया सा मङ्गलमयी भवतु। यात्र समग्रं विश्वं भवति मधुमयम्, सुधामयम्, अमृतमयञ्च। एतद् रमणीयं स्थानमस्माकं सर्वेषां विश्ववासिनामेव गृहमिति कविः विश्वायनमहाकाव्यस्य अष्टमसर्गे पौनःपुण्येन प्रकाशयति।

## सहायकग्रन्थसूची

1. श्रीमद्भगवद्गीता (Author His Divine Grace By A.C. Bhaktivedanta Swami Prabhupada, Hindi 2018 New Edition. The Bhaktivedanta Book Trust.

2. विश्वायनमहाकाव्यम् (रचयिता आचार्यः हरेकृष्णशतपथी, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, आन्ध्रप्रदेशः 517507)

3. ध्वन्यालोकः ( श्रीमधुसूदनमिश्रशर्मणा कृताअवधानटीकया संवलितः, Shivalik Prakashan, 2015.

❖❖❖

# भाषाधिग्रहणे संज्ञानवादः- अन्तर्दृष्टिः, सिद्धान्ताः, अनुप्रयोगाश्च

डा. जितेन्द्रकुमाररायगुरुः

**शोधसारः -**

भाषासम्प्राप्तिः एका जटिला संज्ञानात्मकप्रक्रिया अस्ति, या अनेकेभ्यः वर्षेभ्यः शोधकर्तृणां, शिक्षकाणां, भाषाविदां कृते च अध्ययनस्य विषयः वरीवर्ति। संज्ञानात्मकतावादः सैद्धान्तिकरूपेण व्यक्तयः भाषां कथं प्राप्नुवन्ति इति अवगन्तुं महत्त्वपूर्णां भूमिकां निर्वहति। अस्मिन् शोधपत्रे भाषाधिग्रहणे संज्ञानात्मकवादस्य विस्तृतमध्ययनं विहितमस्ति। यत्र तस्य ऐतिहासिकसन्दर्भः, प्रमुखसिद्धान्ताः, अनुभवजन्यसाक्ष्याः, व्यावहारिक-निहितार्थाश्च सन्ति। भाषाधिग्रहणे सम्बद्धानां संज्ञानात्मकप्रक्रियाणां परीक्षणेन अस्य पत्रस्य उद्देश्यम् अस्ति यत् यानि अन्तर्निहिततन्त्राणि भाषायाः प्रभाविरूपेण अधिग्रहणस्य, उपयोगस्य च अस्माकं क्षमताम् आकलयन्ति, तेषाम् अन्तर्निहिततन्त्राणां विषये सुव्यवस्थितं ज्ञानं सम्पादनीयम्।

**मुख्यशब्दाः** – संज्ञानं, संज्ञानात्मकप्रक्रिया, संज्ञानवादः, अनुभवजन्यसाक्ष्याः, व्यावहारिकनिहितार्थाश्च।

**प्रस्तावना -**

**संज्ञानम् -**

संज्ञानम् – सम्यक् ज्ञानम्। इदं तादृशी काचित् मानसिकप्रक्रिया, यस्यां विचारैः ज्ञानं प्राप्यते। संज्ञानं नाम ज्ञानेन्द्रियैः वातावरणविषये प्राप्तानां सूचनानां प्रक्रियाकरणम्। अस्यां प्रक्रियायां प्रत्यक्षण-अवधान-चिन्तन-स्मृत्यादयः मानसिकप्रक्रियाः मुख्यरूपेण अन्तर्निहिताः भवन्ति। संज्ञानं तां मानसिकप्रक्रियां बोधयति, यत्र चिन्तनस्य, स्मरणस्य अधिगमस्य भाषायाः च प्रयोगः भवति। यदा वयं शिक्षणप्रक्रियायाम् अधिगमप्रक्रियायां वा संज्ञानात्मकपक्षस्य महत्त्वं स्वीकुर्मः तदा तथ्यानाम् अवधारणायाश्च बोधे ध्यानं प्रदीयत इति तस्यार्थः भवति। संज्ञानात्मकविकास इति शब्दस्य प्रयोगः मानसिकविकासस्य व्यापकार्थे भवति। यस्मिन् बुद्धिं विहाय सूचनायाः प्रत्यक्षीकरणम्, अभिज्ञानं, स्मरणं व्याख्या च अन्तर्भवति। अतः संज्ञाने मानवस्य विविधमानसिकगतिविधयः समाविशन्ति। मनोविज्ञाने संज्ञानं इत्यस्य प्रयोगः ज्ञानप्राप्तिप्रक्रियारूपेण भवति।

**संज्ञानात्मकप्रक्रिया –**

कस्यामपि संज्ञानात्मकप्रक्रियायां नूनं षड् सोपानानि भवन्ति -

- सूचनाचयनम्।
- चितसूचनासु परिवर्त्तनम्।
- सूचनासु साहचर्यस्थापनम्।
- सूचनाधारेण चिन्तनं विस्तारश्च।
- स्मृतौ सञ्चयः।
- प्रत्यास्मरणम्।

**संज्ञानवादः -**

मनोविज्ञाने संज्ञानवादः मनसः अवबोधनस्य एकः सिद्धान्तः वर्त्तते। 1950 तमे वर्षे अस्य वादस्य विकासः अभवत्। किन्तु 1970 तमे वर्षे अस्य वादस्य प्रसारः प्रचारश्च अभूत्। व्यवहारवादस्य विरोधेन अस्य वादस्य विकासः अभवत्। स्किनरमहोदयस्य सिद्धान्तानुसारं विशिष्टानुक्रियायाः परं पुनर्बलनं दीयते, तेन तस्याधिगमः जायते। पावलवमहोदयस्य सिद्धान्तानुसारं उभयोः उद्दीपक-पुनर्बलनयोः सातत्येन प्रयोगेण तस्य अधिगमः जायते। संज्ञानवादानुसारम् अधिगमः पुनर्बलनम् उद्दीपक-पुनर्बलनयोः पुनरावृत्तिञ्च विना भवति। संज्ञानात्मकाधिगमे उद्दीपक-अनुक्रिययोर्मध्ये सम्बन्धः नाधिगम्यते। अपितु विविधान्वेषणबिन्दूनां (उद्दीपक-उद्दीपकयोः ) सम्बन्धस्य अधिगमः भवति।

**भाषायाः अर्जनम् (Acquisition) अधिगमो (Learning) वा भवति?**

अर्जनं नाम स्वप्रयत्नेन अनुभवेन वा सूचनाप्राप्तकरणस्य प्रक्रिया भवति। अधिगमो नाम कस्मिन्नपि विषये कौशले वा सूचनाप्राप्तकरणस्य प्रक्रिया भवति। अर्जनस्य कृते स्वाभाविकवातावरणं तत्सम्बन्धितानुभवश्च प्रमुखे तत्त्वे स्तः। अधिगमाय अध्ययनम् अध्यापनञ्च प्रमुखे तत्त्वे स्तः। बालकः स्वमातृभाषां सहजवातावरणे स्वान्तर्दृष्ट्या प्रयासेन वा अधिगच्छति। अतः भाषामर्जयतीति उच्यते। अध्ययनेन प्रशिक्षणेन वा अधिगतभाषां भाषाधिगमः कथ्यते। साम्प्रतं प्रश्नः समुदेति यत् बालकः भाषायाः अर्जनम् अधिगमो वा कथं करोति। अस्मिन् विषये मनोविज्ञानस्य द्वयोः सम्प्रदाययोः विचारः महत्त्वपूर्णः वर्त्तते।

व्यवहारवादे बालकस्य भाषाधिगमे न किमपि वैशिष्ट्यं वर्त्तते। चलन-भ्रमण-भोजन-पानादीनि कौशलानि यथा अधिगम्यते तथैव भाषाऽपि अनुभवेन अभ्यासेन अधिगच्छति। बालके भाषार्जनस्य न कापि जन्मजाता क्षमता वर्त्तते। बालकस्य मनः श्वेतकर्गदमिव स्वच्छपट्टसदृशं वा भवति। प्रशिक्षणेन तस्य मनसि किमपि अङ्कयितुं शक्यते। वस्तुतः भाषार्जने अधिगमे वा व्यवहारवादे न कोऽपि भेदः वर्त्तते। यतोहि तेषां विचारानुसारम् अधिगमस्य सर्वाणि रूपाणि समानानि भवन्ति। भाषाधिगमः बालकस्य मानसिकविकासस्य संप्रत्ययात्मकविकासस्य वा अङ्गं भवति।

संज्ञानवादानुसारं भाषा मानवस्य सम्पत्तिः भवति। शिशुः भाषार्जनस्य सहजातप्रवृत्या सहैव जन्मग्रहणं करोति। शिशोः मस्तिष्के पूर्वमेव प्रदत्तसंसाधकयान्त्रिकव्यवस्था वर्त्तते। बालकः भाषायाः दत्तसामग्रीं शृणोति। प्रदत्तसामग्रीविषये प्राक्कल्पनां करोति। मस्तिष्कस्य प्रदत्तसंसाधकस्य साहाय्येन नियमान् अन्वेषयति, तान् नियमान् आत्मीकरणं करोति च। प्रदत्तसंससाधनात्परं तेषां नियमानाम् अन्वेषणे कदाचित् बालकः दोषान् समाचरति। किन्तु ते दोषाः भाषाधिगमप्रक्रियायां बालकस्य प्राक्कल्पनायाः पूर्वपरीक्षणस्य च प्रातिनिधित्वं कुर्वन्ति। भाषार्जने उद्भासनस्य महत्त्वं न भवति, अपितु समस्यासमाधनस्य प्राक्कल्पनानिर्माणस्य च महत्त्वं भवति। बालकः स्वस्मिन् विद्यमानेन निश्चितकार्यविधिना एव भाषा अधिगच्छति। भाषार्जनं बालकस्य एका सर्जनात्मिका अनिवार्या च प्रक्रिया वर्त्तते। मन्दबुद्धिबालकः एकां भाषां नूनम् अधिगच्छति।

**प्रमुखसिद्धान्ताः –**

यद्यपि संज्ञानत्मकताविषये नैकैः आचार्यैः अध्ययनं विहितं तथापि अत्र शोधपत्रे प्रासङ्गिकदृष्ट्या द्वयोः आचार्ययोः मतमुपस्थाप्यते -

**एवरम नोम चोम्स्की** *(Avram Noam Chomsky)* **महोदयस्य सिद्धान्तः-**

जैविकव्याकरणसिद्धान्तस्य प्रतिपादकः। स्कीनर महोदयस्य शाब्दिकव्यवहारः इति पुस्तके प्रतिपादितानां शिशोः भाषाविकासस्य सिद्धान्तानां खण्डनं कृत्वा संज्ञानेन एव शिशुः भाषाम् अधिगच्छतीति प्रतिपादितवान्। अस्य मतानुसारं संसारस्य सर्वेषु भागेषु शिशुः स्वमातृभाषायाः कांश्चन आधारभूतनियमान् उत मूलव्याकरणम् अधिगच्छति। शिशौ भाषणक्षमता सहजप्रवृत्तिः भवति। भाषाविकासः एका संपत्तिः वर्त्तते, या स्वातन्त्र्येण बुद्धेः कार्यं करोति। एते मूलनियमा एव तां भाषां नियन्त्रयन्ति।

शब्दानां निश्चितसङ्ख्याकैः कांश्चन नियमान् अनुकृत्य वाक्यनिर्माणं कर्त्तुम् अधिगच्छति। एतैः शब्दैः नूतनानां वाक्यानां निर्माणं भवति। एतेषां वाक्यानां निर्माणं यैः नियमैः क्रियते। एतान् नियमान् एषः महोदयः सार्वभौमिकव्याकरणं जैविकव्याकरणं वा कथयति। अमुं व्याकरणं वयं सामान्यवार्त्तालापे न पश्यामः, यतोहि अस्माकं भाषासु तथा अवधानं विस्मरणं च भवति। तस्मात् इदं व्याकरणं भाषायाः व्यापकन्यादर्शैः अनुमीयते। बाह्यवाक्यसंरचनया अनुमीय भाषायाः मूलं गत्वा कांश्चन वाक्यसंरचनाम् अन्विषति। एतेन प्रतिप्रादितं यत् मनुष्यप्रजातिषु भाषायै स्पष्टजैविकगुणः विद्यते, यत् पशुजगतः पृथक् करोति। किञ्च प्रत्येकं शिशुः भाषायाः तान्त्रिकोपागमेन सहैव उत्पद्यते। भाषा जन्मजातप्रवृत्त्या अधिगच्छति नानुकरणेन। किन्तु भाषायाः वाक्यसंरचनां स्वसहजसंज्ञानेन अधिगच्छति।

**जीन पियाजे (Jean Piaget) महोदयस्य सिद्धान्तः -**

अस्य मतानुसारं भाषार्जनमेका मानसिकी भावात्मिका च प्रक्रिया वर्त्तते। एषः शिशोः भाषाविकासं तस्य संज्ञानात्मकविकासेन सह सम्बन्धं स्थापितवान्। अस्य चिन्तनमासीत् शिशुः वाण्याः प्रकटनात्पूर्वं तस्य संप्रत्ययस्य बोधः भवति। उदाहरणार्थम् – यदि एकः शिशुः इत्थं वदति यत् इदं यानं तस्मात् यानात् दीर्घतरं वर्त्तते, तर्हि तस्य मनसि आकारविषयकः सम्प्रत्ययः अवश्यं भवेत्येव। एषः भाषार्जनार्थं पूर्वावश्यकतारूपेण एकस्मिन् शिशौ संज्ञानात्मकविकासविषये विचारं कृतवान्। तस्य चिन्तमासीत् यत् भाषा एकस्य शिशोः विचारप्रक्रियायाः प्रतिबिम्बितकरणस्य शैली भवति। सा भाषा चिन्तनस्य विकासे न योगदानं करोति। तेन भाषाविकासात्पूर्वं संज्ञानात्मकविकासः जायते इत्युक्तम्।

अस्य मतानुसारं शिशुः वातावरणमाध्यमेन स्वीयप्रारम्भिकान् तर्कसंगतनिर्माणान् अधिगच्छति। (अन्यैः जनैः सह वार्त्तालपं कृत्वा)। एषः भाषार्जनस्य व्याख्यां कैश्चित् विशिष्टशब्दैः कृतवान्। यथा- मनोबन्धः (Schema), आत्मसात्करणम् (Assimilation), अनुकूलनम् (Accommodation) च।

**मनोबन्धः**– शिशुः मनोबन्धस्य संयोजनेन भाषाम् अधिगच्छति। शिशोः संज्ञानात्मकविकासस्य महत्त्वपूर्णं तत्त्वं भवति मनोबन्धः। शिशुषु विशेषतया अनुक्रियाकरणस्य सामान्या अन्तश्शक्तिः भवति मनोबन्धः। यया ते वातावरणस्य उद्दीपकानां विषये चिन्तयन्ति, अवगच्छन्ति, प्रत्यक्षणं कुर्वन्ति

च। अयं मनोबन्धः मानसिकक्रियायै संगठनात्मकसंरचनारूपेण प्रारूपरूपेण वा कार्यं करोति। अनेन मनोबन्धेन शिशुः भौतिकवातावरणं प्रति कथम् अनुक्रियां करिष्यतीति निर्धारिता भविष्यति। शिशुषु भिन्नेषु विषयेषु विविधाः मनोबन्धाः विकसिताः भवन्ति। एतेषां सङ्ख्या प्रौढावस्थायां वर्धिता भवति। मनोबन्धाः सर्वदा परिवर्तन्ते। इदं परिवर्त्तनं संज्ञानात्मकसंरचनायाः आधारः भवति। एवञ्च परिवर्त्तनं यावत् अर्थपूर्णं भविष्यति अधिगमः तावान् सुदृढः भविष्यति। मनोबन्धस्य परिवर्त्तनं द्वाभ्यां प्रक्रियाभ्यां संजायते। आत्मसात्करणम् अनुकूलनञ्च।

**आत्मसात्करणम्** – इयं तादृशी काचित् प्रक्रिया, यस्यां विद्यमाने मनोबन्धे नवीनबस्तूनि नवीनानुभूतयश्च अन्तर्भवन्ति। आत्मसात्करणे शिशुः विद्यमाने मनोबन्धे एव सम्मिल्य कस्यचित् वस्तुनः अभिज्ञानं कृत्वा तस्य व्याख्यां करोति। एतस्मिन् शिशुः स्वस्य संज्ञानात्मकसंरचनानुसारं वातावरणस्योद्दीपकान् प्रति अनुक्रियां करोति।

**अनुकूलनम्**– सर्वाणि वस्तूनि विद्यमाने मनोबन्धे सम्मिल्य तस्य व्याख्यां कर्त्तुं न शक्यते। अतः कदाचित् शिशौ विद्यमानस्य मनोबन्धस्य परिवर्त्तनं विधाय तस्य स्थाने नूतनमनोबन्धमुत्पाद्य नवीनसूचनायाः व्याख्यां करोति। इयं प्रक्रिया एव अनुकूलनम्।

अनेन महोदयेन व्यक्तेः सम्पूर्णावस्थायाः विभाजनं निम्नलिखितरूपेण कृतं वर्तते -

**ज्ञानात्मक-क्रियात्मकावस्था** –

जन्मतः वर्षद्वयपर्यन्तं भवति। अस्यामवस्थायां शिशुः शारीरिकक्रियाभिः इन्द्रियैश्च वातावरणस्य उद्दीपकान् प्रति अनुक्रियां करोति। यतोहि भाषायाः अभावः दरीदृश्यते। वस्तुस्थायित्त्वगुणस्य विकासः भवति। अतः अस्यामवस्थायां शिशुः किमपि नवीनवस्तुं पश्यति तर्हि सः तं वस्तुं दोलयति, मुखे स्थापयति, निक्षिपति च। यतोहि तस्य वस्तुनः विशेषताः अवगच्छेत्। सहजक्रियाः अधिकाः संगठिताः भवन्ति।

**प्राक्संक्रियात्मकावस्था -**

इयमवस्था 2 वर्षतः 7 वर्षपर्यन्तं प्रचलति। अत्र संकेतात्मककार्यस्य प्रादुर्भावः भाषायाः विकासः च भवति। इमाम् अवस्थां द्विधा विभज्यते। पूर्वप्रत्ययात्मककालः आन्तप्राज्ञकालश्च। पूर्वप्रत्ययात्मककालः अन्वेषणावस्था इति उच्यते। अत्र किमर्थम्, कथं इत्यादीनां प्रश्नानामुत्तरं ज्ञातुं

इच्छति। अनुकरणप्रवृत्तेः विकासः भवति। तर्कशक्तेः मानसिकशक्तेश्च उपयोगकरणस्य शक्तिः विकसिता भवति। समानताधारेण संप्रत्ययस्य अधिगमाय प्रयतते। किन्तु त्रुटयः भवन्ति। चिन्तनेषु आत्मकेन्द्रिता दृश्यते। संरक्षणगुणस्य विकासः न भवति।

**मूर्त्तसंक्रियात्माकावस्था –**

इयमवस्था 7 वर्षतः 12 वर्षपर्यन्तं प्रचलति। मूर्त्तविषयेषु तार्किकचिन्तनम्। तार्किकरूपेण मानसिकक्रियाः सरलतया कर्त्तुं प्रभवति। विचारेषु परावर्त्तनक्षमता, संरक्षणक्षमता, सम्पूर्णसंप्रत्यस्य ज्ञानञ्च। आत्मकेन्द्रितप्रवृत्तिः न्यूना भवति। बाह्यजगत् महत्त्वं प्रयच्छति। अधिगमस्य प्रक्रिया सुदृढा भवति। मानसिकक्रियायाः उपयोगः अमूर्त्तचिन्तनेषु, काल्पनिकसमस्यायाः च कर्त्तुं न शक्नोति।

**औपचारिकसंक्रियावस्था-**

इयमवस्था 12 तः 15 वर्षपर्यन्तं भवति। अमूर्त्तविषयेषु तार्किकचिन्तनं करोति। समस्यासमाधानव्यवहारः व्यवस्थितः भवति। बौद्धिकचिन्तनं क्रमबद्धं भवति। पियाजे महोदयेनोक्तम् वस्तुतः भाषा संज्ञानात्मकविकासस्य अवस्थानां माध्यमेन शनैः शनैः प्राप्तस्य प्रतीकात्मकप्रतिनिधिकौशलस्य प्रातिनिधित्वं करोति। पियाजे-महोदयस्य चिन्तनं चाम्स्की महोदयस्य सार्वभैमिकव्याकरणसिद्धान्त्य विपरीतं वर्त्तते। यत्र एतत् उक्तम् भाषार्जनाय मानवमस्तिष्के एकं सामान्यं तन्त्रं वर्त्तते। तस्य चिन्तनमासीत् एतावत्पर्यन्तम् अनुभवेन सामान्यसंज्ञानात्मकप्रक्रियया च ज्ञानप्राप्तिः जटिला भवति। पियाजे-महोदयेनोक्तम्- एकः बालकः अधिगमप्रक्रियायां सक्रियतया भागं गृहीत्वा भाषाम् अधिगच्छति। तस्य मतमासीत् प्रौढबालकाणां रुच्यानुसारं समुचितां शब्दावलीं प्रदाय सहाय्यं करणीयम्। येन अधिगमः सरलः भवेत्। प्रौढबालकः आवश्यकतायां सत्याम् अधिगमप्रक्रियायां भागं गृह्णीयात्। अन्यथा न। अस्य सिद्धान्तेन स्पष्टीभवति यत् संज्ञानात्मकविकासेन सह भाषार्जनस्य सम्बन्धः वरीवर्त्ति। अयं सिद्धान्तः तं क्रमं निर्दिशति यस्मिन् भाषायाः कांश्चन पक्षान् अर्जयितुं शक्यते।

**प्रमुखसैद्धान्तिकरूपरेखा-**

भाषाधिग्रहणे संज्ञानात्मकतायामनेकाः प्रमुखाः सैद्धान्तिकरूपरेखाः समाविष्टाः सन्ति। व्यक्तिः भाषां कथं प्राप्नोतीति विषये अन्तर्दृष्टिं प्रददाति-

**सूचनासंसाधनसिद्धान्तः-**

सूचनासंसाधनसिद्धान्तस्य मतं वर्तते यत् भाषाधिग्रहणे ध्यान-स्मृति-समस्यासमाधानमित्यादीनां विविधसंज्ञानात्मकतन्त्राणां माध्यमेन भाषासंसाधनं भवति। एषा रूपरेखा मनुष्याः भाषावैज्ञानिकसूचनाः कथं संग्रहणं, पुनः प्राप्तिः च कुर्वन्तीति व्याख्यातुं साहाय्यं करोति।

**संयोजनवादप्रतिमानानि-**

संयोजनवादप्रतिमानानि तंत्रिकाजालप्रतिरूपत्वेनऽपि ज्ञायन्ते। तानि स्नायुमध्ये सम्बन्धं सुदृढीकरणं कृत्वा भाषाधिग्रहणस्य अनुकरणं कुर्वन्ति। एतानि प्रतिमानानि प्रतिक्रियातन्त्रद्वारा भाषाप्रारूपसंपर्कस्य क्रमिकशिक्षणस्य भूमिकायाश्च महत्त्वमङ्गीकुर्वन्ति।

**संज्ञानात्मकरचनात्मकतावादः-**

संज्ञानात्मकरचनात्मकवादः भाषाधिग्रहणं ज्ञानस्य सक्रियनिर्माणरूपेण पश्यति। अस्याः रूपरेखायाः अनुसारं छात्राः सक्रियरूपेण भाषया सह संलग्नाः भवन्ति, परिकल्पनाः निर्मान्ति, पर्यावरणेन सह अन्तर्क्रियाद्वारा स्वभाषाकौशलं संवर्धयन्ति च।

**अनुभवजन्यप्रमाणम् –**

भाषाधिग्रहणे संज्ञानात्मकतायाः भूमिकायै अनुभवजन्यप्रमाणम् अनेकैः अध्ययनैः प्रतिपादितमस्ति। fMRI तथा EEG इत्यादीनां स्नायुकल्पनाप्रविधिनामुपयोगं कृत्वा अनुसन्धानेन भाषासंसाधनस्य तंत्रिकासहसंबद्धाः सन्तीति ज्ञातम्। किञ्च भाषाप्राप्तेः विभिन्नपक्षेषु विशिष्टमस्तिष्कप्रदेशाः सम्मिलिताः इत्यपि दर्शितम्। एतदतिरीच्य शिशुणामोपरि कृतप्रयोगैः भाषानियमानाम् सामान्यीकरणस्य भाषाविज्ञानस्यानुकूलनस्य च क्षमता प्रदर्शिता वर्तते।

**व्यावहारिकनिहितार्थः -**

भाषाधिग्रहणे संज्ञानात्मकावबोधनशिक्षायां, भाषाशिक्षणे, व्यवधानकार्यक्रमेषु च महत्त्वपूर्णव्यावहारिकप्रभावः दरीदृश्यते। शिक्षकाः तादृशान् निर्देशात्मकव्यूहान् परिकल्पयितुं शक्नुवन्ति, ये भाषाधिग्रहणस्य संज्ञानात्मकसिद्धान्तानुगुणं स्युः। एतदतिरिक्तं भाषाधिग्रहणे संज्ञानात्मकविकासस्य भूमिकां ज्ञात्वा भाषाविकारयुक्तानां बालकानां कृते प्रारम्भिकहस्तक्षेपव्यूहाः सूचयितुं शक्यते।

## उपसंहारः -

अस्यां जटिलप्रक्रियायां संज्ञानात्मकप्रक्रियाणां, जन्मजातसंरचनानां, संज्ञानात्मकविकासस्य च भूमिकायां महत्त्वं प्रदाय भाषाधिग्रहणस्यावगमनार्थं संज्ञानात्मकवादः शिक्षाजगति प्रामुख्येन उद्भूतः वर्तते। अस्मिन् शोधपत्रे प्रस्तुताः ऐतिहासिकविकासाः, प्रमुखाः सैद्धान्तिकरूपरेखाः, अनुभवजन्यसाक्ष्याः, व्यावहारिकनिहितार्थाश्च च सामूहिकरूपेण मनुष्याः भाषां कथं प्राप्नुवन्ति, कथं च उपयुञ्जते इति विषये संज्ञानात्मकतायाः महत्त्वं प्रतिपादितमस्ति। अस्मिन् क्षेत्रे अग्रे संशोधनेन भाषाप्राप्तेः आधारभूतसंज्ञानात्मकतन्त्राणां विषये, शिक्षायां समाजे च तस्य प्रभावविषये नूनं समधिकं ज्ञानं भविष्यतीति।

## सन्दर्भग्रन्थाः


1. Achard, M. & Niemeier, S. (Eds.). (2004). Cognitive linguistics, second language acquisition, and foreign language. Berlin: Walter De Gruyter.
2. Atkinson, D. (2002). Toward a sociocognitive approach to second language acquisition. The Modern Language Journal, 86(4), 525-545.
3. Arun Kumar Singh .(2017). Advance General Psychology, Motilal Banarasidas Publishers PVT. LTD.
4. Chomsky, N. (2000). New horizons in the study of language and mind. Cambridge: Cambridge University Press.
5. Garrett, N. (1991). Technology in the service of language learning: Trends and issues. The Modern Language Journal, 75 (1), 74-101.
6. Geeraerts, D. & Cuyckens, H. (2007). The Oxford handbook of cognitive linguistics. Oxford: Oxford University Press.
7. Harris, C.L. (2003). Language and cognition. In L. Nadel (Ed.), Encyclopedia of Cognitive Science (Vol. 1 pp. 70-77). London: MacMillan.
8. Herrera, H. & White, M. (2000). Cognitive linguistics and the language learning process: a case from economics. Estudios Ingleses de la Universidad Complutense, 8, 55-78.
9. Pütz, M. & Sicola, L. (Eds.). (2010). Cognitive processing in second Philadelphia: John Benjamins.
10. www.google.com
11. https://www.researchgate.net/


❖❖❖

# Writers World

1. **Sriram A. S.** Asst. Prof., Dept. of Dharmashastra & Mimamsa, SVDV, BHU, Varanasi.
2. **Dash Ajoy Kumar,** Asst. Prof., Dept. of Vyakaran, SJSV, Puri.
3. **Valichakraborty J,** Associate Prof. Dept. of Sahitya, National Sanskrit University, Tirupati.
4. **Bhattacharya Rajasi,** Dept. of Sanskrit, Jadavpur University, Jadavpur.
5. **Mondal Chinmay,** Asst. Prof., Dept. of Sanskrit, Jadavpur University, Jadavpur.
6. **Sahoo Sailendra Kumar,** Asst. Prof., SVDV, BHU, Varanasi.
7. **Sethi Prasanta Kumar,** Assistant Professor of Sanskrit, Gangadhar Meher University, Sambalpur, Odisha.
8. **Pal Tapas,** Asst. Prof. in Sanskrit, University B T & Evening College, Cooch Behar.
9. **Barman Manteswar,** Research Scholar, Guwahati University, Assam.
10. **Dash Anirban,** Central Institute of Higher Tibetan Studies, Sarnath, Varanasi, 221007, UP
11. **Tripathy Jharana Rani,** Asst. Prof., Sri Sri University, Cuttack, Odisha.
12. **Sharma Vivek,** Asst. Prof., H. P. Central University, Dharmashala.
13. **Mahapatra Shasanka Sekhar,** Asst. Prof., Distance Education, Vidyasagar University, Midnapore.
14. **Saha Trupti,** Asst. Prof., Dept. of Sanskrit, Vidyasagar University, Midnapore.
15. **Anita**, Associate Professor, Dept. of Sanskrit, MG Kashi Vidyapith, Varanasi.

16. **Bharati V. K.,** University Deputy Librarian (Professor Grade), Central Library, MG Kashi Vidyapith, Varanasi.
17. **Mondal Dipankar,** Assistant Professor, Chatra Ramai Pandit Mahavidyalaya, Darapur, Bankura, West Bengal,722141
18. **Misra Bidisha,** Asst. Prof., Department of Sanskrit, Lady Brabourne College, Kolkata.
19. **Das Sujan,** Res. Scholor, Panchanan Verma University, Cooch Behar, W.B.
20. **Acharya Jagamohan,** Assoc. Prof. in Sanskrit, Kharagpur College, Kharagpur, Inda, Kharagpur, Paschim Medinipur,West Bengal
21. **Satapathy Swetapadma,** Asst. Prof. Dept. of Sahitya, National Sanskrit University, Tirupati.
22. **Sulaksyani Dipanwita,** Research Scholar, Pondichery University, Pondichery
23. **Talwalkar Rohit A.,** 1/47, Om Sarvodaya Society, M.C. Chhagala Road, Sahar, Mumbai – 400099
24. **Mukherjee Devsujan,** (SACT), Dept. of Sanskrit, Kaliyaganja Mahavidyalaya, Uttar Dinajpur, W.B.
25. **Vyas Yogini H.,** Professor, Sanskrit Department, Gandhinagar College, Gujarat.
26. **Bhattacharya Pratim,** Asst. Prof. in Sanskrit, Sukumar Sengupta Mahavidyalaya, Keshpur, Paschim Medinipur, West Bengal.
27. **Seikh Sahidur,** Asst. Prof., P.D. Women's College.
28. **Mondal Subir,** Research Scholar, Dept. of Sanskrit, Cullacta University, Kolkata
29. **Pal Baban,** Research Scholar, Dept. of Sanskrit, Bankura University, Bankura.
30. **Behera Suryakanta,** Research Scholar, Dept. of Sahitya, National Sanskrit University, Tirupati.
31. **Rayguru Jitendra Kumar,** Asst. Prof. in Sikhyashatra, Central Sanskrit University, Janakpuri, New Delhi-58.

❖❖❖